Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत साहित्य पारिषद १९२९

C. K. Y.
LIB
HARIDWAR

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080539

Reg. No. C. 1073.

१८५१ शकीये वैशाखे ... ख्या

May. 1929.] ... I.

080539

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

Pr-0458

सम्पादकः—श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकः—श्रीदुर्गामोहन-भट्टाचार्य्यः, एम्. ए.

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7 s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৷৶০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

May, 1929.	१८५१ शकीये वैशाखे १२श-वर्षस्य १म-संख्या	Vol. XII. No. 1

कलिविलसितम्

[निबन्धकः—श्रीरमानाथविद्यालङ्कारः]

दूरङ्गता वेदविचारबुद्धिः स्मृतौ स्मृतिर्नो न पतेद् भ्रमेण ।
प्रवाद आप्तस्य विवादमार्गः काले कलौ भारतभूमिजानाम् ॥१
यातं हि सर्वं गतमग्निहोत्रं यद् ब्रह्मचर्य्यञ्च तदास्य-वाद्यम् ।
गार्हस्थ्यमात्मम्भरिता-प्रधानं काले कलौ भारतभूमिजानाम् ॥२
स-ब्रह्मचर्य्यो नहि वेदपाठो विदेश-विद्यैव सुशिक्षणीया ।
सन्ध्या विलुप्ता द्विजनित्यकृत्या काले कलौ भारतभूमिजानाम् ॥३
आर्थी च चिन्ता न तु पारमार्थी भोगे च रागो न तु तद्विरागः ।
धर्मे प्रमादो विपथे विनोदः काले कलौ भारतभूमिजानाम् ॥४
आत्मानुसन्धानमुपैति दूरमन्यस्य वाह्यानुकृतौ चरिष्णुः ।
बुद्धिर्विमार्गा सुखदा कदा नो काले कलौ भारतभूमिजानाम् ॥५
आविष्कृतिः कस्यचिदेतु दूरं प्रत्नस्य रक्षा न भवेत् कथञ्चित् ।
स्फूर्त्तिप्रहीणं युवकस्य चित्तं काले कलौ भारतभूमिजानाम् ॥६

पुस्तकालय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वाति वायुः सुखदो विशुद्धो वरञ्च झञ्झावह एव वाति ।
वेश्म-द्रुम-प्राणिविनाशहेतुः काले कलौ भारतभूमिजानाम् ॥७
न वर्षति प्रावृषि वारिवाहः प्रवृद्धवर्षोऽपि भवन् कदाचित् ।
उत्पादयत्यल्पक-शस्यजातं काले कलौ भारतभूमिजानाम् ॥८
अकालमृत्युस्त्वथवापमृत्युः संक्रामि-रोगो विषमज्वरश्च ।
सप्लीहगुल्मो नगरे लसन्ति काले कलौ भारतभूमिजानाम् ॥९
भाषा निजा संस्कृतभूमिजापि भावेन सार्द्धं प्रकृतिं विहाय ।
विदेशभाषामनुगच्छतीह काले कलौ भारतभूमिजानाम् ॥१०
न वीर्य्यशक्ती न च कर्म्मरक्तिः स्फूर्त्तिर्न काचिच्च मृतेव मूर्त्तिः ।
स्याच्चेत्तथाप्यस्ति सुपुण्यबुद्धिः काले कलौ भारतभूमिजानाम् ॥११
ऋष्युक्त-सत्सात्त्विक-भक्ष्यभोगः सन्ध्येष्ट-देवार्च्चनकर्म्मयोगः ।
सत्यादि-धर्मोऽप्यनुपालनीयः काले कलौ भारतभूमिजानाम् ॥१२
निधाय चित्तञ्च विधाय भक्तिं देवे पदे सत् सहजञ्च कर्म्म ।
कत्वेष्टसिद्धिर्हि भवेत् स्वधर्म्मात् काले कलौ भारतभूमिजानाम् ॥१३

यं धर्म्मं क्षणनश्वरेन्द्रियमुदे त्यक्त्वा चिरन्तिष्ठतां
रम्यं हर्म्यमपि प्रयाति विलयं चेत्नन्त्वशस्यं व्रजेत् ।
साक्षाद्दीश्वरतोषणो बहुफलो देवैः सदा सेवितः
सोऽस्मात् शश्वदुपार्जनीय इह नस्तु स्यात्श्रितं मङ्गलम् ॥१४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वत्या मूर्त्तितत्त्वम्

[निबन्धकः—श्रीअमूल्यचरणविद्याभूषणः]

समागताः सुधियः ! आदिष्टोऽहमद्य भगवत्याः सरस्वत्या मूर्त्तितत्त्वमधिकृत्य किमप्यालोचयितुम्। तत्तु दुरूहं प्रकाण्डं विषयबहुलमपि प्रायश एव सर्वेषां नीरसतया प्रतिभाति। मूर्त्तितत्त्वं नाम साधारणम्—बौद्धानां जैनानामस्माकञ्च। तेषु एकमप्यपहाय नापरः पूर्णत्वमारोढुं शक्नोति—जैनो वा बौद्धो वा ब्राह्मणो वा। मूर्त्तितत्त्वं नाम यदेतेषां मिलितं, तदेव सम्पूर्णमुच्यते। नहि तत् शक्यमालोचयितुमल्पेन कालेन, मादृशेन मन्दमतिना च। तदद्य तेषामेकतमस्य ब्राह्मण्यधर्मस्य सरस्वतीमूर्त्तितत्त्वमवलम्ब्य किञ्चिद् वक्तुमुद्युक्तः। किन्त्वत्र शङ्का मे महती—यत् इदं नाम सभ्यानां चित्तानुरञ्जकं भवेन्न वेति। किमत्र कारणम्? उच्यते। यन्नाम सर्वेषामेव प्रायशो रसवर्जितं, स एवाद्य वचनविषय इति प्रथमम्। द्वितीयं तावत्—दृश्यते हि लोके सरसवाक्पटुता, यया नीरसोऽपि विषयः सरसायते। मम तु तादृशी संस्कृतवाग्भाषणपटुता—यया सरसोऽपि विषयो नीरसायते। तत् कथमहं मन्ये—नीरसोऽयं विषयस्ततोऽपि नीरसवाक्पटुता मे सभ्याननुरञ्जयेदिति। किन्तु इदमेवाशास्महे—यत् पिधाय वचनविषयं, पिधाय च मे वाक्पारुष्यं सभ्यानामत्रोपस्थितानां वाग्देवतानुराग एवताननुरञ्जयेदाकर्षयेच्च नीरसं विषयं प्रतीति।

कतिविधाः सरस्वतीमूर्त्तयो दृश्यन्त इत्युच्यते—

( ) क्वाप्यसौ एकाकिनी निषण्णा।

(२) कुत्र वा तथा दण्डायमाना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) कुत्रचिद्वा स्थिता ब्रह्मणः परिवार-देवतारूपेण।

(४) पुनरन्यत्र विष्णोः परिवारदेवतारूपेण सा तिष्ठति।

प्रायशो भारती पद्मासीना पद्मस्था वा भवति। शिल्पशास्त्रमपि एवं निर्दिशति—

पद्मं लक्ष्म्याः सरस्वत्या ओङ्कारं च त्रिवर्णकम्।

मयमते द्वादशाध्याये षट्षष्टितमः श्लोकः।

श्वेतपद्मासीना एव सरस्वतीति शास्त्रोपदेशः। अंशुभेदागमः (५१ पटल) पूर्वकारणागमश्च (१२ पटल) इदमेव मतं प्रख्यापयतः।

अस्मद्देशे सर्वेषु पुष्पेषु पद्मनामकपुष्पस्य सौन्दर्यं विज्ञाय पद्मं प्रति सर्वे चिरम् आकृष्टा आसन्। सुप्राचीनकालात् पद्मन्तु सर्वेषां प्रियम्। सर्वेषु युगेषु पद्मम् अतुलनीयमासीत्। समान एव समादरोऽस्य सर्वदा। सेवायां साहित्यस्य, अनुशीलने च शिल्पकलायाः केनापि न त्यक्तं सुन्दरमेतत् पद्मम्। प्राचीनतमे वेदे पद्मस्योल्लेखस्तु प्रथमं प्राप्यते। ऋग्वेदे बहुधा दृश्यते श्वेतपद्मस्य नीलपद्मस्य च प्रयोगः। पुण्डरीकन्तु श्वेतपद्मं पुष्करञ्च पद्मं नीलम्। ततो ब्राह्मणयुगे पद्मस्य समादरः समधिकः सञ्जातः। परवर्त्तिनि काले संस्कृतसाहित्यविशारदैः कविभिः पद्मस्य वैशिष्ट्यं सुविज्ञातम्। न कस्मिंश्चित् काले भारतस्य कलाशिल्पे परित्यक्तं पद्मम्। न कदाचित् शिल्पस्य चातुरी पद्मं विना प्रदर्शिता शिल्पकुशलैः। सर्वैर्धर्मैश्च पद्मस्य आश्रयो गृहीतः। जैनबौद्धार्य्यधर्माणां प्राचीनतमेषु स्थापत्यनिदर्शनेषु भारतवर्षस्य सर्वत्र पद्मं विराजितम्। यदा हि बौद्धधर्मो बहिर्भारतेषु विस्तृतिं जगाम, तदा यवद्वीप-सुमात्रा-श्याम-जापान-प्रभृतिषु सुदूरप्राच्यविषयेष्वपि तत्तद्देशनिवासिभिर्मूर्त्तिशिल्पे स्थापत्यकलायाञ्च पद्मं प्रकृष्टतया परिगृहीतमासीत्। दृश्यते च ब्राह्मणग्रन्थेषु पद्मेन सार्द्धं स्रष्टुः प्रजापतेः सम्बन्धः। तैत्तिरीयब्राह्मण उपदिशति (१.१.३.५) आदौ सर्वमिदं जलमयमासीत्। प्रजापतिरियेष

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्माण्डस्य सृष्टिम्। तावदेव एकं "पुष्करपर्णं" सलिलस्योपरि ब्रह्मणा दृष्टम्। पुनरारण्यके तैत्तिरीये (१.२३.१) दृश्यते—यदा सर्वं जलमग्नमासीत् तदा एक एव प्रजापतिः पुष्करपर्णे उत्पन्नोऽभूत्। अत्रान्तरे महाभारतं वर्णयति—स्रष्टा ब्रह्मा ध्यानरतस्य विष्णोर्नाभित उत्पन्नः। ब्रह्मणो नाभिपद्मात् उत्पत्तिहेतोः 'अब्जजः' 'अब्जयोनिः' इत्यादीनि नामानि आसन्। विष्णुनापि सह पद्मस्यास्ति सम्बन्धः। विष्णोरेकं नाम 'पद्मनाभः'। विष्णुरपि तस्य चतुर्षु हस्तेषु एकस्मिन् हस्ते पद्मं धारयति। विष्णुपत्न्याः श्रियोऽपि नाम पद्मा।

दृश्यते पौराणिकीषु आख्यायिकासु पद्मस्य आसनरूपेण पादपीठरूपेण च व्यवहारः।

उपविशन्ति तिष्ठन्ति च प्रायश एव देवा देव्यो वा पद्मोपरि। ब्रह्मा विष्णोर्नाभिपद्मे समासीनः। ब्रह्मणो विष्णोस्तथा महेश्वरस्य पद्ममेवासनम्। तेषां शक्तीनाञ्च आसनम् एतदेव। अग्निर्गणेशः पवनश्च पद्मोपरि उपविशन्ति। सूर्यस्य इन्द्रस्य विष्णोः तदवताराणाञ्च पादपीठं भवति पद्मम्। पद्मासनस्य तु प्राचीनतमं स्थापत्यनिदर्शनं दृश्यते उदयगिरि-भारहुत-साँची इत्यभिधेयेषु त्रिषु स्थानेषु। अधिकसंख्यकानि पद्मासनानि साँचीनामकस्थानस्य महास्तूपद्वारस्योपरि दृश्यन्ते। एतेषु पद्मासनेषु समासीना लक्ष्मीः।

सिंहले शिवस्य पार्वत्याः कुवेरस्य च पीठासनं पद्ममेव। तिब्बते सरस्वत्याः पीठासनमपि पद्मम्।

दाक्षिणात्यस्थेषु 'गङ्गैकोण्डश्चोलपुरम्' 'वागलि' 'गदग' इति ख्यातेषु स्थानेषु द्विभुजपद्मासीनायाः सरस्वत्याः प्रस्तरमूर्त्तयः सन्ति।

अंशुभेदागमः सरस्वतीं "श्वेतपद्मासनान्वितां" पूर्वकारणागमः पुनस्तां "श्वेतपद्मासीनां" वर्णयति। परन्तु सरस्वती श्वेतपद्मोपरि तिष्ठेदिति विष्णुधर्मोत्तरवचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वती हि ब्रह्मणः शक्तिः। ब्रह्मा तु हंसवाहनः। ततः सापि प्रायेण हंसारूढ़ा दृश्यते। यस्य देवस्य यद् वाहनं तस्य शक्त्या अपि तदेव वाहनं प्रायशः स्यात्। अतः सरस्वती ब्रह्माणी अपि प्रियहंस-वाहना। मानसं हि सरो ब्रह्मणः प्रियं स्थानम्। तत्रत्या हंसा अपि लोकविश्रुताः। कालिदासस्य मेघदूतात् इदानीन्तनं काव्यं यावद् मानसहंसा वरीवृत्यन्ते। एतदपि ब्रह्मणो हंसवाहनत्वे कारणं भवितुं युज्यते। सरस्वती मानसभूरिति पुराणादिषु दृश्यते; अतो हंसेन सरस्वत्याः सङ्घटनं न किमपि चित्रम्। राज-तरङ्गिण्या उपोद्घाते कविवर-कह्लणः काश्मीरं वर्णयति स्म। तत्र एवमासाद्यते यद् भारती हंसरूपेण भेरगिरिशृङ्गस्थे सरोवरे आविर्बभूवेति। दाक्षिणात्ये गदगेति ख्याते स्थाने हंसवाहना द्विभुजा सरस्वती वर्त्तते। पादपीठिकामुभयतो द्वे द्वे परिवारदेवते ता अन्तरा हंसः। पादपीठ-स्थायां पद्मपीठिकायां राजते देवी भारती।

महीशूरान्तर्गत नेलमङ्गलतालुके सारदेति ख्यातं सरस्वतीमन्दिरं विद्यते। तत्र हंसवाहना चतुर्भुजा पद्मासनोपविष्टा सरस्वत्याः पाषाणमयी मूर्त्तिर्वर्त्तते। मूर्त्तिरियम् इदानीन्तनी। दक्षिणभारते मुम्बाइप्रदेशे प्रायशः सरस्वती मयूरवाहनेति दृश्यते। महामति-मूरस्य Hindu Pantheon इति पुस्तके चतुर्भुज-मयूरवाहन-सरस्वत्याश्चित्र मस्ति। 'राजपुताना' विभागेऽपि मयूरवाहनायाः सरस्वत्या मूर्त्तिरासा-द्यते। साम्प्रतं श्रीमताजितघोषनाम्ना केनचिन्मे बन्धुवरेण मयूर-वाहनायाः सरस्वत्याः कापि अपूर्वा मूर्त्तिः संगृहीता। मूर्त्तेरस्याः सुविस्तृतं हस्तद्वयं व्याघ्रद्वयस्य मस्तकोपरि तिष्ठतीति।

महामतेः कानिङ्हम् महोदयस्य मतेन प्राचीनतमं हिन्दुमन्दिर-मात्रमेव गङ्गा-यमुनयोः चोदितमूर्त्तिसनाथं दृश्यते। प्रवेशपथमुभयतो मूर्त्तिद्वयं तिष्ठति, गङ्गा-यमुना-सरस्वतीनां वाहनपृथक्त्वमपि वर्त्तते। गङ्गा मकरवाहना, यमुना कच्छपारूढ़ा सरस्वती पुन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गायां मकरप्राचुर्य्यं, यमुनायां प्राचुर्य्यं कच्छपानां, सरस्वत्यां बाहुल्यं मयूराणाञ्च। एतेन तत्तद्देवता तत्तद्वाहनाऽभूदिति तेन मनीषिणा मन्यते।

वङ्गीय-साहित्य-परिषच्चित्रशालायाम् एका आसीन-सरस्वतीमूर्त्तिर्विद्यते। असौ महाम्बुजपीठिकायां सुखासने निषसा। पादपीठे एका मेषमूर्त्तिरस्ति। अस्याः पृष्ठदेशे देव्या दक्षिणपदं न्यस्तम्। मूर्त्तिरियं चतुर्भुजा। ऊर्द्ध्वतनदक्षिणे हस्ते अक्षमाला, वामे तु पुस्तकम्, अधस्तात् हस्तद्वयेण वीणा धृता। वरेन्द्रानुसन्धानसमितिचित्रशालायामपि काचित् मेषवाहना सरस्वतीमूर्त्तिर्विद्यते।

साम्प्रतं काचित् भग्ना सरस्वतीमूर्त्तिर्गान्धारेष्वासादिता। अस्या मुखं न विद्यते। असौ पुनः सिंहासीना। सिंहस्य पृष्ठदेशे अवस्थितायास्तस्याः पादौ एकस्यामेव दिशि लम्बितौ। अस्माकं वीणेव किञ्चिद् वाद्ययन्त्रं जानुनोरुपरि निहितम्। 'लाहोर'चित्रशालायामपि एतादृशी एका सिंहारूढ़ा भग्ना मूर्त्तिरस्ति।

सिंहवाहना सरस्वती बौद्धसरस्वती। मञ्जुश्रीबोधिसत्त्वस्य शक्तिः सरस्वती। मञ्जुश्रीबोधिसत्त्वस्य वाहनं सिंहः। अतस्तस्याः शक्त्या वाहनमपि सिंहोऽभूत्। वङ्गदेशस्य-राजकीय-प्रत्नचित्रशालायां सिंहवाहना चतुर्भुजा सरस्वती विद्यते।

साम्प्रतं बोधगयायां सोमनाथपर्वते एका चतुर्भुजा सिंहवाहना मूर्त्तिराविष्कृता। सरस्वती तत्र द्विदलपद्मोपरि उपविष्टा। पादपीठस्य निम्नभागे एका सिंहमूर्त्तिः। सिंहोपरि पद्ममेकं विन्यस्तम्।

सरस्वत्या हस्तसंख्या द्वे चतस्रो वा। प्रायशो द्विभुजाया एकस्मिन् हस्ते पुस्तकम् अपरस्मिन् माला दृश्यते। ब्रह्मवैवर्त्तपुराणे पुनर्वीणापुस्तकधारिणीति आसाद्यते। चतुर्षु हस्तेषु अपरस्मिन् हस्तद्वये पाशाङ्कुशौ— वीणा कमण्डलुर्वा।

महीशूरान्तर्गत-बेलुड़ हलेविड्-ग्रामयोः हैसलराजनिर्म्मितमन्दिर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गात्रे काञ्चन सरस्वतीमूर्त्तयो विद्यन्ते। तासां हस्ते अङ्कुशः पाशश्च विद्यते। हैसलस्यापत्ये कतिपयानां सरस्वतीनां मूर्त्तेर्हस्ते अङ्कुशो वीणा अक्षमाला पुस्तकञ्च दृश्यन्ते। एताः सर्वा एवात्र शिवशक्ति-रूपा उच्यन्ते। महोशूरस्य-मण्ड्य-तालुकान्तर्गत-वसरल्-ग्रामे अस्ति मल्लिकार्जुनमन्दिरम्। खृष्टीय १२३५ अब्दे मन्दिरमिदं निर्मितम्। मन्दिरस्यास्य नवरङ्गस्य उत्तरतो दक्षिणतश्च द्वे सरस्वतीमूर्त्ती विद्येते। अत्र दक्षिणभागस्थाया मूर्त्तेर्हस्ते अङ्कुशो वीणा अक्ष-माला पुस्तकञ्च। हस्तस्थितद्रव्याणां विपर्य्ययोऽपि दृश्यते। दक्षिणभारतीये अंशुभेदागमे सरस्वत्या मूर्त्तेरधस्तनं विवरण-मस्ति—

व्याख्यानं चाक्षसूत्रञ्च दक्षिणे तु करद्वये।
पुस्तकं पुण्डरीकञ्च त्रिनेत्रा चारुरूपिणी॥

देव्या दक्षिणविभागस्थिते एकस्मिन् हस्ते अक्षमाला अपरस्मिंश्च व्याख्यामुद्रा। सव्ये पुनरेकस्मिन् पुस्तकम् अपरस्मिन् श्वेतपद्मम्। विष्णुधर्मोत्तरवचने तु वामदिग्विभागस्थे एकस्मिन् हस्ते न पद्मम् अपि च कमण्डलुर्दृश्यते। देवी दक्षिणहस्तेन व्याख्यामुद्रया वीणा-मपि धारयन्ती राजते।

अस्याः कर्णयोः कुण्डलद्वयम्। पूर्वकारणागमे कुण्डलमिदं मौक्तिकमिति आसाद्यते। अंशुभेदागमे तु कुण्डलमिदं रत्नखचितम् इति वर्ण्यते। स्कन्दपुराणस्य-सूतसंहितायां सरस्वत्या मस्तके जटा-जूटमस्ति इति कथ्यते। जटाकलापः पुनश्चन्द्रकलासनाथः। सरस्वती नीलकण्ठा त्रिनेत्रा च।

जटाजूटधरा शुभ्रा चन्द्रार्द्धकृतशेखरा।
पुण्डरीकसमासीना नीलग्रीवा त्रिलोचना॥

सा पुनः श्वेतपद्मासीना श्वेतवर्णा श्वेतवस्त्रावृता च। अत्रापि देवी जटामुकुटधारिणी यज्ञोपवीतिनी मुक्ताहारभूषिता च। सर्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव मूर्त्तयश्छिन्नेनाः, एतासां मस्तकं परितः प्रभामण्डलमपि दृश्यते।
हेमाद्रिकृतव्रतखण्डेऽपि विष्णुधर्म्मप्रसङ्गे दृश्यते—

पुस्तकं चाक्षमाला च तस्या दक्षिणहस्तयोः।
वामयोश्च तथा कार्य्या वैष्णवी च कमण्डलुः॥ इति।

तथा च पूर्वकारणागमे (१२ पटले)—

सुदण्डं दक्षिणे हस्ते वामहस्ते च पुस्तकम्।
दक्षिणे चाक्षमाला च करकं वामके करे॥

रूपमण्डनमतेऽपि—

अक्षाब्जवीणापुस्तकं महाविद्या प्रकीर्त्तिता।
वराक्षाब्जं पुस्तकञ्च सरस्वती शुभावहा॥

देव्या ध्यानेऽपि अस्ति—

… … … … "बाहुभिः खै-
र्व्याख्यां वर्णाक्षमालां मणिमयकलसं पुस्तकञ्चेद्दधन्तीम्॥"

(क्रमशः)

कर्त्तव्यं कर्म

[निबन्धकः—रामनरेशत्रिवेदी काव्यतीर्थः]

हन्त भोः! 'ते हि नो दिवसा गताः', नाधुना मनु-याज्ञवल्क्य-पराशरादिभिर्ज्ञानगरिमगरिष्ठैरलङ्कृता भूमिरार्य्यावर्त्तस्य। नात्र तेषां तपोव्रतानां वसुधैव कुटुम्बकम्मन्यानानां प्रसारितस्य पथः कोऽपि पथिकः। तैरचितार्थपारदर्शिभिर्निर्मितेषु ग्रन्थेषु ये वस्तुविशेषा वैशिष्ट्येनोपनिबद्धाः, येषामनुष्ठानतो मानवमात्रमाजीवनं सुखेन कालं यापयितुम्पारयेत्। नहि केवलमाजीवनं, परं प्रेत्यापि सुखानुभूतिर्भवति, ते च वस्तुविशेषाः कर्त्तव्यस्य कर्मणः सुसम्पादननिबन्धना इति।

यच्च मानवैरवश्यमनुष्ठेयं, यस्य चाननुष्ठानेन गुरुतरः प्रत्यवायो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति, तदेव कर्त्तव्यं कर्म इति कथ्यते। यथा हि पुत्रैः पित्रोरादेशः श्रेयं, तयोः शुश्रूषा विधेया इति कर्त्तव्यं तेषाम्। अननुष्ठिते च तस्मिन्निरये गम्यते। शिष्यैर्गुरोरादेशः पाल्यः इति तेषां कर्त्तव्यं कर्म, अपालिते च तस्मिन् प्रत्यवायिभिर्भूयते तैरिति। प्राक्तनैर्महर्षिभिः कर्त्तव्यस्य कर्मणो गुरुत्वं महत्त्वं च बहुमानपुरःसरमादृतम्। कर्त्तव्यस्यैवापरः पर्यायो धर्म इति। सूक्ष्मधिया विचारे कृते च कर्त्तव्यस्य धर्मपर्यायेणोद्घोषणं नह्यनुचितं प्रतिभाति। एतद्विषये मनुना "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" इत्याद्युपदिशता बहुशः कथितम्। भगवता सचराचर-गुरुणा अनादिनिधनेन लीलापुरुषेणापि महाभारतावसरे कर्त्तव्यकर्मविरतमर्जुनमपि गीतोपदेशच्छलेन कर्त्तव्यस्य कर्मणः परिपालनमेवोपदिष्टम्। अन्यान्यपि आद्यानाम् ऋषीणाम्प्रमाणवाक्यानि तमेवार्थम्परिपोषयन्ति। कर्त्तव्यकर्मणा तपसोऽप्यन्योन्याश्रयत्वम्। तथाहि अहिंसा सत्यं दानम् इन्द्रियनिग्रहः इत्यादिकन्तपः, एवं कर्त्तव्यं कर्म चिकीर्षुणाऽवश्यमेव तापसेन भाव्यम्। नातपस्को वस्तुतः कर्त्तव्यपरो भवितुमर्हति, न वा कर्त्तव्यस्याननुष्ठाता तपस्वी भवितुमर्हति, नापि सुखमेधते। सर्वोऽपि जीवलोकः सुखलिप्सुरित्यत्र न हि सन्देहलेशः, तच्च सुखं कर्त्तव्यपरेणैव लभ्यञ्चेत् कर्त्तव्यं कर्मैव सुखस्यापि जनकत्वे स्थितमिति। यो यथा स्वस्मिन् कर्त्तव्ये कर्मणि प्रयत्नपरो भविष्यति, स तथैव सुखं लप्स्यते।

कर्त्तव्यं कर्म च प्रतिजाति भिन्नम्। पूर्वमेव प्रतिपादितं कर्त्तव्यस्यापरः पर्यायो धर्म इति। चाभ्युदय-निःश्रेयस-सिद्धिकृद्धर्मः प्रतिजाति भिन्न इति। सृष्टेरादौ स्वलीलाभूमावार्यावर्त्ते जनान् सिसृक्षता परेण पुरुषेण चतुर्धा सुविभक्ता मानवा ब्राह्मण-क्षत्रिय-वैश्य-शूद्ररूपाः। अस्य च विभागस्य मूलं कर्त्तव्यं कर्म। अत एवोक्तं कर्त्तव्यं कर्म प्रतिजाति भिन्नमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा हि नरः अस्मिन् जगति समुत्पद्यते, तदैव कर्त्तव्यसूत्रग्रन्थिना ग्रथितो भवति। स च ग्रन्थिराजीवनं तमनुबध्नाति। अन्ते च तमनुगच्छति। एवं यो यथा कर्त्तव्यपरः कर्त्तव्यविरतश्च भवति, स तथैव फलमश्नुते। यथा विना मृदा घटो न निर्मातुं शक्यते, तथैव कर्त्तव्यपालनमन्तरा न किमपि सिध्यति, नवैकान्तिकस्य सुखस्योपलब्धिर्भवति। कर्त्तव्यकृदेव संसिद्धिं लभते, नावकाशोऽत्र सन्देहलेशस्य। कर्त्तव्ये कर्मणि कार्य्यस्य संसाधिका काचनानवद्या शक्तिर्वैरीवर्ति। एवं च यदि कस्यचन कार्य्यस्यासिद्धिर्दरीदृश्यते, अवश्यमेव तत्कर्तृभिर्वस्तुतः स्वकृत्यं नानुष्ठितमिति बोद्धव्यम्। कर्त्तव्यपरेण सर्वमेव कृत्यजातं सुकरमेव। आत्मन आत्यन्तिकी तुष्टिरपि तदैव समुद्भवति, यदा हि कर्त्तव्यपरस्तिष्ठति नरः।

यथा हि कर्तव्यं प्रतिजाति भिन्नन्तथैव प्रत्याश्रमं किम्बहुना प्रतिमानवं भिन्नमेव। अतः सम्यक् स्वीयमेव कर्तव्यमनुष्ठेयं, तदेवानुष्ठितममृतस्रावि भवति, परकीयन्तु विषोपमं त्याज्यमिति। करालेऽस्मिन् धर्मकर्मविलोपके कलौ सर्वोऽपि नरः स्वकर्तव्यविमुखः परकीयस्य कर्तव्यस्यानुष्ठानतः सिद्धिं लब्धुमीहते, किन्तु तादृशः प्रयासो मृगमरीचिकाप्राय एव इति। बहवः पाश्चात्त्यभाषाभिभूषिताखिलावयवाः पाश्चात्त्यभाषामनुसरन्तस्तामेवोन्नतिशिखरस्य सोपानं मन्यमाना एवं कथयन्ति "मानवजातिरेका, तस्याः कर्तव्यमपि आ चाण्डालाद् ब्राह्मणं यावदेकमेव।" तदर्थं यत्नपरा अपि वर्तमानास्ते साम्यवादिनः पुनरेवं कथयन्ति "मृत्यादिकमुदर-साराणां ब्राह्मणानां स्वार्थसाधनपरमतस्तत्त्याज्य"मिति। किन्तु तेषां तादृशः प्रयासः पङ्गोर्गिरिलङ्घनयत्नवदन्धस्य रूपकादिदर्शनवाञ्छावद् वामनस्योन्नततरोः फलग्रहणकामनावद् व्यर्थ एव। यदा चैकस्यैव नरस्य बालत्वाद्यवस्थाभेदेन कर्तव्यभेदो भवति, कथन्तदा ह्यनादिकालाद् विलुप्तसंस्काराः संस्कारशुद्धैः कर्तव्यस्य कर्मणोऽनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानेन कृतकामा भवितुमर्हन्ति ? एतद्विषये ह्यन्यदा किञ्चिन्निवेदयिष्यामः, साम्प्रतन्तावत् प्रस्तुतविषयविवेचनमेवोचितम् ।

कर्तव्यं कर्म नहि नरेण फलेप्सुना कार्यम्, अनासक्तधिया फलाफलविचारं दूरीकृत्य कर्तव्यं कर्म कुर्वन् मानवः सुखभाग्भवति, संसिद्धिमपि लभते । यः फलाफलविचारपरो दोलायमानमतिः कर्तव्यपथाद् भ्रश्यति, स चास्थिरमतिर्मनसि नानाविधान् भावयित्वा विषयान् सदैव चिन्तितस्तिष्ठति । अतः कर्तव्यधियैव सर्वं कर्म सम्पाद्यमिति दिक् ।

प्रेमतत्त्वम् *

[निबन्धकः—श्रीविष्णुपदभट्टाचार्य्यः (परिषच्छात्रः)]

वाह्निन्योत्सा मिलन्ते पुनरिह सरितः सागरैः संगतास्ता
रागादाकाशवायुर्मिलति च गगने वायुना नित्यमेव ।
निर्द्वन्द्वं वस्तु किञ्चिन्न भवति भुवने कोऽपि दिव्यो निदेशः
एकस्यान्येन साकं घटयति मिलनं किं मिले न त्वयाहम् ॥
ऊर्म्यीर्मिः श्लेषसक्ता शिखरिभिरनिशं चुम्ब्यते नीलमभ्रं
चन्तव्यं तन्न पुष्पं नहि परिरभते यच्च पुष्पं प्रफुल्लम् ।
चुम्बत्यंशुः सुधांशोर्जलनिधिसलिलं भानुनालिङ्ग्यते क्ष्मा
किन्त्वेभिश्चुम्बितैर्वा यदि च न ललने चुम्बितोऽस्मि त्वयाहम् ॥

---

* पाश्चात्यकवेः शेलिमहोदयस्य "लभस फिलसफि" इति काव्यात् अनूदितमिदं प्रेमतत्त्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संहितायां ब्रह्मचर्य्यम्

[निबन्धकः—श्रीमित्रशास्त्री]

धर्म्मशास्त्रं संहिताशब्दार्थः, सा प्रायेण स्मृतिरित्यभिधीयते। धर्म्मसंहिताख्या नामान्तरम्। विंशतिसंख्याकाः संहिता वर्त्तन्ते विभिन्नमुनिजनप्रणीताः। संहितानामासां विधानानुसारेणार्य्यसमाजाः परिचालिता आसन्।

विमुग्धा भवन्ति ते खलु मानवा ये तदानीन्तनकालस्य विद्वज्जनानां ब्रह्मचर्य्यरीतिमवलोकयन्ति, तदा च ते 'शरीरमाद्यं खलु धर्म्मसाधन'-मित्यंशस्यार्थमवगन्तुमीशा भवन्ति। ब्रह्मचर्य्येण शरीररक्षा जायते। शरीररक्षाया नियमपालनेन विद्याभ्यासस्य नेदिष्ठः सम्बन्धः। शास्त्रे अष्टानां ब्रह्मचर्य्याणामुल्लेखोऽस्ति। तथा च—

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"

आर्य्ययुगे पुरुषश्चतुर्विंशतिवर्षवयो यावदुल्लिखिताष्टविध-ब्रह्मचर्य्यपालने अभ्यस्ता आसंस्तथा दीर्घकालब्रह्मचर्य्यपालनफलस्वरूपं दीर्घजीवनञ्च लब्धुमलमभवन्। अधुना परिलक्ष्यते महानभावो ब्रह्मचर्य्यस्यार्य्यसंसदि, अतो ध्वंसमार्गमुपनीतो मानवसमाज उच्छृङ्खलतापूर्णश्च। नाभिनन्दन्ति युवानो धर्म्मम्, धर्म्मस्तथा धर्म्मसंहिता च तेषां चक्षुषि अलीकाविव प्रतिभातः। तथा च महर्षि-याज्ञवल्क्यः—

'चत्वारो वेदधर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्म्मः स्यादेको वाध्यात्मवित्तमः॥९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमर्थः।—'धर्ममधिकृत्य संशय उपस्थिते केन प्रकारेण तस्य छेदनं कर्त्तव्यमिति प्रश्नस्योत्तरे याज्ञवल्क्यः कथयति—वेदधर्म-शास्त्रज्ञाश्चत्वारो ब्राह्मणाः, त्रैविद्यमण्डली नाम या सभा सा सभा, अध्यात्मज्ञानसम्पन्नानां मध्ये अतीव निपुणो वेदधर्मशास्त्रज्ञश्च कश्चि-न्नरो वा यद् ब्रूते सोऽपि धर्म्म इत्युच्यते। किञ्च—

'ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकादि-श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः॥'२।१

अस्यार्थः—ब्राह्मणक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णाः, तेषां प्रथम-मुक्तास्त्रयो वर्णा द्विजा उच्यन्ते। तेषां द्विजानां गर्भाधानादौर्द्ध्वदैहिक-क्रियां यावत् सर्वाः क्रिया मन्त्रोच्चारणपूर्वकं सम्पाद्यन्ते।

तदा द्विजानामुपनयनविधिरासीत्। अधुना केवलं नाम-मात्रमुपनयनं सम्पाद्यते, परन्तु तादृङ्नियमो न पाल्यते। ब्राह्मण-कुमारस्य गर्भाधानमादिं कृत्वा जननं वाष्टमे वर्षे, क्षत्रियकुमाराणां गर्भादेकादशे, तथा गर्भाद्धि द्वादशे विशाञ्चोपनयनं शास्त्रानुमोदित-मिति। याज्ञवल्क्यः कथयति—

'गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्॥'२।५

उपनयनात् परं गुरुः शिष्यं वेदमध्यापिपच्छौचाचारविषयमुपा-दिशच्च। याज्ञवल्क्यसंहितायां तस्य बहु प्रमाणं विद्यते। ततः प्रभृत्युपनीतबालकानां पालनीयनियमा अतीव कठोरा आसन्। कठोरनियमपालनात्तेषां भावि जीवनं सुचारुरूपेण घटितमभवत्।

अतो दृश्यते यद् द्विजा उपनयनादूर्द्ध्वं वेदेऽधिकारमलभन्त, वेदाङ्गानि चाध्यगीषत। नास्ति शास्त्रे शूद्रस्याधिकारः। अधुना धर्मशास्त्रे शूद्रस्याधिकारमधिकृत्यानल्पाः कथा उत्थाप्यन्ते। स्वयं मनुनोक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'निषेकादि-श्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥' २।१६

गर्भाधानादिरन्त्येष्टिपर्य्यन्तो यस्य वर्णस्य मन्त्रैरनुष्ठानकलाप उक्तस्तस्य धर्म्मशास्त्रस्याऽध्ययने श्रवणे चाधिकारो न त्वन्यस्य कस्यचित् स्त्रीशूद्रादेरित्यर्थः। तेषान्तु शास्त्रोक्त-कर्म्मानुष्ठानेऽधिकारोऽस्त्येव।

उपनयनात् परं द्विजाः सन्ध्याविधिं गुरोः सकाशात् सम्यगशिक्षन्त। अधुना तूपनीतबालक उपनयनादनन्तरं मासं यावदपि सन्ध्याक्रियां कर्त्तुं कष्टमनुभवति। तदा त्वा मरणात् सन्ध्यावन्दनमवश्यं पालनीयमासीत्। तथा च मनुः—

'गुरुः शिष्यं शिक्षयेत सन्ध्योपासनमेव च।'

इदानीन्तु ये खलु मानवाः सन्ध्यावन्दनादिकमपि कुर्वन्ति तेषां बहव आचमनं जानन्ति न वेति सन्देहमवगाहते मे मनः। यथाह्याचमनमधिकृत्य महर्षिर्मनुः—

'त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च॥'

अयमर्थः—प्रथमं तावत् ब्राह्मादितीर्थेन जलगण्डूषत्रयं पिबेत्। ततोऽङ्गुष्ठमूलेनोष्ठाधरौ द्विर्मार्जयेत्। तदनन्तरं जलेन नासिकाचक्षुःकर्णस्थानि षट् छिद्राणि हृदयं शिरश्चाङ्गुलिद्वारेण स्पृशेत्। इदमाचमनञ्च पुनः पवित्रतां कामयमानोऽनुष्णोकृताभिः फेनवर्जिताभिरद्भिरेकान्ते पूर्वाभिमुख उत्तराभिमुखो वा कुर्य्यात्। आचमनजलपरिमाणमाह मनुः—

'हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः॥' २।६२

ब्राह्मणा हृदयगामिनीः, क्षत्रियाः कण्ठगामिनीः, वैश्या अन्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रास्यप्रविष्टाः, शूद्रास्तु जिह्वोष्ठान्तेन स्पृष्टा अपो गृहीत्वा आचामेयुः, तेन च पवित्रा भवेयुरित्यर्थः।

यज्ञसूत्रधारणस्य नियमस्तदासीत्। अधुना तु यज्ञसूत्रधारणस्य काचिद्रीतिर्नास्ति। अस्य यज्ञसूत्रधारणस्य नियमानुसारेण यज्ञसूत्रधारी कदाचिदुपवीती, कदाचित् प्राचीनावीती, कदाचिद्वा निवीती कथ्यते। यथा मनुः—

'उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने॥' २।६३

कण्ठधृतयज्ञसूत्रमन्तरा दक्षिणबाहौ प्रविष्टे सति यत् संस्थानं भवति तदेव उपवीतम्। यस्य द्विजस्य तदस्ति स उपवीती। कण्ठधृतयज्ञसूत्रमन्तरा वामबाहौ प्रविष्टे यत् संस्थानं भवति तस्य प्राचीनावीतमिति संज्ञा भवति। तदस्ति यस्य द्विजस्य स प्राचीनावीती कथ्यते। कण्ठदेशान्माल्याकारेण विलम्बितं यज्ञसूत्रं निवीताख्यां भजते, यस्य विप्रस्य तदस्ति स निवीती इत्युच्यते।

ब्रह्मचारिण आर्य्यबालका ब्राह्ममुहूर्त्ते शय्यां विसृज्य स्नानादिकृत्यं सम्पादयामासुः। प्रातः सायञ्च ते गायत्रीमजपंस्तथा यथाविधि जुहुवुश्चाग्नौ। ततः स्वनामोल्लिख्य गुरुजनानभिवादयामासुरध्ययनफललाभाय च संयतचित्ता गुरुमसेवन्त। गुरुणाध्ययनार्थमाहूताध्यैषत, नान्यथा। गुरुपरिचर्य्यया समग्रां विद्यां लब्धुमलमभवन्। तदा ब्रह्मचारिणो भिक्षामचरन्। ते भिक्षालब्धं सर्वं गुरवे निवेदयामासुः। यथा योगियाज्ञवल्क्यः—

'आहूतश्चाप्यधीयीत लब्धमस्मै निवेदयेत्।
हितञ्चास्याचरेन्नित्यं मनोवाक्कायकर्मभिः॥' २।१८

भिक्षाचरणनियमो मनुना कथितो यथा—

'भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तमम्॥' २।४९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनयनादूर्द्ध्वं ब्राह्मणक्षत्त्रियवैश्या यथाक्रमं 'भवति भिक्षां देही'ति भवत्पूर्व्वम्, 'भिक्षां भवति देही'ति भवन्मध्यम्, 'भिक्षां देहि भवती'ति भवच्छब्दोत्तरं भिक्षां याचेरन्। ब्रह्मचारिणः पुनर्यत्किञ्चिद् भिक्षां न भिक्षेरन्। उक्तञ्च—

'मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥' मनुः २।५०

अयमाशयः—ब्रह्मचारिणः प्रथमं मातरं, तदभावे निजां भगिनीं मातृस्वसारं वा भिक्षां याचेरन्। तासामभावे या हि एतान् ब्रह्मचारिणो नावमानयेत्तां भिक्षां भिक्षेरन्।

तदा ब्राह्मणस्य षड्भिः कर्म्मभिर्जीविकानिर्वाहः समजायत। यथाह महर्षिर्हारीतः—

'षट् कर्म्माणि निजान्याहुर्ब्राह्मणस्य महात्मनः।
तैरेव सततं यस्तु वर्त्तयेत् सुखमेधते॥
अध्यापनञ्चाध्ययनं याजनं यजनं तथा।
दानं प्रतिग्रहश्चेति षट् कर्म्माणीति चोच्यते॥'१।१७।१८

उक्तमध्यापनञ्च पुनस्त्रिविधं परिकीर्त्तितम्। यथा—

'अध्यापनञ्च त्रिविधं धर्म्मार्थमृक्थकारणात्।
शुश्रूषाकरणञ्चेति त्रिविधं परिकीर्त्तितम्॥'१।१९ (हारीतः)

प्रथमं धर्म्मार्थम्, द्वितीयं धनाय, तृतीयं शुश्रूषालाभाय।

गुरुर्न यं कञ्चिज्जनं शिष्यमकार्षीत्। तदा गुरुः कृतज्ञं शुचिमद्रोहिणमाधिव्याधिरहितमसूयाशून्यं, मेधाविनं सेवाकुशलं सच्चरितं विद्यादातारं तथा धनदातारञ्चाध्यजीगपत्। तथा च महर्षिर्हारीतः—

"योग्यानध्यापयेच्छिष्यानयोग्यानपि वर्जयेत्" ॥१।२१

तदा दानग्रहणस्यापि रीतिरासीत्। प्रतिग्रहमधिकृत्य संहिताकर्त्तृभिः कथितम्—

"विदितात् प्रतिगृह्णीयाद् गृहे धर्म्मप्रसिद्धये॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दापशून्य इति ख्यातो लोके यो विद्यते, तस्य सकाशात् गृहे धर्म्मप्रसिद्धये प्रतिग्रहः कर्त्तव्यः। गृहस्थस्य सकाशात् प्रतिग्रहः कर्त्तव्य इत्यर्थः।

आसीत्तदा दानस्यापि रीतिः। यस्मै कस्मैचिद्दानं न प्रशस्तमासीत्। तथा च हारीतसंहितायाम्—

"स्मृतिहीनाय विप्राय श्रुतिहीने तथैव च।
दानं भोजनमन्यच्च दत्तं कुलविनाशनम्॥"१।२३ २४

आर्य्यकुमाराः पवित्रस्थाने उपविश्यानुदिनं संयतात्मानो वेदाभ्यासं चक्रुः। सदा धर्म्मशास्त्राणि चापठन्। उक्तञ्च महर्षिभिः—'धर्म्मशास्त्रञ्च तथा वेदवत् पठितव्यञ्च श्रोतव्यञ्च दिवानिशि।' न केवलं ते धर्म्मशास्त्राणि स्वयं वेदवदपठन् दिवारात्रं गुरोर्मुखादशृण्वंश्च। तथापि च ब्रह्मचारिणोऽधिकृत्य कथितं महर्षिणा हारीतेन—

"उपनीतो माणवको वसेद् गुरुकुलेषु च।
गुरोः कुले प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा॥
ब्रह्मचर्य्यमधः शय्या तथा वह्नेरुपासना।
उदकुम्भान् गुरोर्दद्याद् गोग्रासञ्चेन्धनानि च॥
कुर्य्यादध्ययनञ्चैव ब्रह्मचारी यथाविधि।
विधिं त्यक्त्वा प्रकुर्वाणो न स्वाध्यायफलं लभेत्॥
यः कश्चित् कुरुते धर्मं विधिं हित्वा दुरात्मवान्।
न तत्फलमवाप्नोति कुर्वाणोऽपि विधिच्युतः॥
तस्माद्वेदव्रतानीह चरेत् स्वाध्यायसिद्धये।
शौचाचारमशेषन्तु शिक्षयेद् गुरुसन्निधौ॥
अजिनं दण्डकाष्ठञ्च मेखलाञ्चोपवीतकम्।
धारयेदप्रमत्तश्च ब्रह्मचारी समाहितः॥
छत्रकोपानहञ्चैव गन्धमाल्यादि वर्जयेत्।
नृत्यगीतमथालापं मैथुनञ्च विवर्जयेत्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्त्यश्वारोहणञ्चैव संत्यज्य संयतेन्द्रियः।
सन्ध्योपास्तिं प्रकुर्वीत ब्रह्मचारी व्रतस्थितः॥
अभिवाद्य गुरोः पादौ सन्ध्याकर्मावसानतः।
तथा योगं प्रकुर्वीत मातापित्रोश्च भक्तितः॥
एतेषां शासने तिष्ठेद् ब्रह्मचारी विमत्सरः।
अधीत्य च गुरोर्वेदान् वेदौ वा वेदमेव वा॥
गुरवे दक्षिणां दद्यात् संयमी ग्राममावसेत्।
इमं यो विधिमास्थाय त्यजेद्देहमतन्द्रितः।
नेह भूयोऽपि जायेत ब्रह्मचारी दृढ़व्रतः॥
यो ब्रह्मचारी विधिना समाहित-
श्चरेत् पृथिव्यां गुरुसेवने रतः।
सम्प्राप्य विद्यामतिदुर्लभां शिवां
फलञ्च तस्याः सुलभन्तु विन्दति॥" ३।१—६।८—१२।१५।१६

अस्यार्थः—द्विजबालका उपनीता गुरुकुले वासं कुर्य्युः। ब्रह्मचारिणो निम्नशय्यां विरचयेयुस्तथाग्नेरुपासनाञ्च कुर्य्युः। ते जलकुम्भाहरणं काष्ठाहरणं तथा गोग्रासदानञ्च कुर्य्युः। यथाविधि वेदाः पठनीयास्तैः, यतो विधिं त्यक्त्वा न कोऽप्यध्ययनफलं लभते। यो नरो दुःस्वभावत्वाद्विधिं विहाय वेदाध्ययनं करोति सोऽध्ययनस्य फलं लब्धुं न शक्नोति। विधिविरुद्धकर्म्मचारी जनो मङ्गलजनकपुण्यादेर्विच्युतो भवति। अतः स्वाध्यायसिद्धये वेदविहितव्रतानि कर्त्तव्यानि। गुरोरन्तिकमासाद्याशेषशौचाचारं शिक्षेत, समाहितस्तथा प्रमादरहितश्च भूत्वाजिनं दण्डकाष्ठं मेखलां यज्ञसूत्रञ्च धारयेत्। छत्रं पादुकां गन्धमाल्यादि नृत्यगीतं निरर्थकालापं तथा मैथुनञ्च यत्नेन वर्जयेत्। हस्त्यश्वारोहणं तैः सर्वथा वर्जनीयम्। सन्ध्योपासनासमापनान्ते गुरुचरणयुग्ममभिवाद्य भक्त्या पितरौ वन्दनीयौ। स मत्सररहित आचार्य्यस्य तथा पित्रोराज्ञां पालयेत्। गुरोः सकाशाद्वेदान् वेदौ वेदं वाधीत्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरवे दक्षिणां दद्यात्। ततो ग्राममावसेत्। यो हि विधिमिममास्थाय प्राणान् त्यजेत् स ब्रह्मचारी पुनर्नेह जायते। यो हि ब्रह्मचारी समाहितो विधिपूर्वकं गुरोः सेवायां नियुक्तो भूत्वा पृथिव्यां विचरति, सोऽतिदुर्लभां शुभां विद्यां तथा तस्याः सुलभं फलञ्च विन्दति। कथितञ्च विष्णुसंहितायाम्—

"पूर्वां सन्ध्यां जपेत्तिष्ठन् पश्चिमामासीनः। कालद्वयमभिषेकाग्निकर्मकरणम्॥" २८।३।४

ब्रह्मचारी दण्डायमानः सन् प्रातःसन्ध्यां तथोपविष्टः सन् सायंसन्ध्याञ्च कुर्य्यात्। कालद्वयमेव स्नानं होमञ्च कुर्य्यात्। तथा—'गुरोः पूर्वोत्थानं चरमं संवेशनम्।' २८।१३ किञ्च—गुरावुपविष्टे स्वयमुपविशेत्, दण्डायमाने गुरौ स्वयं तिष्ठेत्, गच्छन्तं गुरुमनुव्रजेत्, आगच्छन्तं गुरुं प्रेक्ष्य प्रत्युद्व्रजेत्। गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते तत्र न तिष्ठेत्। तत्रोक्तम्—

"स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥" २।१८२

ब्रह्मचारिणामन्नभोजनमधिकृत्य कथितमृषिणोशनसा—

"प्राङ्मुखोऽन्नानि भुञ्जीत दक्षिणामुख एव च।
नाद्यादुदङ्मुखो नित्यं विधिपूर्वं सनातने॥
प्रक्षाल्य पाणी पादौ च भुञ्जानो द्विरुपस्पृशेत्।
शुचौ देशे समासीनो भुक्त्वान्ते द्विरुपस्पृशेत्॥" १।६२।६३

प्रत्यहं पूर्वाभिमुखो दक्षिणाभिमुखो वा भूत्वा चिरप्रचलित-नियमानुसारेणान्नभोजनं कुर्य्यात्। उत्तराभिमुखस्तु नाद्यात्। हस्तपादं प्रक्षाल्य यथास्थाने उपविष्टो भोजनात् प्राग् द्विराचमनं, तथा भोजनान्ते द्विराचमनं कुर्य्यात्। अथाङ्गिरसा महर्षिणोक्तम्—

"सूतकेषु यदा विप्रो ब्रह्मचारी जितेन्द्रियः।
पिबेत् पानीयमज्ञानाद्भुङ्क्ते भक्तमथापि वा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080539

उच्चोर्ध्वाचम्य उदकमवतीर्य्य उपस्पृशेत् ।

एवं हि समुदाचारो वरुणेनाभिमन्त्रितः ॥"१।५८-६०

जितेन्द्रियो ब्राह्मणो ब्रह्मचारी चेदशुचि-नरस्य जलमन्नं वा भुङ्क्ते, तदा पीतं भुक्तञ्च वस्तु उच्चोर्ध्वाचमनं कृत्वा जलेऽवगाह्य वारुणमन्त्रं जप्त्वा च निजाधिकारं लभते । महर्षि-संवर्त्तनोक्तम्—'निवेद्य गुरवेऽश्नीयात् प्राङ्मुखो वाग्यतः शुचिः ।'११२ किञ्च—

"सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।

नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः ॥

आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः ।

अनाचम्य तु योऽश्नीयात् प्रायश्चित्तीयते तु सः ॥

अनाचान्तः पिबेद् यस्तु योऽपि वा भक्षयेद्द्विजः ।

गायत्र्यष्टसहस्रन्तु जपं कृत्वा विशुध्यति ॥

अकृत्वा पादशौचन्तु तिष्ठन् मुक्तशिखोऽपि वा ।

विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्द्विजः ।"१२।१५

द्विजातीनां दिवा नक्तञ्चाशनं कर्त्तव्यमन्तरा भोजनं न कार्य्यम् । भोजनात् प्राक्, तथा भोजनात् परञ्चाचमनं करणीयम् । यो द्विज आचमनमकृत्वैव अश्नीयात् स प्रायश्चित्तं कुर्य्यात् । आचमनमकृत्वा यो द्विजः पिबेद् भक्षयेद्वा सोऽष्टसहस्रं जपं कृत्वा शुद्धो भवति । पादप्रक्षालनमकृत्वा दण्डायमानो मुक्तशिखो यज्ञोपवीतं विहायाचामति यः, स कस्मिन्नपि कार्य्ये शुचिर्न भवतीति भावः ।

अस्मिन् निबन्धे मया समासतो ब्रह्मचर्य्यविषयमधिकृत्यालोचितम् । न पुनर्विस्तरतः । यथा यथा मया धर्म्मशास्त्राणि आलोच्यन्ते तथा तथा धर्म्मशास्त्रगतब्रह्मचर्य्यं मां मोहयति । परन्तु अस्य प्रबन्धस्य विस्तारभयान्नालेखि विशेषः ।

पुस्तकालय गुरुकुल कांगड़ी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं कर्त्तव्यं गैर्वाणाभिज्ञैरिदानीम्

[निबन्धकः—महोपाध्याय-श्रीकृष्णशङ्करशास्त्री]

वेदादिशास्त्रविहितकर्माचरणबद्धश्रद्धानामप्यनवरतमैहिकं स्रक्-चन्दनादिसुखमामुष्मिकं स्वर्गादिसुखं वा तृणाय मत्वा तुरीये मोक्षनामनि परमपुरुषार्थे परं मनो ददतामतिपावनचरितानां महर्षि-वर्याणां बहुलबहुलानां महात्मनां जनयित्री भारतजननी कष्टं कृपणेव विगतसंस्कारेव चात्मानं बहिः प्रकटयितुमप्रगल्भा किञ्चिदिव शोकोपहतचेतना समालक्ष्यते। आन्वीक्षिक्यादिविद्यापारगैर्नीति-शास्त्रविशारदैर्लब्धविविधदेशभाषाचारविषयक-विज्ञानैर्मन्त्रिवर्य्यैर्निष्पक्ष-पातमुपदिष्टेन सार्वभौमेण राजन्वती पुनरियं पुराणवसुधा केनापि कारणेनावशेव क्षुधादिपीड़या संरब्धेव भूतावेशवशात् कोपाविष्टे-वाकृत्यदर्शनान्मूर्च्छितेव पातित्यहेतोः स्वब्धेरातर्कितोपनतादनिष्टा-द्दीनेव च शरणान्तराभावाश्च केवलं भारतीयानां किन्तु समेषामपि देशान्तरीयाणां चिन्तकानां मनांसि बहुधा सन्तापयति। वेदा-पौरुषेयत्वनिरासकान्यत एव श्रुतेरनित्यतासमर्थनपर्यवसायीन्यत एव च कृतजैमिनीयतन्त्रसिद्धान्तखण्डनानि कुयुक्तिप्रयुक्तानि चार्वाक-वादसहोदराणि कु-शेमुषीविलसितानि शिष्टानपि कर्मिण आचार-विमुखान् कुर्वन्ति। कति कति सन्ति तादृशा भारते लब्धजन्मानः स्वभाषाराज्यजनाभिमानरहिता मानुषापसदाः, ये हि नास्तिकभाषि-तानि वेदवाक्यानीवानुपूर्वीविशिष्टं मनसि धारयन्तः, वेदवाक्यान्यपि पौरुषेयत्वात् स्खलितप्रचुराण्युच्चाशयशून्यानि वृथा गणयन्तः, शिष्टान् कर्मिणो वेदाभ्यासजड़ा इति भर्त्सयन्तो जनन्या वसुधाया महान्तं क्लेशजातं वर्धयन्तश्च हन्त ! सन्ततमन्तःसारशून्या दूषयन्ति परुष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मलिनवाक्यजालैर्मनांसि सुपथगामिनामपि; उत्पादयन्ति च शल्यं मनस्विनामपि।

अयं हि समुचितः काल उपदेशस्य पण्डितचिन्तकानां सतां संस्कृतसाहित्यपरिषत्सभ्यपदभाजाम्। पथानेन गमने ह्ययं दोषः समुदियात्तस्मादमुकेन पथा पदं गमनं श्रेयसे इति समुपदिश्यन्ते युवानोऽनुकरणभ्रान्तचित्तास्तर्ह्येव स्यान्मन्यामहे समुद्बोधः प्राक्तनस्य भारतीयसंस्कारस्य।

बहुसमादेव कालात्सर्वतो भारतं लब्धप्रचाराया अनादि-निधनाया वैदिक-लौकिक-भेदेन द्विधा विभक्तायाः सुरभारत्याः समुचितं पोषणं विना को नामाभ्युपायो भारताभ्युद्धरणस्य। आसेतु-हिमालयं विविधाभिर्भाषाभिर्वेषादिभिराचारैश्चात्यन्तं भिन्नानामखिलानामपि जनानामभ्युदयाधारभूत-तत्त्वसंरक्षणमेव प्रथमकर्त्तव्यं देशाभिमानपरिपूरितान्तरङ्गाणामित्यत्र नास्ति विस्मयलेशोऽपि; तत्तद्देशेषु कोणे कस्मिंश्चित् केषाञ्चित्पण्डितानां समवायेन परं न तादृशं किमपि कर्त्तुं शक्यते, यद्धि भारतीयेष्वेकैकस्यापि चित्तं स्वकीयसंस्कारोद्बोधविजृम्भितं कुर्यात्। 'कलौ संख्याबलं बल'मिति भणितिर्हि सर्वत्रापि संख्याबलाधिक्य एव विजयसिद्धिं संसूचयति। स्थितावेतादृश्यां किमिति पण्डितैरौदासीन्येन कालो नीयते, किमिति च देवभाषाभिमानिभिर्जोषमेव आस्थीयते? बहवः किल पाषण्डाः संस्कृतकान्तारं दुर्गममपि महता प्रयासेन प्रविश्य तस्मात् सारभूतं सर्वं गृहीत्वा वञ्चयन्त्यविज्ञातलोकवृत्तान्तान्। इदानीमेकमेवास्ते कर्त्तव्यं, येन क्रमेण सुरभारत्यास्तथा च भारतजनन्यास्तत्सन्तानानाञ्च मङ्गलावाप्तिर्नातिदूरे भाविनी। तत्तु कर्त्तव्यं—'संस्कृतविश्वविद्यालय (Sanskrit University) स्थापनं नाम। सत्यं सन्ति बहूनि संस्कृतविद्यामन्दिराणि (Sanskrit Colleges) कलिकातायां, वाराणस्यां, गोश्रीवर्धमानपुरादिसामन्तराज्येषु चोत्तरोत्तरमभिवृद्धि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाञ्जि। तथापि विश्वविद्यालयस्यैकस्यात्यभावो महतामुपजनयति सन्तापं पण्डितानाम्। केन पुनरङ्गेन हीना पावनपुण्यप्रथा गैर्वाणी। अतिगहनानि विचारशक्त्युत्पादकानि शास्त्ररत्नान्यज्ञानतमोनिवारकाणि विलसन्ति तस्याम्। सहृदयमनोरञ्जकानि सकललोकसमादृतानि वर्त्तन्ते काव्यानि परःशतानि। आयुर्दैर्घ्यसम्पादनमार्गोपदेशपराणि सुखजीवितमधिकृत्य सुष्टूपदिशन्ति सन्त्यायुर्वेदग्रन्थरत्नानि। निर्दोषं राज्यभरणक्रमं सुविशदं प्रतिपादयन्ति सन्त्यर्थशास्त्राणि नैकविधानि भूभरणधुरन्धराणां पठनाय। महाप्रासादादिनिर्मितिप्रकारोपदेशदानक्षमाणि मयमतादीनि वास्तुविद्याप्रतिपादनपराणि वर्त्तन्ते बहूनि। विशिष्य चाध्यात्मिकतत्त्वप्रकाशनतत्पराणि भाषान्तरासाधारणानि सन्ति वेदान्तनामभाञ्जि। शोचनीयमिदं, यदेतादृश्या सुरभारत्या समुचितं न लभ्यते प्रोत्साहनं प्रभुभ्यो राजभ्यो महाराजेभ्यः सम्राड्भ्यश्चेति। अतिक्रामति कालो यत्र निमेषमात्रमपि विलम्बो दोषाय, यत्परिहारो देवभाषाप्रचारणसाध्यः।

अयि भो! मान्याः संस्कृतसाहित्यपरिषत्सामाजिका अन्ये चैतनुवाचका महाभागाः! किञ्चिदिवास्मिन् विषये विचारगतिं प्रवर्त्तयन्तु संस्कृतविश्वविद्यालयस्थापनमावश्यकं न वेति।

को हि पण्डितो देशभाषाभिमानी तत्र विप्रतिपद्यते, यत्र प्रतिपत्तिप्रदर्शनेन न केवलं स्वस्य स्वजनस्य भारतस्य, किन्तु सर्वस्यापि लोकस्य कल्याणाभिवृद्धिर्हस्तगता निश्चप्रचम्। विषयं हीममधिकृत्य महतां मतानि निपुणं धीरं चेतत्पत्रिकाद्वारा यदि प्रकाश्येत, तर्हि महान् स्यादुपकारः। यथाधिषणमत्र यतितुं सर्वदा सन्नद्धा वयमिति साञ्जलिबन्धं निवेदयामः। तत्र महाभागानामाज्ञामवगन्तुकामाः प्रतिपालयामश्च।

पत्रिकापीयं सुमधुरैरेतद्विषयकैरामुखवचनैर्वाचकवृन्दानां श्रद्धामत्र समाकर्षेदिति च विश्वसिमः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवाजि-चरितम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—श्रीकालिदासविद्याविनोदः]

महामोह-हन्त्री महानन्द-दात्री
जगज्जीवसङ्घेष्वमोघासि शक्तिः ।
त्वमेवेश्वरी चिन्मयी सर्वरूपा
नमस्ते जगद्धात्रि दुर्गे भवानि ॥ १

भवानी भवानी भवानीति वाणी-
मुदारामुदारा मुदा ये जपन्ति ।
न रोगो न शोको न भीतिर्न दुःखं
कदाचित् कथञ्चित् कुतश्चिज्जनानाम् ॥ २

सदा हिन्दवो मन्त्रमेनं जपन्तो
न किं कर्म्म वा साधयन्ति स्म पूर्वम् ।
महाशक्तिमद्यास्मरन्तो वयं त्वां
पराधीनता-शृङ्खलाबद्धदेहाः ॥ ३

त्वमेवेश्वरस्य क्रियाशक्तिरूपा
विना त्वां शिवः स्याच्छवो वा न चान्यः ।
शिवाजेर्हृदि त्वं विराजस्यमोघा
समग्रस्य हिन्दोः स्थिरा मानसे स्याः ॥ ४

यथा रामचन्द्रस्तवाराध्य-पादं
समाराध्य लब्ध्वा तवैव प्रसादम् ।
महाशक्तिशाली स्वसैन्यैः समेत-
स्त्रिलोकैकवीरं दशास्यं जघान ॥ ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा देहि शक्तिं महाशक्तिरूपे
यथा म्लेच्छसैन्यान् समग्रान् हनाम ।
वयं भारते हिन्दुराज्यं विधाय
भवान्यद्य सर्वे सुखं त्वां भजामः ॥ ६

चितिस्त्वं मतिस्त्वं जगज्जीवसङ्घा-
नधिष्ठाय तिष्ठस्यमोघ-प्रभावा ।
जगत्पालकं विष्णुमाक्रम्य तिष्ठ-
न्त्यमुं नीतवत्यर्णवे गाढ़निद्राम् ॥ ७

स्तुता ब्रह्मणा त्वं विमुच्याथ विष्णुं
यथा शत्रुनाशे नियुक्तं चकर्थ ।
तथा भारतीयानिमान् गाढ़निद्रान्
प्रबोध्य स्वयं शत्रुनाशे नियुङ्क्ष्व ॥ ८

त्वमध्यात्मविद्यास्वरूपा स्थिताऽसि
पुरा भारते कर्म्मशक्तिस्त्वमासीः ।
इदानीं शिवे कर्म्मणाध्यात्मभावं
निरस्याम्बिके शत्रुनाशं विधेहि ॥ ९

त्वमेवासि दुर्गे जगद्दुःख-हन्त्री
जगत्तो बहिर्हिन्दवो भारते किम् ।
सुखी म्लेच्छसङ्घः स्वदेशे विदेशे
सदा हिन्दवो दुःखदुःखेन दग्धाः ॥ १०

अवोचस्त्वमार्य्यान् ऋषीन् पूर्वमेवं
यदा दानवाः पीड़यिष्यन्ति युष्मान् ।
तदाहं समग्रान् हनिष्यामि दैत्यान्
यथा शुम्भनाशोऽद्य दृष्टो भवद्भिः ॥ ११

तदेतत् स्वकीयं वचो रक्ष मातः
समाविर्भवन्ती भुजे सेवकानाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महादैत्यरूपानिमान् म्लेच्छसङ्घान्
निहत्याद्य वेदोक्त कर्म्माणि रक्ष ॥ १२
वयं कातरा पामरा वा भवेम
न ते वाक्यमम्ब ! क्वचिद्भावि मिथ्या ।
अतो हिन्दुराज्यं शुभं स्थास्यतीदं
न लोपं गमिष्यत्यदो हिन्दु-नाम ॥ १३
त्वमम्बप्रभृत्येव चेद् भारतेऽस्मिन्
भवानीग्टहान्तश्चिरं सुप्रसन्ना ।
विराजस्यमोघप्रभावा हि दुर्गे !
वयं म्लेच्छसैन्यान् समस्तान् जयेम ॥ १४
जयाय प्रयत्ताः स्मरन्तीह चेत्त्वां
तथा नामधेयं तवैवालपन्ति ।
विपद्विघ्नपातो न तेषां कदाचित्
कथञ्चित् कुतश्चिद् रणे दुर्गमेऽपि ॥ १५
त्वदाशीः-प्रसादं भजन्तो व्रजन्तो
लभन्ते मनस्कामनां सर्वरूपाम् ।
कियान् शत्रुनाशः कियान् राज्यलाभः
समस्ता करस्था न सम्पत् किमेषाम् ॥ १६
तदा हिन्दवः सर्व एवं विदित्वा
भवानीग्टहान्तः समेता बभूवुः ।
समासाद्य सर्वे भवानीप्रसादम्
अजेयाः सपत्नैर्बलिष्ठाश्च जाताः ॥ १७
ततो हिन्दुभिस्ते जिता म्लेच्छसैन्या
बभूवुर्विनष्टा इतो दाक्षिणात्यात् ।
तदा भारतं हिन्दुसाम्राज्यमासीद्
बलिष्ठं गरिष्ठं स्वधर्म्माढ्यमार्य्यम् ॥ १८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पराधीनता-दुःखमेवं यथा नो
भवेदम्ब भूयस्तथा त्वं विधेहि ।
यदन्यत् सुदुःखं तवास्ते स्वहस्ते
तदेवाथ दत्त्वा सुखित्वं प्रदेहि ॥ १९

इमे भारतीयाः सुताश्चेत्तवाम्ब !
त्वमेतान् विनिद्रान् न निद्रापयाद्य ।
स्वयं शाधि चास्मान् न दैत्यादिवर्गैः
पदाघातदुःखं स्वयं त्वं विधेहि ॥ २०

न शारीर-पीड़ा भवेद् दुःखदात्री
परं धर्म्म-पीड़ा न भूयान्न भूयात् ।
वयं दैत्यतो भीतभीताः समस्ताः
सदा धर्म्मनाशान्न मृत्योः कदाचित् ॥ २१

अयं स्थूलदेहः सदायाति याति
स्थिरो वा न चायं कदाचित् कथञ्चित् ।
मुनीनां नृपानाञ्च देहो न नित्य-
स्ततस्तस्य नाशे कियत्यस्ति चिन्ता ॥ २२

शुभं कर्म कृत्वा स्वधर्मे स्थितानां
भवेदूर्द्धतो ब्रह्मलोके प्रतिष्ठा ।
तदात्यन्तदुःखस्य हानिः पुमर्थो
मृतानां हि पञ्चाग्नि-विद्या-प्रसिद्धिः ॥ २३

त्वमेवासि विद्या परा मोक्षदात्री
त्वमेवापरा साङ्गवेदादिरूपा ।
त्वमेवेश्वरी भोक्तृ-शक्तिस्वरूपा
सुखं सर्वथास्मभ्यमद्य प्रदेहि ॥ २४

वयं शान्तिमादौ न याचामहे त्वां
न वा मुक्तिमध्यात्मबोधादिदानीम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनर्म्लेच्छसैन्यैरनाक्रम्यमेतद्
यथा भारतं स्यात् तथा त्वं विधेहि ॥ २५
पुनर्भारतं सामगानैरुपेतं
पुनर्यागदानक्रियाभिः समेतम् ।
पुनर्ब्रह्मचर्य्यादिसंस्था यथा स्याद्
जगन्मङ्गलाय त्वमेवं विधेहि ॥ २६
तपो-विघ्नहीनं वनं तापसानां
तपस्यन्तु विप्रा वनस्थाः समन्तात् ।
तथा क्षत्र-वैश्यौ स्वकर्म्मप्रवृत्तौ
स्वधर्म्मं भजेतां कदाचिन्न दास्यम् ॥ २७
सदा भारते वर्द्धतां ज्ञानचर्चा
सदा दानयज्ञोत्सवो हिन्दुगेहे ।
तथा धर्म्महानिः कदाचिन्न भूयात्
सदा देवताः सुप्रसन्ना भवन्तु ॥ २८
वरं देहि मातः प्रसन्ना सती त्वं
सति त्वं स्वयं भारते यत् सतीत्वम् ।
प्रदर्श्याब्धिवह्नेऽग्निचयो यच्चरित्रं
लभन्तां रमण्यः यदा तत्पवित्रम् ॥ २९
इति विविधविधानैः पूजयित्वा भवानी-
मभिमतवरलाभाद् हृष्टचित्तः शिवाजिः ।
मिलितप्रकृतिपुञ्जः सिंहवत् सिंहदुर्गे
चिरमलभत सुस्थां हिन्दुसाम्राज्यलक्ष्मीम् ॥ ३०

इति पञ्चमः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजातीयकाव्यमिश्रितभेदविचारः

[निबन्धकः—विद्यामार्त्तण्डः श्रीसीतारामशास्त्री]

"सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।
अन्योऽन्ययोगादेवं स्याद्भेदसंख्या तु भूयसी ॥"

(का० प्र० उ० ५ सू० ४७)

अधुना विजातीयकाव्यमिश्रणभेदा वक्तव्याः । अर्थात् यथा ध्वन्यादिकाव्यानां शुद्धभेदाः स्वस्वसजातीयभेदैः सहैकैकस्मिन् काव्ये मिलित्वा मिश्रितभेदानुत्पादयन्ति, तथैव सर्वे ते स्वस्वविजातीयैस्तत्तत्काव्यभेदैः सह समानकाव्येषु मिश्रणं कृत्वा विविधानपूर्वापूर्वमिश्रितभेदानुत्पादयन्ति । यथा—ध्वनिना ध्वनेर्योगस्तथा मध्यमाऽवराभ्यामपि तस्य भवति । यावन्तोऽपि पूर्वोक्ताः काव्यभेदास्तेषु प्रत्येकं भेदः प्रत्येकभेदेन साकं मिश्रणं कर्त्तुं शक्नोति, मिश्रितेष्वपि मिश्रितैः सह मिश्रणेन काव्यानामनन्ता एव भेदा जायन्ते, इति संक्षिप्तोऽर्थः । एतदतिविस्तरेण काव्यभेदकथनस्य फलं तु 'एकोऽप्यर्थो नानाकविभिर्नानाकाव्यैरुच्यमानो नव नव एव प्रतिभाति, न तु चर्वितचर्वणमिव भवति' इति । तदेवं प्रपञ्चातिशयेन काव्यभेदवर्णनं कवीनां महदुपकारकं समुदेति ।

तदेवं चतुर्थपञ्चमोल्लासोक्तव्यवस्थानुसारेण—

(१) ध्वनिना ध्वनेर्योगः—"क्षणपाहुणि आदे अर०" इत्यत्र,

(२) गुणीभूतव्यङ्ग्येन ध्वनेर्योगः—"अयं स रसनोत्कर्षी०" (का० प्र० उ० ५ श्लो० ११७) इत्यत्र,

(३) एवमवरकाव्येन च ध्वनेर्योगः—"जनस्थाने भ्रान्तम्०" (का० प्र० उ० ५ श्लो०) इत्यत्रोपादेयः । इदमत्राकूतम् यथा—"अयं स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसनोत्कर्षो" इति पूर्वोक्तोदाहरणे करुणरसमादाय ध्वनित्वं, तत्रैव शृङ्गाररसस्य गौणत्वमादाय गुणीभूतव्यङ्ग्यत्वं च भवति, तथैव "जनस्थाने भ्रान्तमित्यादौ वाच्योपमामादाय अवरकाव्यत्वं व्यङ्ग्योपमामादाय च ध्वनित्वमित्युभयोः काव्ययोरेकस्मिन् पद्ये संसृष्टिरिति। यद्याशङ्कते—एक एवार्थोऽत्र व्यङ्ग्यो वाच्यश्चेति कस्तयोः संसृष्टौ प्रयोजनम्? वैचित्र्यमिति गृहाण। एवमेकस्मिन्नेव काव्ये विभिन्नबुद्ध्याश्रयणेन उत्तममध्यमाधमकाव्यत्वानि, तेषां च यथोपयोगं संसृष्टिसङ्करैर्योगा इति न सहृदयधियां किमप्यत्र दुःसम्भाव्यमिति विरमामः।

अपरश्च नायमस्माकमभिमानविषयोऽर्थो यदुपरि विजातीयकाव्ययोगे यदस्माभिरुक्तं तदविकलमेव व्याख्या-शिरसि दत्तमूलसूत्राक्षरानुरूपमेव, अपि तु पदार्थस्वाभाव्यानुरोध्येव।

किञ्च यद्यपि गोविन्दठक्कुराणां टीकाक्षराणि किञ्चित् संवदन्ति, पूर्वोक्तव्याख्यापक्षे वक्तुरभिप्रायस्तु तदनुकूलोऽन्यथा वास्तीत्यत्र सर्वथाऽपि न निश्चिनुमः। यथा—"तेन ध्वनिना गुणीभूतव्यङ्ग्येन वाच्यालङ्कारेण च ध्वनेर्योगः" इति तदीयपङ्क्तिः। अत्र 'ध्वनिना' गुणीभूतव्यङ्ग्येन' इति तृतीयान्तपदद्वयेन सजातीयविजातीयकाव्यद्वययोगे सिद्धे वाच्यालङ्कारेण चेति चोपपदेन वाच्यालङ्कारशब्देन परिशेषादवरकाव्यसंग्रहमपहाय गत्यन्तरविरहान्नार्थान्तरमवलम्बितुं शक्यत इति प्रवचनविदामेव ध्येयम्।

न च 'वाच्यालङ्कारेण' इति पदं 'गुणीभूतव्यङ्ग्ये' इत्यत्र विशेषणं, चशब्दस्तु ध्वनिसमुच्चायक इति नात्रैतत्पदस्यावरकाव्यपरत्वमिति वाच्यम्। वाच्यालङ्कारभिन्नानां गुणीभूतव्यङ्ग्यानां सजातीयसङ्कीर्णभेदेषूपयोगेऽपि विजातीयसंकीर्णभेदप्रपञ्चे परित्यागे कारणानुपलम्भात्। (सजातीयसङ्कीर्णभेदेषु वाच्यालङ्कारभिन्ना अभ्युपादीयन्ते, इदानीं तु विजातीयसङ्कीर्णभेदप्रपञ्चे ते परित्यज्यन्त इत्यत्र कारणं न पश्याम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति भावः। सजातीयसङ्कीर्णभेदेषु येषामेव चमत्कारजनकत्वं त एवेदानीं न चमत्कारं जनयिष्यन्तीत्याश्चर्यमित्याकूतम्।)

न च वाच्यालङ्कारत्वेन वस्तुव्यङ्ग्यालङ्कारवद्भेदानामेव व्यावृत्तौ तात्पर्यं, न तु तद्रहित-यावद्भेदानामिति वक्तव्यम्। वस्तुव्यङ्ग्यालङ्काराणां गुणीभावासम्भवेन गुणीभूतव्यङ्ग्यपदेन हेयार्थस्य परित्यागेन तादृशविशेषणस्य वैयर्थ्यापत्तेः।

सूत्रार्थनिरूपणोपयोगि-व्यङ्ग्यार्थप्रपञ्चः।

व्यङ्ग्योऽर्थस्तावत्सप्तविधः—(१) रसादिरूपः (अलक्ष्यक्रमः) (२) वस्तुव्यङ्ग्यो वस्तुरूपः (३) शब्दव्यङ्ग्यो वस्तुरूपः (४) अलङ्कारव्यङ्ग्यो वस्तुरूपः (५) वस्तुव्यङ्ग्योऽलङ्कारः (६) शब्दव्यङ्ग्योऽलङ्कारः (७) अलङ्कारव्यङ्ग्योऽलङ्कारश्चेति। तत्रैते सर्वेऽपि एकपञ्चाशत्संख्याकेषु ध्वनिभेदेष्वन्वीक्षणीयाः। यथा—प्रथमो रसादिरूपो व्यङ्ग्यः पञ्चमभेदमारभ्य दशमभेदपर्यन्तेषु षट्सु भेदेषु, द्वितीयो वस्तुव्यङ्ग्यो वस्तुरूपो ध्वनिः पञ्चदशभेदमारभ्य सप्तदशभेदपर्यन्तेषु सप्तविंशमारभ्यैकोनत्रिंशपर्यन्तेषु एकोनचत्वारिंशमारभ्यैकचत्वारिंशपर्यन्तेषु च नवसु भेदेषु, शब्दव्यङ्ग्यो वस्तुरूपस्तृतीयः प्रथममारभ्य चतुर्थपर्यन्तेषु एकादशद्वादशयोश्च षट्सु भेदेषु, चतुर्थोऽलङ्कारव्यङ्ग्यो वस्तुरूपो ध्वनिरेकविंशमारभ्य त्रयोविंशपर्यन्तेषु त्रयस्त्रिंशमारभ्य पञ्चत्रिंशपर्यन्तेषु पञ्चचत्वारिंशमारभ्य सप्तचत्वारिंशपर्यन्तेषु च नवसु भेदेषु, पञ्चमो वस्तुव्यङ्ग्यालङ्कारोऽष्टादशभेदमारभ्य विंशतितमभेदपर्यन्तेषु त्रिंशत्तमभेदमारभ्य द्वात्रिंशत्तमभेदपर्य्यन्तेषु द्वाचत्वारिंशभेदमारभ्य चतुश्चत्वारिंशभेदपर्यन्तेषु एकपञ्चाशत्तमे च दशसु भेदेषु, षष्ठः शब्दव्यङ्ग्योऽलङ्कारस्त्रयोदशचतुर्दशयोर्द्वयोः, सप्तमोऽलङ्कारव्यङ्ग्योऽलङ्कारश्च चतुर्विंशभेदमारभ्य षड्विंशभेदपर्यन्तेषु षट्त्रिंशत्तममारभ्याष्टत्रिंशत्तमभेदपर्यन्तेषु अष्टचत्वारिंशभेदमारभ्य पञ्चाशत्तमभेदपर्यन्तेषु च नवसु भेदेषु वर्त्तन्ते इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं यावन्त्यपि ध्वनिगुणीभूतव्यङ्ग्यकाव्यानि, तदीयानि संकीर्णान्यसङ्कीर्णानि च प्रभेद-काव्यानि एतैरेव व्यङ्ग्यभेदैराकलितानि यथायथं विवेक्तव्यानि, द्रष्टव्यानि च। इह वस्तुव्यङ्ग्यालङ्कारेषु नागेशमतानुसारेण शब्दार्थोभयशक्तिमूलमेकपञ्चाशत्तमभेदमादाय ते (वस्तुव्यङ्ग्यालङ्काराः) दशैव परिगणितास्तेन एकचत्वारिंशद्भेदा गुणीभूतव्यङ्ग्यानाम्। इतरेषां नये तु द्वाचत्वारिंशदेव भेदा इति मन्तव्यम्। "वस्तुनाऽलङ्कार एवात्र व्यङ्ग्यो भवति नार्थशक्तिमूल इव वस्त्वपि" इतीह नागेशमतम्।

सूत्रार्थः—

इह विजातीयकाव्यमिश्रणप्रस्तावे यावद्भिरपि गुणीभूतव्यङ्ग्यैः सह ध्वनेर्योगः, इति मतिमाश्रित्य तावत् सूत्रार्थौ विविच्यते।

सूत्रम्—"सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः।" इति

वृत्तिः—'तैरेव अलङ्कारैरलङ्कारयुक्तैश्च तैः' इति।

(क) तत्र सालङ्कारैरिति आवृत्त्या एकशेषेण वा द्विः पठ्यते, सालङ्कारैः सालङ्कारैरिति। तत्र च प्रथमपदमादाय तैरेवालङ्कारैरित्यर्थः, द्वितीयपदावलम्बनेन च अलङ्कारयुक्तैश्च तैरित्यर्थौ वृत्तौ कृतः। तत्र द्वावलङ्कारशब्दौ, एकश्च तच्छब्दः। तदिह प्रथमालङ्कारशब्देन रसादिरूपालङ्काराणां, द्वितीयालङ्कारशब्देन शब्दव्यङ्ग्यालङ्कारस्य अलङ्कारव्यङ्ग्यालङ्कारस्य च ग्रहणम्। एवं तच्छब्देन अवशिष्टानां शब्दवस्त्वलङ्कारव्यङ्ग्यवस्तूनां परिग्रहः। तथा च त्रिभिः शब्दैः पूर्वोक्तरीत्या द्वाचत्वारिंशद्भेदानां गुणीभूतव्यङ्ग्यानां संग्रहो नवानाञ्च ध्वनिमात्रविषयाणां वस्तुव्यङ्ग्यालङ्काराणां वर्जनं सम्पद्यते। विनैव गुणीभूतव्यङ्ग्यशब्देन विशेषणमाहात्म्येन उपादेयोपादानेन वर्ज्यवर्जनेन च तदर्थौ (गुणीभूतव्यङ्ग्यशब्दार्थौ) ऽवसितौ भवतीति तटस्थलक्षणया ध्वनौ योगार्थं गुणीभूतव्यङ्ग्यकाव्यस्य बोध इति सूत्रकारस्य रचनापाण्डित्यं वा "सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सहजभेदैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वैः" इति ध्वनिकारशब्दानुसरणं वा अन्यद्वेति सुधीभिराकलनीयम्। मिश्रणं च ध्वनिगुणीभूतव्यङ्ग्ययोः संसृष्टिसङ्करैश्चतुर्भिः प्रकारैर्भवतीत्यत्र न किञ्चिद्वक्तव्यमस्ति।

(ख) अथ सूत्रावलम्बनीभूतध्वनिवाक्यस्य कथञ्चित्(१) नागेशकृतव्याख्यायाश्च संवादेन गुणीभूतव्यङ्ग्यविशेषैरेव ध्वनेर्योग इत्यभिप्रायेण व्याख्यानम्—तत्र सूत्रं तदीया वृत्तिश्च पूर्वं प्रादर्शिषातां, ध्वनिकारवाक्यन्तु—

"स-गुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा" ॥ इति।

तत्रैतस्मिन् ध्वनिवाक्ये तावद् गुणीभूतव्यङ्ग्यैरिति प्रधानं पदं कण्ठोक्तमेव, प्रकृत मम्मटसूत्रे तत्स्थानं तैरिति सर्वनाम्नाऽऽकलितम्। सालङ्कारैरिति पदमुभयत्र समानाक्षरमेव। सह प्रभेदैः स्वैरित्येष भागो विशेष्यपदार्थप्रपञ्चनमात्रपरत्वेन नातिरिक्तं कञ्चिद्विशेषमाधत्ते विजातीयसंमिश्रणविचारे। अन्यदपि यत्किञ्चिदुभयोः समानमेवार्थतः। एवं चकारोऽपि प्रकृतसूत्रस्यः 'ध्वनिना ध्वनेर्योगः, तैश्च पूर्वोक्तैः गुणीभूतव्यङ्ग्यैर्ध्वनेर्योगः' इति पूर्वोक्तमेव स्मारयति, न त्वर्थान्तरं वदति। तदित्थमाश्रयाश्रितयोरुभयोरपि वाक्ययोः सम्यक्शब्दार्थोत्तोलने जाते किं पर्यवस्यतीति समीचीनावधानेन द्रष्टव्यम्।

यथा—अवलम्बनीयवाक्ये तावद् योजनाद्वयं प्रतिभाति—

पुनरपि पुनश्च स ध्वनिः स्वैः प्रभेदैः सह सालङ्कारैर्गुणीभूतव्यङ्ग्यैः सङ्करसंसृष्टिभ्यां बहुधोद्द्योतते आविर्भवतीत्येका।

अपरा च सालङ्कारैः स्वैः प्रभेदैः सह गुणीभूतव्यङ्ग्यैर्बहुधोद्द्योतत इति।

---

(१) 'अलङ्कारयुक्तैश्च तैरि'त्यत्र तैरित्यनेन वस्तुमात्ररूपगुणीभूतव्यङ्ग्यैरित्यर्थो गृहीतो नागेशेः, स तु ध्वनिकारवाक्यासहकारित्वात्त्यज्यत इति कथञ्चित्पदस्वारस्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोभयोर्योजनयोर्मम्मटस्य प्रथम एवाग्रह इति सुस्पष्टमेव, अन्यथा प्रभेदैरित्यादिना सह सालङ्कारैरित्यस्यापि परित्याग एव तत्सूत्र अभविष्यत्।

किञ्च स्वप्रभेदेषु सालङ्कारत्वविशेषणे कृते स्वैः प्रभेदैः सहेति तृतीयायाः "सहयुक्तेऽप्रधाने" इति पाणिन्यनुशासनवशादप्रामाण्य-सूचकत्वेन 'ध्वनौ गुणीभूतव्यङ्ग्यानां स्वातन्त्र्येण योगः, तैश्च सह अप्रधानानां सालङ्कारस्वप्रभेदानामपि योग इत्यर्थावसितौ ध्वनि-वाक्यीयस्य महतो भागस्य प्रधानीभूतार्थान्तर्भावेण वैयर्थ्यमेवापद्येत। अत एव मम्मटैः स्वैः प्रभेदैरित्यस्य त्यागेऽपि सालङ्कारैरित्युपादायि। तस्मादग्रिमैव योजना संवादिनी सर्वैरपि व्याख्यानकुशलैरास्थेयेति नासम्भावनीयमतितराम्।

एवञ्च सालङ्कारत्वस्य गुणीभूतव्यङ्ग्येषु विशेषणत्वेन ध्वनौ विजा-तीय-संमिश्रणे निरलङ्काराणां गुणीभूतव्यङ्ग्यानां व्यावृत्तिरेव परिणता-ऽवशिष्यते। तत्रापि 'अलङ्कारयुक्तैश्च तैः' इत्यत्र नागेशादिमतेन वाच्यालङ्कारपरिग्रहे द्वाचत्वारिंशद्भेदेषु सर्वात्मनाऽपि समासतश्चतु-र्विंशतिभेदानामेव मिश्रणमायाति। चत्वारोऽविवक्षितवाच्याश्चत्वारः शब्दशक्तिमूला नव वस्तुव्यङ्ग्यवस्त्वेव एकश्चोभयशक्तिमूलः सङ्कलनया-ऽष्टादशभेदा वाच्यालङ्कारहीनाः परित्यज्यन्त एव। इति निष्पन्नं सर्वप्रधानाचार्यवाक्यानामेकवाक्यतया गुणीभूतव्यङ्ग्यविशेषैरेव ध्वने-र्योग इति।

इदं चात्र चिन्त्यं काव्यानां भूयस्त्वं कामयमानानां विदुषां, यदनयोः कोऽर्थ उपादेयः—सर्वैर्वा गुणीभूतव्यङ्ग्यैर्ध्वनेर्योगः, कैश्चिदेव वेति।

यद्यत्र कैश्चिदेवेति वदामः, किं कारणं केषांचित्परित्यागे? अ-चमत्कारित्वमिति चेत्, ये पुनर्ध्वनौ ध्वनित्वमुपगता गुणत्वावस्थायां च गुणीभूतव्यङ्ग्यत्वप्राप्ताः सजातीयमिश्रणे चैवं चमत्कारवशादुपयुक्ताः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीं तु भूयस्त्वकामनायामपि विजातीयसंमिश्रणे न चमत्कारिण इति महतो विनष्टिः ।

तस्मात्प्रथममेव व्याख्यानमस्माकं सम्मतम् । भवेच्चेदपि परेषां वर्त्तमानानां विदुषामिति सम्प्रति विरमामस्तावत्साहित्यशास्त्रविदां मतश्रवणश्रवणाः । श्रीं तत्सत् ।

भैमीवरुणदूतीसंवादः *

[निबन्धकः—योगीन्द्रनाथविद्याचुञ्चुः]

भैमी—का त्वं मध्यवयाः सुनिर्मलतरस्निग्धोज्ज्वलप्रेक्षणे
कस्माद्वा पुररक्षि-रक्षितमिदं गेहं गता निर्भयम् ।
दूती—स्वीकृत्यामरदौत्यकार्य्यमधुना दृश्यत्वमाप्ता वरात्
कन्यान्तःपुरमागतास्मि सुरमे त्वं काग्रतः कथ्यताम् ॥१
भै—मां जानीहि सुतां नृपस्य दमयन्त्याख्यां व्रतालम्बिनी-
मुद्देश्यं तव किं पदाम्बुजरजःपातस्य मे कुट्टिमे ।
दू—दिक्पातुर्वरुणात्त्वदीयनिलयं प्राप्तास्मि चन्द्रानने
सन्दिष्टं त्वयि यत्तवैव सविधे वक्तव्यमेतच्छृणु ॥२
भै—सौभाग्यं मम पूर्वपूरुषतपःसूतं सुरानुग्रहात्
सुव्यक्तं परिलक्षितं तदधुना सन्देशवार्त्तां वद ।
दू—यः पाशी दिगधीश्वरस्तव कथां वावद्यते केवलं
त्यक्ताहारसुषुप्तिरेष भजते रिक्तास्पदं चिन्तितः ॥३
भै—पूर्वं वा ननु साम्प्रतं किमपि मे नानुष्ठितं विप्रियं
प्रेष्ठं वा सलिलेश्वरस्य तदहो मच्चिन्तने का रतिः ।

* प्रकाशकः—श्रीहरिपदभारतीभट्टाचार्य्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दू—श्रुत्वा ते सुरराजरञ्जितसभास्थल्यामशेषान् गुणान्
रूपञ्चाप्रतिमं बिभर्त्ति हृदयेऽशान्तिं मनोजोदयात् ॥४

भै—वाताधिक्यवशात् किमेष वरुणो जातः प्रमत्तोऽधुना
वार्द्धक्ये पुनरेव यौवनवती-पाणिग्रहं वाञ्छति ।

दू—भोगाशा न कदापि शाम्यति शुभे भोगैः पुनर्वर्द्धते
यज्ञादौ त्रिदशैः पयोदधिघृतं तेजःप्रदं भुज्यते ॥५

भै—देवेभ्योऽधिकसद्गुणैर्नरकुलं प्रायेण धर्म्मक्रियं
वानप्रस्थ्यमुरीकरोति बहुशः पञ्चाशता वत्सरैः ।

दू—एभिः किं विफलैर्वचोभिरिह मे दूत्याः समालोचितैः
सन्दिष्टे विषये कुरुष्व ललिते चित्तं प्रतिष्ठापितम् ॥६

भै—सिद्धान्तं गतमेव दार्ढ्यमचिरात् चेत्ते मदीयात्मनि
मूलं प्लक्षतरोर्यथाद्रिशिखरे नोन्मूल्यते केनचित् ।

दू—त्वं बाला परिलक्ष्यसे वपुषि ते कौमारबाल्यध्वजा
तारुण्यं नहि तत्कथं प्रभवति स्वार्थावबोधो हृदि ॥७

भै—नो मन्ये वरुणस्य तेऽसमशरम्लानस्य बालां प्रति
दूतीप्रेरणकार्य्यमार्य्यमधुना बालः स एव स्फुटम् ।

दू—यः कन्दर्पशरैरलौह-घटितैर्वृद्धोऽपि मर्माहतः
प्राज्ञश्चेत् स हि मूढ़-बालक इवाकार्य्यं तनोति स्वयम् ॥८

भै—वाढ़ं ते वचनं यथैव न तथा कार्य्यं मया लक्ष्यते
मां बालामवलोक्य केन विविधं दौत्योचितं जल्पसि ।

दू—सोऽस्माकं प्रभुरप्पतिर्वयमलं वश्या भजामः कृपां
जीवामः कथमेव चेत् क्षणमिह प्रोल्लङ्घ्यते तद्वचः ॥९

भै—तादृङ् मे प्रभुरस्ति तस्य वशगा सर्वात्मनाहं सदा
यावज्जीवमियं विधास्यति गिरं मौलौ प्रतिष्ठापिताम् ।

दू—यावज्जीवमहो प्रभुर्न भवति स्त्रीणां क्वचित् कश्चन
कौमारे जनकस्ततो हि दयितस्तस्मिन् मृते दारकः ॥१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भै—ग्राह्यं मध्यवयो यतस्तनुभृतामाद्यन्तकालो ह्यथा
तारुण्यं प्रकटीकरोति क्षतितां धर्म्यं प्रबोधं बलम् ।
दू—यात्वेतद् विफलैः कृतं हि गदितैर्वाग्जालपुष्टैर्हितं
श्रोतव्यं यदि तच्छृणु प्रियवचो नोपेक्ष्यतां दिक्पतिः ॥११
भै—सत्यं तच्चिरसिद्धमेव वचनं यादृक् प्रभू राजते
तद्भृत्यादर एव तादृशगुणाचारा भवन्तीह यत् ।
दू—केनास्मि प्रसदे गुणेन पयसां भर्त्तुः समालिङ्गिता
यत्त्वं मां दयिते सुरम्यवचनैः प्रीणासि सद्योऽतिथिम् ॥१२
भै—प्राग् दौत्यं कथितं ममैव पुरतो यतस्तदर्थं कृत-
स्यातिथ्यं कथमुच्यते तव गिरा कापट्यमुज्जृम्भितम् ।
दू—हृद्भावः स्फुरुचे सुधीभिरनिशं सम्पोष्यते केवलं
गौणीभूतमिदं त्वयात्र निपुणं निर्द्धार्य्यतामन्तिमम् ॥१३
भै—किं पक्षद्वयसंश्रयेण मनसा लोकः प्रतिष्ठाप्यतां
दूतीभिर्न हि लभ्यतेऽतिथिसमा पूजा गृहस्थाङ्गणे ।
दू—दौत्ये कर्म्मणि योजिता क्व नु सती साफल्यलाभार्थिनी
दक्षा स्याऽदविरोधिवाक्यकथने स्वल्पाक्षरे कामिनी ॥१४
भै—मादृक् का तरुणी भवादृशगिरं मन्येत साधूक्तये-
र्या साध्वीं सरणीं समाश्रितवती जित्वा हि कामं रिपुम् ।
दू—मन्ये ते रुचिभेदकारणतया द्राक्षापि निम्बायते
या माला सुरवृक्षपुष्परचिता नागायते साधुना ॥१५
भै—धातास्मिन् भजते प्रतीपनयने निन्दार्हतां नापरो
जीवानां विदधाति मानसगतिं बोधं प्रभिन्नां रुचिम् ।
दू—नैकः स्यादपराधभाक् खलु विधिविज्ञत्वकीर्त्याश्रितः
संस्कारो दृढ़तां प्रयाति सुहृदां सङ्गे च शिक्षागमे ॥१६
भै—व्याघ्रश्चेत्परिवर्द्धितो ननु भवेदश्वादिभिस्तद्गृहे
त्यक्त्वा किं पिशितप्रियत्वमचिरादश्नाति पत्रं तृणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दू—व्याघ्राश्वैः किमिवास्ति मे फलमहो पत्रैस्तृणैर्वा शुभे
यत्कार्य्यार्थमहं समागतवती तच्चिन्तनं मे तपः ॥१७
भै—यं चित्ते विनिवेश्य मुद्रितदृशा नीरन्ध्रचिन्तान्विता
हित्वा तत्कथनप्रसङ्गमपरं काङ्क्षामि नो शर्म्मदम् ।
दू—पाशी चेत् परिणीयते जलपतिः स्वर्गः करस्थो भवेत्
तद्दर्णत्रयमेव तुल्यमनिशं सेविष्यते त्वत्पदम् ॥१८
भै—पाशित्वेन विभीषिका जड़पति-प्रोक्त्या च मूढ़ेशता
चाव्यक्तं समुदीरितं सुनिपुणे 'ड'त्वस्य 'ल'त्वागमात् ।
दू—त्वं कन्या नृपतेः सुशिक्षितमतिर्जय्या न माहृग्जनैः
कल्याणं भवताच्चिराय दिश मां गन्तुं स्वदेशं शुभे ॥१९

स्वर्भानुनाक्रान्तनिशेशमन्दभा-
मुखश्रिया सा वरुणस्य दूतिका ।
भीमात्मजा-तर्कजित-स्वगौरवा
ततः प्रतस्थे प्रभुणाश्रितां पुरीम् ॥२०

परिषत्सन्देशः

'पत्रा'ध्यक्षाणामध्वसङ्कटः—सभाजनीयाः पाठकसमाज-पतयः ! अद्यास्मिन् नववर्षप्रारम्भे सम्भूतं सम्भवत् सम्भविष्यच्च किञ्चिद्दौर्बल्यमस्मदीयमुपादीयते पुरतः पारतन्त्र्यदुःखमनुभवतां भवताम् । यथामति प्रतीकारोऽपि ज्ञातश्चेदस्मिन्नेव पत्रे विज्ञापितः सकृतज्ञतांकं सानन्दं सश्रद्धमकालहीनमवलम्बिष्यते 'पत्र'-परिचालकैः । अद्यत्वे शक्तिमतां निबन्धलेखकानां छन्दोऽनुवर्त्तन-मन्यतमां कर्त्तव्यपदवीमध्यास्ते वार्त्तावहप्रवर्त्तकानाम् । ततश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धेयवचनानां तथाभूतानां केषाञ्चन निबन्धकर्त्तॄणामनवसित-प्रेषिता अपि निबन्धा वैयक्तिकप्रत्ययेन प्रत्ययमगत्यैव स्वीकुर्वद्भिः परिचालकैरवशेषचिह्नाङ्कितं प्रकाशयितुमारभ्यन्ते। ततश्च निबन्धक-बन्धु-महत्तमानां तेषामात्मकर्म्मबाहुल्येन वा, गौरवबोधविरहाद् वा अज्ञातकरणान्तराद् वा सनिर्बन्धं सानुनयं सानिष्टशङ्कं लिपितो लिप्यन्तरं प्रेषयद्भिरपि नैवासाद्यन्ते तदन्तिमांशाः प्रकाशयितुम्। ततश्च क्रमशः-प्रकाश्यनिबन्धैरपि प्रतिसङ्ख्यिकमस्माभिर्न प्रार्थ्यते पत्रिकामिमामलंकर्त्तुम्।

इत्थञ्च व्यापारव्यतिकरे यद्यस्माभिरादावेवानवसितास्तथाविधा निबन्धा न प्रकाश्येरन्निति ते विज्ञाप्यन्ते, यदि वा प्रकाश्यमानाश्च प्रतिसङ्ख्यिकमलब्धा निबन्धा नैव समाद्रियन्ते, तदा झटित्येव ते विमनायेरन्। विरक्तेभ्यस्तेभ्यः पुनर्निबन्धावाप्तिर्दूरपराहतेत्युभयतः-पाशा रज्जुः कथङ्कारमवमुच्यतामामुच्यतां वा प्राच्यदेशवासिभिः पत्रिकापरिचालकैरिति। एवमेव केचिन्निबन्धा एकसङ्ख्यिकं द्विसङ्ख्यिकं वा प्रकाशितात्मानोऽकाल एव समाधिमधिगच्छन्तः समुद्वेजयन्ति भवतः पाठकमहाभागान्, तेन च क्षेपयन्त्यस्मानपि सुधीसमाजेष्विति शम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्थाः

		मूल्यम्			
२।	कालीतन्त्रम्—सटीकानुवादम्	साधारणानाम्	॥/०)	सदस्यानाम्	॥०)
३।	शङ्करीसङ्गीतम्	,,	।/०)	,,	।/०)
४।	मुक्तिवादः—गदाधर-भट्टाचार्य्यविरचित, सटीकाद्वय-भाष्यानुवादसहितः	,,	२)	,,	१॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीय-दुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,,	) ।०	,,	))
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा		१।०)	,,	१)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,,	।०)	,,	।/०
८।	कारकोल्लासः—भरत-मल्लिककृतः, सोदाहरण-कारकनिर्णयरूपः		/०)	,,	/०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गल-भाषाटिप्पणसमेता		॥।०)	,,	॥/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,,	।/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थः	,,	१।०)	,,	१)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,	।/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्,,		॥।०)	,,	॥/०)
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्)	साधारणानाम्		सदस्यानाम्	
	श्रीकालीपद-तर्काचार्य्यकृतम्	,,	१।०)	,,	१)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्		२)	,,	१॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य-कृतम्, विष्णोः रथयात्रादि द्वादशयात्रापद्धति-रूपम्		।)	,,	।/०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्		२।०	,,	२)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थः		१।०	,,	१)

देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा बङ्गाक्षरमुद्रितनामानि बङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कृष्णनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समञ्जसा—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। उद्वाहतत्त्वम्—रघुनन्दन भट्टाचार्य्यकृतम्।

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
22, Sukea Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

१८५१ शकीये ज्यैष्ठ — १२श-वर्षस्य २य-संख्या

June, 1929.] — [Vol. XII, No. 2.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

संस्कृत सा० प०
१० (२)
गुरुकुल ग्रन्थालय कांगड़ी

भारते भातु भारती

सम्पादकः—श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकः—श्रीदुर्गामोहन-भट्टाचार्य्यः, एम्. ए.

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7 s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরঞ্জন তৈল

এই আসমুদ্র ভারতের সর্ব্বত্র
কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য
ানকালে কেশরঞ্জন মাথায় মাখিলে
মস্ত দিনটী চিত্ত প্রফুল্ল থাকে ; কেশ
ঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা
াথা ঘোরা, অনিদ্রা, মন হু হু করা
প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের
াজা মহারাজ হইতে সামান্য গৃহস্থ-
েহেও কেশরঞ্জনের সমাদর। আপনিও
্যবহার করুন। মূল্য—প্রতিশিশি
কটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, ্জীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন ায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদগার, হিক্কা, আধ্মান পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত ইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ ন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। ক শিশির মূল্য ১৲ টাকা, মাশুলাদি ।/০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। াতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ই কখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের ্দান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, ্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং ্তীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে ল্য ২৸০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড
১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

June, 1929.	१८५१ शकीये ज्यैष्ठे १२श-वर्षस्य २य-संख्या	Vol. XII. No 2.

ईश-स्तुतिः

[निबन्धकः—श्रीरामस्वामी शास्त्री अलवरप्रान्तीयः]

हे विश्वसार ! भवसागरपारदायिन् !
भक्तार्त्तिनाश-कुशल ! भ्रमनाशकारिन् ।
सर्वेश्वराखिलहृदन्तर-वास ! शौरे !
सामुद्धर प्रखरवेग-भवप्रवाहात् ॥ १

जानामि नैव कथमच्युत ! ते कृपा स्यात्
कुत्रासि केन विधिना नयनाध्वनि स्याः ।
किं ते स्वरूपमपि येन समस्तविश्वं
व्याप्नोषि शिक्षणकृतौ गुरुरेव मे त्वम् ॥ २

पार्श्वस्थवस्तुनिचया अनिशं हि देव !
स्वामि-च्युतं समवलोक्य समाक्षिपन्ति ।
मामित्यशेषभयनाशन ! नाथवृत्त्या
तान् दुर्निवारचरितान् द्रुतमुन्मथ त्वम् ॥ ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन प्रशान्तिमुपयाति चलं मनो मे
बाह्यप्रसक्तिविरतं कुरु नाथ तद् द्राक् ।
आमोद-दुःख-भय-मोह-विकारहेतु-
र्यस्मात् प्रपीडयति तद् बहुधा हरे ! माम् ॥४

संसारघोरजलधौ नरदेहनावा
संक्रीडतामतलगर्भनिमज्जनाथम् ।
वात्या नितान्तपरुषा भ्रमदा कृता स्त्री
तस्याः प्रपालय हृषीकपते ! सदा माम् ॥५

मात्रादिबन्धुविधया शुभकारिणो ये
मत्पिण्डपोषणपराः खलु संसजन्ति ।
तत्त्वार्थतस्तु सकला मम वैरभाजो
मिथ्याममत्वमतिसञ्चयकारिणस्ते ॥६

धर्मस्य स्थिरतां विधाय दुरितस्योन्मूलनात् कार्त्स्न्यतः
शान्तिस्थापकमेव सर्वजगतस्त्वां साधवो जानते ।
किन्त्वस्मिन् समये निरीक्ष्य धनिनां दुर्नीतिसम्पीडनाद्-
दीनग्लानिदशां विलुप्तचरितं मन्ये विभो ! त्वामहम् ॥७

पदविदलिताद्रोषस्फीतादहेर्भयवत्तरः
कुलिशपतनप्रोद्भूताग्नेरतीव विदाहकृत् ।
कटुविषसमाहारात् प्राणप्रणाशकृतौ कृतौ
खलजन इति त्राहि प्रेष्ठानिशं तत एव माम् ॥८

यदि कपटिनं मन्यन्ते मां जनास्तत एव च
प्रजहति सुखालापं तीव्रोपहासपरायणाः ।
जगदधिपते ! तेभ्यश्चित्तं निवर्त्तय सन्ततं
स्वपदरसिकश्चेर्ष्याहीनं विधेहि सहर्षकम् ॥९

धनचयकृतलक्ष्यप्राणिसङ्घर्षभीमे
नयकृतिकृतहेलोद्दामभूपालखिन्ने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवमतमुनिवाक्योच्छृङ्खलब्रह्मबन्धो
परमशरणमीश ! त्वं हि मेऽस्मिन् कुकाले ॥१०

क्षणध्वंसिन्यस्मिन् मरुजल-नभोहर्म्यतुलिते
महामायाशक्त्या धृतवितथरूपे सुविषमे ।
अहो ! लोकाः सर्वे धनतनयजायापरिवृता
जगत्यज्ञानान्धा जहति पितरं त्वामपि शिवम् ॥११

तेषां जनानामपनीय मोहं
स्वकीय-कारुण्य-नियोजितेन ।
शुभं विधेयं परमेश ! तूर्णं
नोपेक्षते क्वापि विभुर्दरिद्रान् ॥१२

सुभीषणं ज्ञानविवेकनाशनं
संसारचक्रानिशवर्त्तनञ्च ।
अज्ञानमात्मावरकं सकार्य्यं
विभो ! समुन्मूलय सत्वरं मे ॥१३

—-—

संस्कृताध्यापनपद्धतिः

[निबन्धकः—श्रीहरदत्तशर्मा]

समयस्य परिवर्तनशीलत्वाद् जगत्यस्मिन् सर्वेष्वपि वस्तुष्वनवरतं जायमानं परिवर्तनं दरीदृश्यते । न चैतदशुभोदर्कं, प्रत्युत कल्याणोदर्कमेव । निश्चलं प्रवाहहीनं जलमेकत्र स्थितं ध्रुवं दुर्गन्धकीटादियुक्तं सदस्वादु परिहेयं च जायते, तदेव च यदा प्रवहति तदा स्वादु ग्राह्यं च भवति । अतो वस्तुनः स्तम्भो वृद्धिरोधपरिकल्पकः । एतादृश्येव च सरणिर्दृश्यते संस्कृतभाषाध्ययनेऽध्यापने वा । काव्यनाटकादिषु, न्यायमीमांसादिषु, अथवा सर्वेष्वपि शास्त्रेषु टीकाकृदेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणम् । लौकिकश्चायमाभाणः 'टीका गुरूणां गुरुः' । फलं चैतस्य ज्ञानवृद्धे रोधः । बहोः कालात् तामिव प्राचीनपद्धतिमनुसरतां मल्लिनाथादिकृत-व्याख्यानमवलम्बमानानां चास्माकं—कविः को भावः, स च किमुपयुक्तोऽन्यथा वा, टीकाकृत् किं तदर्थप्रतिपादनसमर्थोऽसमर्थो वा, अन्येन केनापि संस्कृतकविना स्वयं वा तेनैवान्यत्र कुत्रापि तादृश एव भावः प्रतिपादितो न वा, यदि प्रतिपादितस्तर्हि कया दिशेत्यादि स्वाधीना विचारसरणिर्न लभते स्थानं संस्कृताध्ययनेऽध्यापने वा । परिणामतश्च तस्य बहुशष्टीकाकृतां ग्रन्थमूलस्य च भूयान् भेदोऽन्यथा व्याख्यानं च दृश्यते । न चैतत् स्मर्यते यत्—

'पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।'

इति कालिदासवचो न मुधा । अतो मल्लिनाथेनेत्थं व्याख्यायते, अमुको विद्वानेवं प्रतिपादितवानित्यादि न सर्वदा वेदवाक्यमिवाङ्गीकर्तव्यम् । वस्तुतो विना गुणदोषपरीक्षया, विना च सूक्ष्मविचारं न कस्यापि वचनमङ्गीकार्यं, भवतु स यादृशस्तादृशो वा महान् पण्डितः । एतदेवास्माभिरिहोदाह्रियते । माघस्य शिशुपालवधे एकादशे सर्गे प्रथमोऽयं श्लोकः—

श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः
सततमृषभहीनं भिन्नकीकृत्य षड्जम् ।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः
परिणतिमिति रात्रेर्मागधा माधवाय ॥

निशावसाने सङ्गीतकेन चारणाः श्रीकृष्णं प्रतिबोधितवन्तः, इत्ययमस्य संक्षेपतोऽर्थः । तच्च सङ्गीतं कीदृशमासीदिति मल्लिनाथः स्वव्याख्याने सर्वमाकुलीकृतवान् । अत्र खलु चरणयोः प्रथमयोः 'पञ्चमं' 'षड्जम्' इति स्वरवाचकं पदद्वयं द्वितीयान्तं दृश्यते । अतः 'श्रुतिसमधिकम्' इति पञ्चमस्य विशेषणमुत षड्जस्येति मल्लिनाथो न निश्चयमगमत्—स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेवं प्रतिपादयति—"श्रुतिसमधिकमिति षड्जविशेषणं पञ्चमविशेषणं वा, उभयोरपि तथात्वात् ।"

श्रुतयो हि नाम द्वाविंशतिः, विभक्ताश्चैवं ताः सप्तसु स्वरेषु—

"चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः ।
द्वे द्वे निषादगान्धारौ त्रींस्त्रीनृषभधैवतौ ॥"

षड्जमध्यमपञ्चमानां चतुःश्रुतित्वम्, अवशिष्टानां चैकया श्रुत्या द्वाभ्यां वा हीनत्वम् । एतदवलम्ब्यैव मल्लिनाथ उभयोः षड्ज-पञ्चमयोः श्रुतिसमधिकत्वं मन्यते । 'भिन्नकीकृत्य' इत्यस्य चार्थो मल्लिनाथमते 'तत्कालनिषिद्धस्वरासंकीर्णं कृत्वा', 'पीडयन्तः' इत्यस्य च 'परित्यजन्तः' इति । एवं तेन सर्वमाकुलीकृतम् । काव्यानुशासनकृद्धेमचन्द्राचार्यस्तु पद्यमिदं गीतिविरुद्धदोषोदाहरणत्वेनोपन्यस्तवान् । तन्मते 'पीडयन्तः' इत्यस्यार्थः 'श्रुतिह्रासेनाल्पीकुर्वन्तः', 'भिन्नकीकृत्य षड्जम्' इत्यस्य च 'भिन्नषड्जं कृत्वा' इति । भिन्नषड्जो हि षड्जोदीच्यवत्याख्याया जातेरेको रागः । 'तस्यां च पञ्चमस्य ऋषभवदसम्भव एव, दूरे पुनः श्रुतिसमधिकत्वम् । अत इदं माघकवेर्गीतिविरुद्धं पद्यम्', इति हेमचन्द्रः प्रत्याख्यातवान् ।

उभयोरप्यत्र मल्लिनाथहेमचन्द्रयोर्व्याख्यानमसाधु । तत्त्वमेतस्य हि नोभाभ्यामप्यधिगतमिति प्रतिभाति । भिन्नषड्जलक्षणं हि—

'धांशस्तु धैवतन्यासः पञ्चमर्षभवर्जितः ।
षड्जोदीच्यवतीजातेर्भिन्नषड्ज उदाहृतः ॥'

भिन्नषड्जाख्ये रागे धैवतस्यांश एव प्रयोक्तव्य इति लक्षणे स्फुटम् । स च धांशः कोमलो धैवत इत्याधुनिकैः कथ्यते । पञ्चमानन्तरं धैवतो भवतीति विश्वेषां सङ्गीतशास्त्रविदां विदितम् । वीणायास्तन्त्रीपीडनेन स्वर आधिक्यं प्रतिपादयति, नाल्पीकरणं न वा परित्यागम् । पञ्चमश्चतुःश्रुतिस्तदनन्तरो धैवतश्च त्रिश्रुतिः । यदि पञ्चमस्वरे वीणातन्त्री एकश्रुतिपर्यन्तं पीड्यते, तर्हि पञ्चमे धैवतस्यैका श्रुतिरायाति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धांशः कोमलो धैवतो वा प्रतिपद्यते। स च धांशः (कोमलो धैवतः) भिन्नषड्जस्य प्राणाः, अतः षोडनमिति सङ्गीतशास्त्रस्य पारिभाषिकः शब्दः, हिन्दीभाषायां 'सौंड़' इत्युच्यते। एवं कृते हि रागे वैलक्षण्यं प्रतिपद्यते। अतो न महाकवेः कश्चिद् दोषः, प्रत्युत टीकाकृतोः।

अपरञ्च बहुशः शब्दानामर्थकल्पनेऽन्येषां कवीनाम्, अन्यत्र वा तस्यैव कवेः समानार्थवाक्योद्धरणमतीवोपयोगि। पाश्चात्त्यैर्विद्वद्भिः—

'छाया हि भूमेः शशिनो मलत्वे-
नारोपिता शुद्धिमतः प्रजाभिः।'

इति कालिदासवचनं चन्द्रोपरागपरत्वेन व्याख्यायते। किन्तु छायाशब्दः प्रतिविम्बार्थक इति।

'छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा।' इति

'अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूमेश्च बिम्बं परे।'

इति चोद्धरणाभ्यां स्फुटम्।

एवमेवैतिहासिकीषु कथासु सूक्ष्मो विवेकोऽपेक्षणीयः। 'अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना' इत्यत्र मल्लिनाथो न्यासं काशिका-व्य-सूत्रव्याख्यानग्रन्थविशेषं ब्रूते। स्वर्गीयस्तारानाथवाचस्पतिरपि स्वरचितायां सरलाख्यायां सिद्धान्तकौमुदीव्याख्यायां काशिकाव्याख्यानकर्तारं पदमञ्जरीरचयितारं हरदत्तमेव न्यासकारं मन्यते स्म। किन्तु पदमञ्जर्यां हरदत्तेन स्वयं माघस्य त्रयः श्लोका उद्धृताः। अतोऽत्र निर्दिष्टो न्यासः पदमञ्जरीतो भिन्न इति सिद्धम्। अत्र हि मल्लिनाथात् पूर्वं भूतस्य वल्लभदेवस्य व्याख्यानमस्मान् मार्गं प्रदर्शयति। तन्मते हि काशिकावृत्तिपञ्जिकाकारो जिनेन्द्रबुद्धिपादाचार्यो न्यासकर्तात्र निर्दिष्ट इति।

अतः संस्कृताध्यापने तुलनात्मिका गवेषणा, समानार्थानां वाक्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामुदाहरणं, प्रमाणत्वेनोद्धृतानां वाक्यानां प्रभवोपलब्धिश्चेति नितरामपेक्षणीयम्। एवं कृते ग्रन्थकर्तुरभिप्रायावगमो ज्ञानगाम्भीर्यमलौकिकी व्युत्पत्तिः स्वबुद्धिबलमवनाभ्यासश्च वर्द्धन्ते। अत इयमेव सरणिः प्रतिपत्तव्येत्यस्माकं मतमिति शम्।

ग्रीष्मः

[निबन्धकः—सिद्धान्तवागीशः श्रीदशरथशास्त्री]

घर्माम्भस्तटिनीप्रचारकस्तिग्मांशूदितसूर(१)चक्रकः।
उष्णश्वासविसर्जनात्मको भीष्मो ग्रीष्म-निषाद आगतः ॥१॥
तीक्ष्णोऽस्त्रासिसुतप्रहारकैर्देहच्छेदनभेदनप्रियः।
प्रोन्नद्धोलकभीषणेक्षण आदित्योऽयमुदेति वीरवत् ॥२॥
मन्दैर्मन्दतरैर्गमागमैश्चञ्चत्पुष्टकर(२)प्रसारणैः।
कायस्पर्शनसङ्गराग्रहः शूरः(३) प्रोदयतेऽयमङ्घ्रिहा (४) ॥३॥
भूमिर्भास्करतापतापिता कासाराम्बुतिचोषणादरा।
शुष्यद्वासजटाऽस्ति रौद्रका शुष्कास्या श्रमणीव(५) मुण्डिता ॥४॥
अत्युष्णा ज्वलदग्निसन्निभा दुःस्पर्शा तवकीव(६) यात्रिणाम्।
दुर्लक्ष्या पिशिताशिनीनिभा(७) क्रूरा डाकिनिकेव भाति भूः ॥५॥
वायूद्धूतरजो-निमीलितदृष्ट्या द्रष्टुमपीष्यते नहि।
पान्थैः स्त्रीविरहाग्निभर्जितैर्भानोरातपतापिता मही ॥६॥
सूर्य्योष्मानिलशुष्कतालुवज्जीवातङ्कविनाशहेतवे।
श्रेष्ठिश्रेष्ठजनैः पुरे पुरे धार्य्यन्ते प्रतिवर्त्म सत्प्रपाः ॥७॥

---

(१) खरांशूदित-रविरेव चक्रमेवास्त्यस्य सः। (२) हस्तौ मयूखाश्च।
(३) सूर्यो भटश्चेति। सुभटे। शूरः सूर्ये च दन्त्योपीत्युष्मविवेकः।
(४) जीवनाशकः। (५) बौद्धसन्न्यासिनीव।
(६) अपूपस्याधिकायःकटाहीव। (७) राक्षसीव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पान्थैवस्तृषितः प्रतिस्थलं शीताम्बु प्रपिबन् वृषालये(१)।
सक्तून् सम्प्रभक्षयन्नधिप्रपं सौख्यं रूलभते मना(२)गिह(३) ॥८॥
आहावा(४)विजला(५) विदारकाः(६) कूपा अल्पवना(७)स्तड़ागकाः।
वाप्यः शुष्कतराश्च निम्नगाः सेव्यन्ते तृषितैः स्रुतौ(८) नहि ॥९॥
छायाधीनतया क्रमाकुलाः शुष्काः सन्नतवारि(९)जाननाः।
मूर्च्छन्तस्तृषयोच्छ्वसन्तका वातूलो(१०)त्थरजोहतेक्षणाः ॥१०॥
प्लावं प्लावमितौ(११) रता नरा घर्माम्बुस्नपिताभिविग्रहाः।
यानम्लान(१२)कलेवरा नदीः शुष्काः प्रेक्ष्य पतन्ति वर्त्मनि ॥११॥
ज्वालालीढसरोरुपादिकमस्तज्ञांसहविःसमेधितम्।
नानापादपदाहसादरं दावाग्निं परिदृश्य बिभ्यति(१३) ॥१२॥
धावन्तः परितो ह्यारयः(१४)सिंहा वानरशूकराः शिवाः।
गोधिया वृषदंशका मृगा दृश्यन्ते ज्वलदर्द्धविग्रहाः ॥१३॥
चीचीवाशिततत्पराः खगा नानारावविराविणो स्रगाः।
दृष्ट्वा प्रज्वलितं दवानलं प्रोच्चोच्चाः सकुला भ्रमन्ति हि ॥१४॥
निःसृत्योड्डयितः स्वकोटरात्त्यक्त्वा वत्सलसन्ततिं निजाम्।
धूमान्धो निजवाशितं दधद् भ्रान्त्वा पक्षिगणः पतत्यधः ॥१५॥
त्यक्त्वा स्वीयसुतं बिले जवाद्दावालीढतनुः पशुव्रजः।
विष्वग्घूर्णविरुद्धपद्धति(१५)र्भस्मीभावमुपैति सत्वरम् ॥१६॥

---

(१) घर्मालये। (२) अल्पम्। (३) ग्रीष्मे।
(४) निपानानि। चुरि इति भाषा। (५) निःशेषजलाः।
(६) कूपकाः 'चोया' इति भाषा।
(७) स्वल्पजलाः। (८) मार्गे।
(९) नीचैर्भूतानि रक्तोत्पलाकाराणि मुखानि येषां ते।
(१०) वातसमूहोत्थधूलिपटलस्तब्धनयनाः। (११) गतौ।
(१२) यानगमनेन म्लानशरीराः। (१३) नरा इत्यनुषङ्गः।
(१४) वनमहिषाः। (१५) अवरुद्धमार्गः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोऽयं रुचिराननः स्त्रियो दृष्ट्वा शीतकरैः स्वतोऽधिकम्।
लज्जाभारनताननोऽबुधः पश्चादम्बुनिधौ निमज्जति ।.३८॥

रुचिरतरकुचाभिः लुब्धवारां वगाहै-
र्मलयजनितलेपैः पुष्पशय्याधिरोहैः(१)।
तनुतरशुभवस्त्रैर्वल्लकीगानतानैः
सुखयतु शुचिरिभ्यान् (२) माधवीमिष्टपानैः ॥४०॥

ब्राह्मणानां मत्स्यभोजनस्य शास्त्रीयत्वम्

[निबन्धकः—श्रीदुर्गाप्रसन्नविद्याभूषणः]

अत्र खलु भारते वर्षे विमर्षपूर्वकमवलोकयतामस्माकं नयनपथे सततमेवेदमापतति यद्, वङ्गीया ब्राह्मणा मत्स्यरङ्गवन्नियतमेव मत्स्यानश्नन्ति नान्यदेशीया ब्राह्मणब्रुवा अपि। तद्दर्शनेन च वङ्गीयब्राह्मणाः "सात्त्विकानेव सेवेत सत्त्ववृद्धौ नरः सदा" इति शास्त्रादेशमुल्लङ्घ्य अभक्ष्यानपि मत्स्यान् भक्षयन्तः पतिता विगतब्रह्मवर्चसाश्च संवृत्ता इत्येवमाचक्षाणाः केचन विचक्षणा अस्मान् विशेषेणाधिक्षिपन्ति।

केचन वा ब्राह्मणानां मत्स्याशनं शास्त्रीयमशास्त्रीयं वेति जिज्ञासमाना मुनीनां नानामतदर्शनात् सन्देहसन्दोलितमानसा अवतिष्ठन्ते। केचन वान्यदेशीया वङ्गीयानां मत्स्याशनकथामाकर्णयन्तोऽपि सावज्ञं नासिकां सङ्कोचयन्ति। इत्येवमालोकयन्तोऽनेक एव मत्स्याशनं शास्त्रीयं वेत्यनुयुञ्जन्त्यस्मान्। तेषामेव निर्बन्धातिशय्येन प्रबन्धस्यास्य लेखने ममायमुद्यमः। न तु मत्स्यभोजनसमर्थनमेवास्य प्रबन्धस्यार्थं इत्येवं विजानन्तु सन्तः पाठकमहोदयाः।

---

(१) अधिवासैः। (२) धनिनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्ताहारलसत्कुचा शुभा नासामौक्तिकशोभितानना ।
कञ्जाक्षी तनुवस्त्रवासिता कामं(१) बोधयति धवान्तिके ॥२७॥
स्वच्छाम्भोजदलास्तृता शुभा शय्या चन्दनपङ्कजा लिपिः ।
कर्पूरागरुवासिता च्छदिश्चान्द्रीभाऽतनुबोधिका शुचौ ॥२८॥
उत्तुङ्गस्तनकुड्मलाऽबला मुक्ताहारगलाऽम्बुजानना ॥
स्वच्छाम्भोविहृतौ धवेन या रक्ता(२) सातपनाशने हिता ॥२९॥
ग्रीष्मे मारविबोधनाय काऽप्येका गानरता प्रियान्तिके ।
धीरा पञ्चमनादिनो शुभा वीणां वादयति कलध्वनिम् ॥३०॥
गन्धैर्वासितचन्द्रिका गृहे सौधे स्फाटिकसन्निभस्थले ।
साकं नूतनमानदेन हि स्मेरास्या ललना सुदीव्यति ॥३१॥
सूक्ष्माच्छांशुकदृश्यसत्कुचा सद्गन्धाञ्चितकृष्णकेशिका ।
लोलाक्षी सुकटाक्षचालनैः पुंसां दाहमपाकरोत्यलम् ॥३२॥
कञ्जाक्षी विकसन्मुखाम्बुजा कञ्जाङ्घ्री जलजन्म-सत्करा ।
वक्षाम्भोजकुचा शुभांशुका बिम्बोष्ठी क्षपयत्यलन्तपम् ॥३३॥
बन्धूकाधरशोभितानना मञ्जीरध्वनिमत्पदाम्बुजा ।
काञ्चीसिञ्जितसन्नितम्बिनी दाहं शीघ्रतया व्यपोहति ॥३४॥
ग्रीष्मे कामिजनः सुकौमुदीं कर्पूरं शुभचन्द्रिकागृहम् ।
बालां चन्दनचर्चनं सुम-शय्यां सेवति रात्रिषु च्छदिम् ॥३५॥
चन्द्रोऽयं सितकौमुदीच्छलाच्छोच्चैर्हास्यरसाप्लुतः स्त्रियाः ।
वक्षोजाधरवक्त्रमध्यमस्पृश्य(३)त्यच्छकरैर्विटाधमः ॥३६॥
तारेयं रमणीयविग्रहा किं वा रोहिणिका मम प्रिया ।
काचिद्दक्षसुताऽथवाऽपरा यूनानेन युतेति मुह्यति ॥३७॥
ग्लौरेषः परयोषिताननं शीतैरंशुकरैर्निषेव्य च ।
रात्र्यन्ते त्रपया समन्वितो मज्जत्यम्बुनिधावस्तच्छलात् ॥३८॥

---

(१) मन्मथम् । (२) अनुरक्ता ।
(३) स्पृशतीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोऽयं रुचिराननः स्त्रियो दृष्ट्वा शीतकरैः स्वतोऽधिकम्।
लज्जाभारनताननोऽबुधः पश्चादम्बुनिधौ निमज्जति ।३८॥

रुचिरतरकुचाभिः क्षुब्धवारां वगाहै-
र्मलयजनितलेपैः पुष्पशय्याधिरोहैः(१)।
तनुतरशुभवस्त्रैर्वल्लकीगानतानैः
सुखयतु शुचिरिभ्यान् (२) माधवीमिष्टपानैः ॥४०॥

ब्राह्मणानां मत्स्यभोजनस्य शास्त्रीयत्वम्

[निबन्धकः—श्रीदुर्गाप्रसन्नविद्याभूषणः]

अत्र खलु भारते वर्षे विमर्षपूर्वकमवलोकयतामस्माकं नयनपथे सततमेवेदमापतति यद्, वङ्गीया ब्राह्मणा मत्स्यरङ्गवन्नियतमेव मत्स्यानश्नन्ति नान्यदेशीया ब्राह्मणब्रुवा अपि। तद्दर्शनेन च वङ्गीयब्राह्मणाः "सात्त्विकानेव सेवेत सत्त्ववृद्धौ नरः सदा" इति शास्त्रादेशमुल्लङ्घ्य अभक्ष्यानपि मत्स्यान् भक्षयन्तः पतिता विगतब्रह्मवर्चसाश्च संवृत्ता इत्येवमाचक्षाणाः केचन विचक्षणा अस्मान् विशेषेणाधिक्षिपन्ति।

केचन वा ब्राह्मणानां मत्स्याशनं शास्त्रीयमशास्त्रीयं वेति जिज्ञासमाना मुनीनां नानामतदर्शनात् सन्देहसन्दोलितमानसा अवतिष्ठन्ते। केचन वान्यदेशीया वङ्गीयानां मत्स्याशनकथामाकर्णयन्तोऽपि सावज्ञं नासिकां सङ्कोचयन्ति। इत्येवमालोकयन्तोऽनेक एव मत्स्याशनं शास्त्रीयं वेत्यनुयुञ्जन्त्यस्मान्। तेषामेव निर्बन्धातिशय्येन प्रबन्धस्यास्य लेखने ममायमुद्यमः। न तु मत्स्यभोजनसमर्थनमेवास्य प्रबन्धस्यार्थं इत्येवं विजानन्तु सन्तः पाठकमहोदयाः।

---

(१) अधिवासैः। (२) धनिनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्ताहारलसत्कुचा शुभ्रा नासामौक्तिकशोभितानना ।
कञ्जाक्षी तनुवस्त्रवासिता कामं(१) बोधयते धवान्तिके ॥२७॥
स्वच्छाम्भोजदलास्तृता शुभा शय्या चन्दनपङ्कजा लिपिः ।
कर्पूरागरुवासिता च्छदिश्चान्द्रीभाऽतनुबोधिका शुची ॥२८॥
उत्तुङ्गस्तनकुड्मलाऽवला मुक्ताहारगलाऽम्बुजानना ॥
स्वच्छाम्भोविहृतौ धवेन या रक्ता(२) सातपनाशने हिता ॥२९॥
ग्रीष्मे मारविबोधनाय काऽप्येका गानरता प्रियान्तिके ।
धीरा पञ्चमनादिनो शुभा वीणां वादयते कलध्वनिम् ॥३०॥
गन्धैर्वासितचन्द्रिका गृहे सौधे स्फाटिकसन्निभस्थले ।
साकं नूतनमानदेन हि स्मेरास्या ललना सुदीव्यति ॥३१॥
सूक्ष्माच्छांशुकदृश्यसत्कुचा सद्गन्धाञ्चितकृष्णकेशिका ।
लोलाक्षी सुकटाक्षचालनैः पुंसां दाहमपाकरोत्यलम् ॥३२॥
कञ्जाक्षी विकसन्मुखाम्बुजा कञ्जाङ्घ्री जलजन्म-सत्करा ।
बद्धाम्भोजकुचा शुभांशुका बिम्बोष्ठी चपयत्यलन्तपम् ॥३३॥
बन्धूकाधरशोभितानना मञ्जीरध्वनिमत्पदाम्बुजा ।
काञ्चीसिञ्जितसन्नितम्बिनी दाहं शीघ्रतया व्यपोहति ॥३४॥
ग्रीष्मे कामिजनः सुकौमुदीं कर्पूरं शुभचन्द्रिकागृहम् ।
बालां चन्दनचर्चनं सुम-शय्यां सेवति रात्रिषु च्छदिम् ॥३५॥
चन्द्रोऽयं सितकौमुदीच्छलात्प्रोच्चैर्हास्यरसाप्लुतः स्त्रियाः ।
वक्षोजाधरवक्त्रमध्यमस्पृश(३)त्यच्छकरैर्विटाधमः ॥३६॥
तारेयं रमणीयविग्रहा किं वा रोहिणिका मम प्रिया ।
काचिद्दक्षसुताऽथवाऽपरा यूनानेन युतेति मुह्यति ॥३७॥
ग्लौरेषः परयोषिताननं शीतैरंशुकरैर्निषेव्य च ।
रात्र्यन्ते चपया समन्वितो मज्जत्यम्बुनिधावस्तच्छलात् ॥३८॥

(१) मन्मथम् । (२) अनुरक्ता ।
(३) स्पृशतीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शफरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ।
मत्स्यास्त्वेते समुद्दिष्टा भक्षणाय तपोधनैः॥"

ब्राह्मणेभ्यो देवताभ्यश्च निवेद्य सशल्कान् मत्स्यान् तथा रौरवं मृग-सम्बन्धि मांसञ्च भुञ्जीत। तथा शफरं प्रोष्ठीं सिंहतुण्डं शकुलं पाठीन-रोहितौ च भुञ्जीत। एते पूर्वोक्ता मत्स्या तपोधनैः ऋषिभिः भक्षणाय समुद्दिष्टा उपदिष्टा इत्यर्थः।

एतत्तु न पुनरभिधेयं विशेषेण, यतः सर्व एव जानन्ति यत्—सदाचारपरायणा ब्राह्मणाः—

"अन्नं विष्ठा पयो मूत्रं यद् विष्णोरनिवेदितम्।
फलं पुष्पञ्च ताम्बूलमन्नपानादिकञ्च यत्।
अदत्वा तन्महादेव्यै न भोक्तव्यं कदाचन।
यो यद्देवार्चनरतः स तदुच्छिष्टभोजकः।"

इत्यादि शास्त्रमाद्रियमाणाः सर्व एव स्वेष्टदेवतानिवेदितमेवान्नपानादिकं नित्यमश्नन्ति नानिवेदितम्। अतो निवेदितमत्स्यभोजने न तावद्दोष इति पुराणवचनेनानेन प्राप्यते। एतावता मन्त्रसंस्कृतहव्यकव्यादि-नियुक्त-मत्स्यभक्षणेन न कश्चिद् दोष इत्यायातम्।

कामतोऽवैध-निषिद्ध-मत्स्याशनेन दोषस्तु सुतरामेव, न तु मत्स्य-भोजनमात्रमेव दोषाय इत्येतदवगतम्।

न च "मत्स्यादाः सर्वमांसादास्तस्मान्मत्स्यान् विवर्जये"दिति मनुवचनेन, तथा "ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव हि" इति ब्रह्मवैवर्त्तोक्त श्रीकृष्णजन्मखण्डीय ८५।२ तमाध्यायवचनेन च ब्राह्मणानां मत्स्यभोजनं सर्वथैव निषिद्धं, मत्स्यभोजनविधायकवचनानि तु ब्राह्मणेतरविषयाणि इति वाच्यं—प्रागुक्तयाज्ञवल्क्यवचने भक्ष्या इत्युपक्रम्य द्विजातिभिरित्युपसंहारेण विशिष्य द्विजातीनां भक्ष्यत्व-विधानात्। किञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च कर्म्मणि नियुक्ताविव अदनीयौ न त्वन्यदा, सिंहतुण्ड-सशल्कमत्स्यास्तु हव्यकव्याभ्यामन्यत्रापि भक्षणीया इत्याचख्यतुः।

पूर्वोक्तवचनस्य टीकादर्शनेन मत्स्यभोजनविधिरवगम्यते। शङ्ख-स्मृतेश्चावगम्यते—

राजीव-सिंहतुण्डाश्च सशल्काश्च तथैव च।
पाठीन-रोहितौ चापि भक्ष्या मत्स्येषु कीर्त्तिताः॥ इति।

याज्ञवल्क्यस्मृतौ च दृश्यते—

भक्ष्याः पञ्चनखाः श्वाविद्गोधाः कच्छपशल्यकाः।
शशश्च मत्स्येष्वपि तु सिंहतुण्डक-रोहिताः।
तथा पाठीन-राजीव-सशल्काश्च द्विजातिभिः॥

अस्यार्थः द्विजातिभिर्ब्राह्मणैः श्वावित् खड्गी गोधा स्वर्णगोधिका कच्छपः कूर्म्मः शल्यकः शजारुनाम्ना ख्यातः कश्चिज्जन्तुविशेषः शशश्च खरगोस इति प्रसिद्धः पश्चनखः प्राणिविशेषः एते पञ्चनखा भक्ष्याः तथा पाठीन-राजीव-सशल्का मत्स्याश्च भक्ष्याः।

एताभ्यां शङ्खयाज्ञवल्क्यवचनाभ्याञ्च द्विजातीनां मत्स्यभोजन-विधिरासाद्यते।

हारीतसंहितायाञ्च दृश्यते—

"मत्स्यान् सशल्कान् न्यायोपपन्नान् भक्षयेत्।"

न्यायोपपन्नान् मन्त्रसंस्कृतान् देवद्विजेभ्यो दत्तांश्च सशल्कान् शल्क-युक्तान् मत्स्यान् भक्षयेदित्यर्थः। एतेनापि मत्स्यभक्षणं प्राप्तम्।

एतानि संहिताप्रमाणानि दर्शितानि, अधुना पुराणप्रमाणं दर्श्यते। कूर्म्मपुराणे षोडशाध्याये प्रागुक्तसंहितानुसारो मत्स्यभोजनविधिः प्राप्यते, यथा—

"मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यस्तथैव च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शफरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्यास्त्वेते समुद्दिष्टा भक्षणाय तपोधनैः ॥"

ब्राह्मणेभ्यो देवताभ्यश्च निवेद्य सशल्कान् मत्स्यान् तथा रौरवं मृगसम्बन्धि मांसञ्च भुञ्जीत। तथा शफरं प्रोष्ठीं सिंहतुण्डं शकुलं पाठीन-रोहितौ च भुञ्जीत। एते पूर्वोक्ता मत्स्या तपोधनैः ऋषिभिः भक्षणाय समुद्दिष्टा उपदिष्टा इत्यर्थः।

एतत्तु न पुनरभिधेयं विशेषेण, यतः सर्वं एव जानन्ति यत्—सदाचारपरायणा ब्राह्मणाः—

"अन्नं विष्ठा पयो मूत्रं यद् विष्णोरनिवेदितम्।
फलं पुष्पञ्च ताम्बूलमन्नपानादिकञ्च यत्।
अदत्वा तन्महादेव्यै न भोक्तव्यं कदाचन।
यो यद्देवार्चनरतः स तदुच्छिष्टभोजकः।"

इत्यादि शास्त्रमाद्रियमाणाः सर्वं एव स्वेष्टदेवतानिवेदितमेवान्नपानादिकं नित्यमश्नन्ति नानिवेदितम्। अतो निवेदितमत्स्यभोजने न तावद्दोष इति पुराणवचनेनानेन प्राप्यते। एतावता मन्त्रसंस्कृतहव्यकव्यादिनियुक्त-मत्स्यभक्षणेन न कश्चिद् दोष इत्यायातम्।

कामतोऽवैध-निषिद्ध-मत्स्याशनेन दोषस्तु सुतरामेव, न तु मत्स्यभोजनमात्रमेव दोषाय इत्येतदवगतम्।

न च "मत्स्यादः सर्वमांसादास्तस्मान्मत्स्यान् विवर्जये"दिति मनुवचनेन, तथा "ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव हि" इति ब्रह्मवैवर्त्तोक्ते श्रीकृष्णजन्मखण्डीय ८५२ तमाध्यायवचनेन च ब्राह्मणानां मत्स्यभोजनं सर्वथैव निषिद्धं, मत्स्यभोजनविधायकवचनानि तु ब्राह्मणेतरविषयाणि इति वाच्यं—प्रागुक्तयाज्ञवल्क्यवचने भक्ष्या इत्युपक्रम्य द्विजातिभिरित्युपसंहारेण विशिष्य द्विजातीनां भक्ष्यत्वविधानात्। किञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च कर्म्मणि नियुक्ताविव अदनीयौ न त्वन्यदा, सिंहतुण्ड-सशल्कमत्स्यास्तु हव्यकव्याभ्यामन्यत्रापि भक्षणीया इत्याचख्यतुः ।

पूर्वोक्तवचनस्य टीकादर्शनेन मत्स्यभोजनविधिरवगम्यते । शङ्खस्मृतेश्चावगम्यते—

राजीव-सिंहतुण्डाश्च सशल्काश्च तथैव च ।
पाठीन-रोहितौ चापि भक्ष्या मत्स्येषु कीर्त्तिताः ॥ इति ।

याज्ञवल्क्यस्मृतौ च दृश्यते—

भक्ष्याः पञ्चनखाः श्वाविद्गोधाः कच्छपशल्यकाः ।
शशश्च मत्स्येष्वपि तु सिंहतुण्डक-रोहिताः ।
तथा पाठीन-राजीव-सशल्काश्च द्विजातिभिः ॥

अस्यार्थः द्विजातिभिर्ब्राह्मणैः श्वावित् खड्गी गोधा स्वर्णगोधिका कच्छपः कूर्म्मः शल्यकः शजारुनाम्ना ख्यातः कश्चिज्जन्तुविशेषः शशश्च खरगोस इति प्रसिद्धः पञ्चनखः प्राणिविशेषः एते पञ्चनखा भक्ष्याः तथा पाठीन-राजीव-सशल्का मत्स्याश्च भक्ष्याः ।

एताभ्यां शङ्खयाज्ञवल्क्यवचनाभ्याञ्च द्विजातीनां मत्स्यभोजनविधिरासाद्यते ।

हारीतसंहितायाञ्च दृश्यते—

"मत्स्यान् सशल्कान् न्यायोपपन्नान् भक्षयेत् ।"

न्यायोपपन्नान् मन्त्रसंस्कृतान् देवद्विजेभ्यो दत्तांश्च सशल्कान् शल्कयुक्तान् मत्स्यान् भक्षयेदित्यर्थः । एतेनापि मत्स्यभक्षणं प्राप्तम् ।

एतानि संहिताप्रमाणानि दर्शितानि, अधुना पुराणप्रमाणं दर्श्यते । कूर्म्मपुराणे षोडशाध्याये प्रागुक्तसंहितानुसारो मत्स्यभोजनविधिः प्राप्यते, यथा—

"मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यस्तथैव च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव विरोधसमाधानार्थं प्रागुक्तार्थः सर्वथा स्वीकरणीयः सर्वेषाम्। अङ्गीकृते च प्रागुक्तार्थे ब्राह्मणानां यथाविधि शास्त्रोक्त-मत्स्यभोजनं वैधमेवेति प्रतिपन्नम् ।

अपि च जन्मतिथिप्रकरणे तद्दिनकर्त्तव्यनिर्णये—

स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियम् ।
मत्स्यान् मोचयतो द्विजाय ददतश्चायुश्चिरं वर्द्धते ॥

इत्यादि वचने द्विजाय यन्मत्स्यदानमुद्दिष्टं तत् किं भक्षणार्थमुतान्यनिमित्तम् ? अन्यनिमित्तमिति चेत्, तत् किं नाम निमित्तम् ? नहि भोजनव्यतिरिक्तं मत्स्येन किञ्चित् प्रयोजनं दृश्यते मनुष्याणाम् । अतो भोजनार्थमेव द्विजाय मत्स्यदानमित्यनिच्छयापि स्वीकर्त्तव्यम् । न हि अग्राह्याभक्ष्यपलाण्ड्वादिदानवार्त्ता कुत्रापि दृष्टा

अथ दानीयं भोज्यमेव भवितव्यमित्यत्र किं मानम् ? गोदानादावतथात्वदर्शनात् इति चेत्तत्रेदं वक्तव्यं यद् गवादिद्वारा हि मनुष्याणामशेषाणि कार्य्याणि सम्पाद्यन्ते, तथाहि गोदुग्धं पानाय कल्पते, क्षीराच्च दधि-घृतादिकं समुत्पद्यते, गोमयादिकं गृहलेपनादावुपयुज्यते, करीषादिकं रन्धनोपयोगीन्धनस्थानीयं भवति, एवमुपानदादावुपयोगान्तरं द्रष्टव्यम्। नहि मत्स्येन प्रयोजनान्तरं चिन्तयन्तोऽपि वयं निश्चेतुमलम् । अतो भोजनार्थमेव मत्स्यदानमिति प्रतीमः । यदि नाम मत्स्या एकान्तत एव अभक्ष्या अभविष्यन् तर्हि तद्दानवार्त्ता कुत्रापि नाश्रोष्यत् । नहि पलाण्ड्वादिदानवार्त्ता कुत्रापि वर्त्तते, एतेनापि मत्स्या नाभक्ष्या इति बुध्यते ।

अथ "मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्" इति शूलपाणिधृतप्रायश्चित्तविधायकवचनस्य किमुत्तरमिति चेत्तत्रेत्थमुत्तरं कल्प्यम्। तथाहि शूलपाणिधृत प्रायश्चित्तविधायकवचने "कामतः" इति पदेन मत्स्यानितिपदस्य स्वेच्छया यथाविधि शास्त्रोदित-भक्ष्य-मत्स्येतर-मत्स्यान् इत्यर्थो बोद्धव्यः। अन्यथा मत्स्यानित्युक्त्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धो कामत इति पदस्य वैयर्थ्यमापद्येत, यत्तु कामत इति पदं तत् स्वेच्छया वैधेतराभक्ष्यमत्स्यान् जग्ध्वा इत्यर्थं प्रत्याययति। अतः शास्त्रोक्त-वैध-मत्स्यभक्षणे न प्रायश्चित्तमिति सिद्धान्तः। अन्यथा मत्स्यमात्रभोजने प्रायश्चित्तमित्युक्ते प्रागुक्तसंहितादिषु मत्स्यभोजन-विधायकवचनानामनुपपत्तिरेव स्यात्।

अथ मत्स्यभोजनविधिर्वङ्गदेश एव व्यवस्थितो भवतु इत्यपि न वाच्यं—होलाकाधिकरणे देशभेदव्यवस्थाया निराकृतत्वात्। न च निरामिषाशिनः प्रति किञ्चिद् वक्तव्यं केषाञ्चिदपि—"प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला" इत्यादि मन्वनुशासनात्। तथापि ये नाम मत्स्याशिनस्ते पतिताः स्वेच्छाचारिण इत्यपि न वक्तव्यं, तेषां शास्त्रानुसारत एव भक्षणदर्शनात् शास्त्रनिषिद्धमत्स्यानां परिवर्जन-दर्शनाच्च।

अतो यथाविधिशास्त्रसम्मत-मत्स्यभक्षणं वैधमेव द्विजातीनामिति प्रतिपन्नम्।

———

विद्यार्थि-विहगाः

[निबन्धकः—दिगम्बरकाशीनाथगद्रे]

निशम्य शिक्षामखिलां गुरोर्मुखा-
त्तदर्थलेशं न कदापि जानते।
तथापि येषां सकलं मुखोद्गतं
त एव बालाः शुकसाम्प्रदायिनः ॥१

विदीर्य काष्ठं सततं प्रयत्नतः
स चूर्णपेषं प्रपिनष्टि कीटकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पठन्ति शास्त्राण्यपि ये च शब्दशो
भवन्ति ते कीटकसाम्प्रदायिनः ॥ २

यदाऽऽपतेद् दृष्टिपथं पयोधर-
स्तदाऽऽरभन्ते शिखिनोऽपि नर्तितुम् ।
भवेत् परीक्षा न च यावदन्तिके
पठन्ति तावन्न मयूरवृत्तयः ॥ ३

विवक्षितार्थं त्ववगन्तुमक्षमाः
प्रकाशयन्तो रटने स्वपाटवम् ।
निरर्थकं काकरुतानुकारिणा
स्वरेण केचित् प्रतिभान्ति काकवत् ॥ ४

यथा चकोरो भजते हि चन्द्रिकां
तदन्यदस्मै न कदापि रोचते ।
तथा विशिष्टागमसक्तमानसा
अनन्यचित्तास्तु चकोरवृत्तयः ॥ ५

यथा द्विरेफा मधुसञ्चयव्रता
भ्रमन्ति नित्यं सुमवाटिकादिषु ।
तथैव ये ज्ञानमरन्दलिप्सया
अधीयते ते तु मिलिन्दवृत्तयः ॥ ६

भवन्ति विद्यार्थिषु भिन्नवृत्तयो
मया षडेता विरचय्य वर्णिताः ।
अतो भवद्भ्यः कतमाऽभिरोचते
विचार्य सम्यक् क्रियतां सुनिश्चयः ॥ ७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी

(पूर्वतोऽनुवृत्ता)

[निबन्धिका—श्रीमती रेणुदेवी]

कथमहं जातास्मि, कथमहं नयनहीना, जाता चेत् कथं शचीन्द्रस्य योग्या न संवृत्ता। अयोग्या च कथं तस्मिन् अनुरक्तास्मि। अनुरागवती च कथं तस्य समीपेऽपि स्थातुं न प्रभुरस्मि। कथञ्च तमेव परिचिन्तयन्ती परित्यक्तवती भवनम्। कथमन्धा सहायहीना च गङ्गातीरमागतास्मि मर्त्तुम्। कथं वा प्रबलजलोच्छ्वासमुखपतिततृणसाम्येन संसारस्रोतसि प्लवमानाया अविदितपथैनेव मे प्रवृत्तिः। अस्मिन् संसारे बहवो दुःखिनो वर्त्तन्ते, कथमहं तान् सर्वान् अतीत्य वर्त्तमाना। कस्येयं लीला, किं देवस्य? जीवानाम् एतावता क्लेशेन किं देवस्य सुखमुत्पाद्यते? जीवानां दुःखभोगायैव सृष्टिप्रवृत्तिश्चेत् किमनया तस्य सुखम्? मूर्त्तिमतीं निर्दयतामिव कथं देवतेति व्यपदिशामि, कथं वा निष्ठुरतां पूजयामि। न हि खलु देवकृतं मानुषाणाम् इदं भयानकं दुःखम्। एवञ्चेत् राक्षसेभ्योऽपि निकृष्टास्ते देवाः। किं तर्हि मयैव कृतानां कर्म्मणाम् अयं परिपाकः? केन पापकर्म्मणाहं जन्मान्धा। अथ क्रमेणाहं पुरतः प्रवृत्तास्मि प्रचलितुं मर्त्तव्यमिति। गङ्गायास्तरङ्गध्वनिमश्रौषम्। मन्ये न मे भविष्यति मरणम्। इदानीमपि मे शब्दमाधुर्य्यं प्रत्ययमनुरागः, न मरिष्यामि। क्रमेणाचिबुकम् आनयनञ्च सर्वं निमज्जितम्। क्षणमात्रमिदम् अवशिष्टं वर्त्तते। निमग्नास्मि। निमग्ना किन्तु न मृता। तथापि न वक्तुमिच्छामि यन्त्रणामयीमिमां जीवनकथाम्। अन्यः कथयिष्यति।

तस्मिन् प्रभातवातताडितभागीरथीप्रवाहपतिता नीयमानास्मि। क्रमेण विलुप्ता श्वासग्रहणशक्तिः, विनष्टा च चेतना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमरनाथो वक्ता

असारमिदं जीवनं वहतो मे वर्त्तते तुच्छस्यापि मया विहितस्य कर्म्मजातस्य वर्णनप्रयोजनम्।

संसारसागरेऽस्मिन् कस्यां सैकतभूमौ प्रतिहता मे तरणिरेषा भग्ना सोऽयं वृत्तान्तो मया विश्वचित्रे विलेखनीयः, यथा नवीना नाविकाः सावधाना भविष्यन्ति। मम निवासः पितुरालयो वा शान्तिपुरं नाम नगरम्। अधुना तु स्थिरता न वर्त्तते निवासस्य। सत्कायस्थकुलसम्भूतस्यापि मे पितृन्ववाये कश्चित् कलङ्कस्पर्शः समजनि। मम खलु पितामहानुजपत्नी तत्याज कुलम्। मम पितुस्तथैवासीत् भूमिसम्पत्तिर्यथा विनैव धनानामर्जनं शक्यमनायासेनैव जीवनयापनं कर्त्तुं, स हि परिगणित आसीत् धनवत्सु। तेन खलु मम शिक्षासौष्ठवसम्पादनाय धनव्ययपरिगणना न कृता। शिक्षितश्चास्मि कथञ्चित् कासुचित् विद्यासु। किन्त्वलमनया कथया। भवति भोगिनोऽपि शिरसि मणेरवस्थानं, मय्यपि विद्यायाः।

समुपस्थिते च मम परिणयसम्पादनयोग्ये वयसि, समेता बहवः सम्बन्धमर्थयमानाः कन्यापितरः। न तेषु कश्चिदपि पितुर्मे मनोरथानुरूपः। तस्य तावत् एवमेव मनोरथः यथा कन्या सुन्दरीणाम् अग्रणीः, पिता च तस्या धनिनां मुख्यः कौलीन्यप्रथा च सर्वथा दोषहीना स्यादेवं चेत् घटते (तर्हि) सुसम्पादो मे विवाहः स्यात्, किन्तु नैवंविध-गुणवत्सम्बन्धसमागमः कश्चिदपि जातः। इदन्तु तत्र तथ्यं यदस्माकं कुलकलङ्कमाकर्णयन्तो न केऽपि कुलाभिमानिनः कन्यादानं प्रति समुत्सुकाः। एवं सम्बन्धमन्विष्यन्नेवापरिपूरितमनोरथः परलोकमगान्मे जनकः।

अथ परलोकमुपेते पितरि गतेषु च केषुचिद् दिवसेषु, पितृस्वस्रा मे निर्णीतः कश्चन सम्बन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गातीरे कालिकापुरं नाम कश्चिद् ग्रामो वर्त्तते। अस्मिन् इतिवृत्ते भवानीपुराख्यस्य ग्रामान्तरस्य प्रसङ्गः सप्रयोजनः। परस्पर-सन्निहितं तदिदं ग्रामद्वयम्। तत्र कालिकापुरे च पितुःस्वसुर्मे श्वशुर-भवनम्। तत्रत्यस्यैव कस्यचिद् अभिजातस्य कन्यका लवङ्गलता नाम सर्वथा योग्या ममेति तया स्थिरीकृतः सम्बन्धः।

इतः पूर्वमपि मया भूयो भूयः पितृष्वसृभवनमुपेतेन तत्र, तस्याः पितृगृहे च विलोकिता लवङ्गलता। निर्णीते च सम्बन्धे मम दर्शनपथं परिहरन्त्याश्च तस्यां बाहुल्येन वृद्धिमुपेतं मे तस्या दर्शनौत्सुक्यम्। तदा च तस्याः समुत्तीर्णप्रायं विवाहवयः। लवङ्गकलिका विकाशोन्मुखी जाता, तस्या दृष्टिश्चञ्चला भीता च संवृत्ता, मृदुत्वं व्रीड़ासम्बन्धञ्चालभत समुच्चहासः। द्रुतगतिश्च मन्थरभावमापेदे। आसीच्च मे मनसि, चित्रम् इदं, न कदापि मया विलोकितमेतादृशं सौन्दर्य्यम्। न युवत्याः कथमप्येतादृशी सौन्दर्य्यसम्पत् सम्भवति। सत्यमेवैतत् यदतीतशैशवायाः परं लब्धयौवनमदायाः किशोरि-कायाः शिशोश्च नातिपरिस्फुटवचनस्य सौन्दर्य्यं यथा मनोहरति न तथा विलासलास्यभूमेर्यौवनवत्याः। यौवने हि वसनभूषणविन्यासविशेषस्य बाहुल्यं, स्मितकटाक्षविक्षेपस्य समुत्कर्षः, वेणीबन्धस्य सन्दोलनं, बाहुमृणालयोश्चलनं ग्रीवाभङ्गीवैचित्र्यम् वचनचातुर्य्यञ्च युवतीनां रूपविकाशं पण्यन्यासधर्म्मत्वमुपपादयन्ति। वयञ्च विकारवतैव नयनजातेन तानि तान्यवलोकयन्तो न याथातथ्यस्य निर्णये प्रभवामः। यस्य च सौन्दर्य्यस्य स्वरूपपरीक्षायां विकृतिमदिन्द्रियसम्बन्धं नानु-भवति मनोवृत्तिः, तदेव सौन्दर्य्यम्।

अस्मिन्नेव समये कन्याकर्त्ता श्रुतवान् अस्माकं कुलकलङ्कम्। भग्नश्च सम्बन्धः। मम हृदयपतत्री लवङ्गलतायामस्याम् उपवेष्टुम् उपक्रान्तः किन्तु सहसा भवानीनगरादुपेत्य रामसदयमित्रो हृदयान्मे विच्छिद्य निनाय लवङ्गलताम्। तेनैव तस्याः सम्पन्नः परिणयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लवङ्गलतालाभे नितरां निराशोऽहं दूयमानेन मानसेन स्थितवान्। गतासु च कासुचित् समासु संघटितः कश्चिदेवं व्यापारो यस्य प्रकाशनेऽपि न प्रभुरस्मि। कदापि वक्तुं प्रभवामि वा न वेति नाद्यापि निश्चयः। ततः प्रभृत्येवाहं परित्यक्तनिवासो विसृज्य सम्बन्धिनो निरपेक्षः सुखसाधनेषु देशेषु बंभ्रम्यमाणो न कुत्रापि स्थितिमासादयामि।

नास्ति मे कुत्रापि स्थितिरिति सत्यमिदं, तथापि मनोरथमात्रेणैव स्थिरमास्पदमासाद्य समर्थोऽस्मि स्थातुम्। इच्छामात्रेणैव कुलीनपदभाजो ब्राह्मणादपि समधिकं विवाहञ्च कर्तुम्। मम सर्वमेवासीत्। धनं वा, विद्या वा, बाहुबलम् वा। न कस्याप्यभावमन्वभवम्। किन्त्वदृष्टदोषेण एकस्यैव दिवसस्य व्यापारेण बुद्धिदोषानुष्ठितेन समुपहतः। सर्वं परित्यज्य सुखमयं गृहं, विश्रब्धवन्तः परिजनाः स्निग्धाः सहृदयाः सुहृदः, विकसत्कुसुमोद्यानसौन्दर्य्यमनोरमः संसारश्च, सर्वमिदं परित्यज्य वात्याताडितपतङ्गवत् विवशो देशेषु परिभ्रमामि। अहमिच्छामात्रेणैव जन्मभूमावेव रम्यं मे भवनं रम्यसज्जया सज्जितं विधाय विलासपवनेन सुखपताकामुत्तोलयन् हसितसायकपरम्परया दुःखराक्षसम् अपाकृत्य समर्थोऽस्म्यवस्थातुम्। किन्तु आस्तामेतत्। इदं तावत् परिचिन्तयामि कथं मया तन्न कृतमिति। सुखस्य दुःखस्य वा विधानं न ममायत्तम्। किन्तु मनस्तु ममैव। तरङ्गे निमग्ना तरणीति किमहमपि निमग्नोऽस्मि? कूलन्तु सन्तरणेनैव लभ्यते। किञ्च किमिदं दुःखं नाम? मानसीयमवस्था चेत्, सा तु आत्मन्येवायतते। सुखं वा दुःखं वा किमिदं स्वायत्तं परायत्तं वा? परस्तु केवलं बहिर्जगत एव ईष्टे, आन्तरं तु सर्वथा ममैवाधीनम्। मामकेनैव अन्तरेण राज्येन न कथमहं सुखी भवेयम्?

किं बहिरेव यदिदमनुभूयते तदेव तथ्यम्? किं वितथैव चेयमान्तरानुभूतिः? किं मनोमात्रमादाय न तुष्यति जनः। बहिर्जगति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कियन्तो वर्त्तन्ते पदार्थाः ? न किं ते ममान्तरे वर्त्तन्ते ? यानि च वस्तूनि ममान्तरे जगति प्रतिभान्ति, कुतस्तद् दर्शयितुं प्रभवति बाह्यं जगत् ? यानि प्रसूनानि मालभूमौ विकसन्ति योऽयं वातो हृदयाकाशे परिस्पन्दते यश्च सुधांशुः चित्तगगनं सुधाधारया परिप्लावयन् समुदेति यश्चायमान्तरः सागरः तमसोपगूढ़ः स्वयमेव माद्यति, कुत एषां बहिर्जगति सम्भवः ?

एवं चेत् तर्हि तस्मिन् निशीथसमये तस्याः सुषुप्तायाः सुन्दर्य्याः सौन्दर्य्यप्रभया--आस्तामेतत् । (क्रमशः)

सरस्वत्या मूर्त्तितत्त्वम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—श्रीअमूल्यचरणविद्याभूषणः]

ललितासने आसीना सरस्वती—खृष्टीय १९०४।५ अब्दे वीणावादनरता काचित् सरस्वतीमूर्त्तिराविष्कृता। साम्प्रतमसौ सारनाथस्थ-चित्रशालायां (B(E)27) रक्षिता। मूर्त्तिरियं कस्मिंश्चित् उच्चैरासने ललितमुद्रायाम् आसीना। असौ नानालङ्कारभूषिता च। एतत्तु मध्ययुगभास्कर्य्यस्य सुष्ठु निदर्शनम्। इयञ्च मूर्त्तो रक्तवालुकाप्रस्तरमयी।

भङ्गी च सरस्वतीमूर्त्तेः—प्रायश इयं देवी विष्णुमूर्त्तिसनाथा प्राप्यते। वङ्गीय-साहित्यपरिषच्चित्रशालायाम् एवंविधा बह्व्यो मूर्त्तयः सन्ति। देव्या मूर्त्तेर्भङ्गी प्रायेण समभङ्गयुता। परिषच्चित्रशालायां समपदस्थानकमुद्रायां पद्मपीठस्था एका विष्णुमूर्त्तिर्विद्यते। मूर्त्तेरस्या दक्षिणपार्श्वे लक्ष्मीः वामपार्श्वे तु वीणाहस्ता सरस्वती। मूर्त्तिद्वयमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिभङ्गम्। अत्र चतस्रो विष्णुमूर्त्तयोऽपि विद्यन्ते। आसामपि वामपार्श्वे वीणाहस्ता सरस्वती शोभते। पुरतः त्रिभङ्गमुद्रया पादैकलग्ना देवी तिष्ठति। विष्णुमूर्त्त्या सह राजमाना सरस्वती प्रायेण पद्मपीठे दण्डायमाना दृश्यते। साहित्यपरिषदि एकस्यां मूर्त्त्याम् एवंविधायां त्रिविक्रमाधिकृतायां भद्रपीठिकायां मूर्त्तिरसौ दण्डायमाना। परिषदि विष्णोरपि एका ताम्रमूर्त्तिरस्ति। अत्रापि त्रिभङ्गमुद्रया वीणाहस्ता सरस्वती तिष्ठति। पुनरपि असौ पञ्चरथ-भद्रपीठोपरि पद्मपीठे तिष्ठति। किञ्च एकस्यान्ताम्रकेशवमूर्त्तावपि सरस्वती अस्ति। अत्र द्विभङ्गमुद्रयापि काचित् वीणावादनरता भारतीमूर्त्तिर्विद्यते। परिषदः $\left(\frac{\text{F(a) 15}}{353}\right)$ संख्यक-विष्णुमूर्त्तौ देवी अभङ्गमुद्रया स्थिता। अन्यापि सरस्वतीमूर्त्तिः विष्णुमूर्त्तौ अभङ्गमुद्रया विद्यते। $\left(\frac{\text{K(d) 1}}{282}\right)$ मूर्त्तिरियं वीणाहस्ता नानालङ्कारभूषिता च। खृष्टीय १९११-१२ अब्दस्य Archæological Survey of India वार्षिकविवरणे रङ्गपुरे प्राप्ताः पञ्च विष्णुमूर्त्ति-प्रतिलिपयः सन्ति। एषां प्रथमस्य तृतीयस्य चतुर्थस्य पञ्चमस्य च विष्णोः दक्षिणे लक्ष्मीः वामे वीणाहस्ता सरस्वती। रङ्गपुर-साहित्य-परिषत्-पत्रिकायां सप्ततिसंख्यकफलकप्रतिकृतिस्थ-द्वितीयविष्णुमूर्त्तिविवृतौ श्रीयुत-जगदीशमुखोपाध्याय एवं ब्रवीति—विष्णोः वामदिग्विभागस्था मूर्त्तिः सरस्वत्याः, अनया वीणा वक्रं धृता। महामति Spooner महोदयेन कथितं नेयं वीणा अपि तु पद्मम्। पद्ममत्र पद्मदण्डकरम्। वीणा ऋजुरेव भवति न कदापि वक्रा। इयं मूर्त्तिर्न सरस्वत्या अपि तु वसुमत्याः। अस्याः दक्षिणे इन्दिरा। सारदातिलकध्यानादपि तदेव प्रतिभाति—

ऊर्द्ध्वद्विवाकराभयनिभं शङ्खं गदां पङ्कजम् (?)
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभि-पार्श्वद्वयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभं
दीप्तं विश्वधरं स्ववर्च्चसि लसच्छ्रीवत्सचिह्नं भजे ॥

महीशूरराज्ये तीरुमकुडलु-नरसिंपुर इत्यभिधेयं भूखण्डमेकमस्ति। सोमनाथपुराख्यग्राम एतद्भूखण्डान्तर्गत एव भवति। कावेर्य्याः तीरभूमेर्द्दशक्रोशमन्तरं स्थानमेतत्। अत्र किञ्चित् केशवमन्दिरमस्ति। तत्र हैशलस्थापत्यस्य प्रभूतं निदर्शनं विद्यते। अस्य मन्दिरस्य बहिःप्राचीरे चतुर्नवत्युत्तरशतसंख्यका मूर्त्तयः सन्ति। आसु लक्ष्मी-सरस्वती-महिषमर्द्दिनीप्रभृतीनां चतुर्द्दशोत्तरशतसंख्यका मूर्त्तयः। अवशिष्टाः पुनर्नरसिंह-वराह-हयग्रीव-वेणुगोपाल-परवासुदेव-ब्रह्म-शिव-गणपतीन्द्र-मन्मथ-सूर्य्य-गरुड़प्रभृतीनाम्। एतानि ऋतेऽपि तत्र नृत्तविष्णु-नृत्तगणपति-नृत्तलक्ष्मी-नृत्तसरस्वतीनां मूर्त्तयोऽपि विद्यन्ते। नृत्तसरस्वती द्विभुजा, नानालङ्कारभूषिता च। सा प्रायशो वीणां धत्ते। काश्चन मूर्त्तयो वीणाविरहिता अपि सन्ति। नृत्तसरस्वत्या मूर्त्तिरियम् अतीव मनोज्ञा। अस्या भङ्गी च तथा। हलेविडु इत्याख्यायां नगर्य्यामपि काचित् मनोज्ञा नृत्यपरायणा सरस्वतीमूर्त्तिरस्ति।

वीणाहस्ता लक्ष्मीः—शुक्राचार्य्यस्तस्य नीतिसारे सात्त्विकलक्ष्मीमूर्त्तिवर्णनायां "मूर्त्तिरियं चतुर्भुजा भवती"ति भणति। वीणा लुङ्गफलम् अभयं वरश्च हस्तचतुष्टये प्राप्यन्ते।

मुद्रा—सप्तदशवर्षेभ्यः प्राक् प्रयागसन्निहिते भिटाख्ये स्थाने प्रतिमुद्रिता मुद्रा आसादिता। आसाम् एकस्या वर्त्तुलाकाराया मुद्राया एकस्मिन् प्रान्ते ऊर्द्ध्वकुम्भोऽस्ति। कुम्भस्तु पादपीठोपरि स्थापितः। तस्य अधस्तात् उत्तरगुप्तलिप्यङ्कितं सरस्वतीति नाम विद्यते। मुद्राया अपरस्मिन् भागे न किञ्चिदपि दृश्यते। अर्द्ध इञ्चपरिमितः अस्याः व्यासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वती-संस्थानम्—श्रीधराश्वमुखौ पार्श्वद्वये वागीश्वरी क्रिया।
कीर्त्तिर्लक्ष्मीस्तथा सृष्टिर्विद्या शान्तिश्च मातरः॥

मुद्रितं हि ब्रह्मणश्चतुरिति विष्णुपुराणवचनम्। स हि ध्यान-मुद्रया सप्तहंसरथसमासीनः। अस्य दक्षिणे सरस्वती वामे सावित्री। एते मनोज्ञे विविधभूषणभूषिते च। कालिकापुराणे चतुर्मुखस्य चतुर्भुजस्य च ब्रह्मण एका विवृतिर्विद्यते। स कदाचित् रक्तकमला-रूढ़ः कदाचिद्वा हंसारूढ़ः। ब्रह्मणः अस्य सावित्री वामपार्श्ववर्त्तिनी। तन्त्रसमुच्चये तु आसाद्यते यत्, उत्तरमातृगणानां पार्श्वद्वये श्रीधरा-श्वमुखयोः संस्थानं, मध्ये वागीश्वरी क्रिया कीर्त्तिः लक्ष्मीः सृष्टिर्विद्या शान्तिश्च एष सप्तमातृगणः। दक्षिणभारतीयशिल्पशास्त्रस्य रूप-मण्डने अस्ति यत्, गणेशमन्दिरे गणेशस्य वामपार्श्वे गजकर्णः दक्षिणे सिद्धिः उत्तरे गौरीमूर्त्तिः पूर्वे बालचन्द्रः दक्षिणे सरस्वती पश्चिमे सरस्वत्याः पृष्ठभागे कुवेरश्च। नारदपञ्चरात्रागमे कति देवताः तच्छक्तीनां च नामानि विद्यन्ते, तासु सरस्वती सङ्कर्षणशक्तिरूपेणाभि-हिता। तस्मिन्नेव तु रूपमण्डने ब्रह्मणो मन्दिरनिर्माणप्रकारोऽपि दृश्यते। अत्र सावित्रीसरस्वतीप्रभृतयः ब्रह्मणः पार्श्वदेवतारूपेण दृश्यन्ते। कारणागमे सभापतिमधिकृत्य विद्यते—कैलासपर्वतशृङ्गे रत्नखचितासनासीनायाः गौर्य्याः पुरतः सायं चन्द्रमौलिशिवः नृत्य-निरतः। सर्वदेवा अपि तस्मिन् नृत्ये प्रवृत्ताः। ब्रह्मा करतालं, विष्णुः पटहं, भारती वीणां, सूर्य्याचन्द्रमसौ वंशीध्वनिञ्च कुर्वन्तस्तिष्ठन्ति। तुम्बुरुः नारदश्च गायतः, नन्दि-कुमारौ वादयतः। मयमते अन्यासां देवतानां नामानि च दृश्यन्ते। भुजङ्गत्रासितं नाम हि शिवस्य नृत्यम्। एलिफाण्टाख्ये स्थाने पर्वतगुहायां शिवस्य गङ्गाधरमूर्त्तिरस्ति। शिव-शिरसि गङ्गायमुनासरस्वतीनां मूर्त्तित्रयं दृश्यते।

गौरीमन्दिरे तु मध्यभागे गौरी, तस्या वामे सिद्धिः, दक्षिणे श्रीः, पृष्ठकर्णभागे भगवती सरस्वती च। ऐशान्यां गणेशः आग्नेय्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुमारः। मुम्बइप्रदेशस्थ-वीजापुरनगरान्तर्गत आइहोल इत्याख्यस्थाने एकं शिवमन्दिरमस्ति। तत्र एका ब्रह्मणो मूर्त्तिः। अस्या दक्षिणे सरस्वती सावित्री च अवस्थाय ब्रह्मणः शिरसि पुष्पमालां प्रयच्छतः। हलेविड् इत्याख्यस्थानस्य कैलासमन्दिरे ब्रह्मणः काचिद् दण्डायमाना मूर्त्तिरस्ति। तस्या उभयपार्श्वे चामरधारिणी एकैका मूर्त्तिः। ते तु सरस्वत्याः सावित्र्याश्च भवेताम्। कलिकाता-कलाभवने एका प्रस्तरमूर्त्तिरस्ति। तत्र ब्रह्मणो वामजानुनोरुपरि आसीना सरस्वती। सा एकेन हस्तेन ब्रह्मणः स्कन्धदेशं वेष्टयति। महीशूरस्थ-शृङ्गेरीमठाधिष्ठात्री सरस्वती शारदेति नाम्ना प्रगीयते। सा पञ्चानना चतुर्हस्ता चतुःषष्टिकलाधिष्ठात्री देवता। असौ दशहरादिवसे गन्धफलपुष्पैरर्च्यते।

ब्राह्मणग्रन्थेषु देवी वाग्देवीरूपेण पौराणिकयुगे तु सरस्वतीरूपेण पूजिताभूत्। बौद्धा अपि स्वाभीष्टसिद्धये एनां देवीं वाचम् अर्चयन्ति। बौद्धतान्त्रिकयुगे देवीयं बौद्धतन्त्रैः स्वकीयदेवीरूपेण प्रतिपादिता। तदाप्रभृत्यसौ तुल्यरूपेण बौद्धैरार्य्यैश्च पूज्यते। प्रयोजनानुरोधेन अस्या रूपमपि बौद्धतन्त्रे परिवर्त्तितमासीत्। ते तु न केवलम् एकवक्त्रां द्विभुजां सरस्वतीमर्चयन्ति, अपि तु त्रिमुखां षड्भुजामपि। बोधिसत्त्वानाम् अवलोकितेश्वर एव श्रेष्ठः। ततः परमेव मञ्जुश्रीबोधिसत्त्वस्य स्थानम्। असौ मञ्जुनाथो मञ्जुघोषोपनाम्नापि परिचीयते। विद्याधिपतित्वात् वागीश्वर इत्यस्य नामान्तरम्। ललितविस्तर-दिव्यावदानप्रभृतीनां ग्रन्थानां प्रथमे भागे मञ्जुघोषस्य नाम न दृश्यते। सुखावतीव्यूहे तु अस्य नामास्ति। लङ्कावतारसूत्रे असौ हि मुख्यवक्ता। खृष्टीय २७० अब्दे रत्नकारण्डव्यूहः अनूदितः। तत्रासौ अतिरञ्जितः सन् वर्त्तते। सद्धर्मपुण्डरीके तु अयं मुख्यबोधिसत्त्वः मैत्रेयः। स शास्तृरूपेण निर्दिष्टः। चिरयौवनोऽसौ मञ्जुश्रीः। असौ भारते, नेपाले, तिब्वते, चीने, जापाने, यवद्वीपेऽपि पूज्यते। एष ज्ञानबुद्धिविद्यास्मृत्यादीनामधिष्ठातृदेवता। अयन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्तिविरहितः। अपि तु एकस्मिन् मञ्जुश्रीचरिते एतदासाद्यते यत्, लक्ष्मीः सरस्वती वा, द्वे अपि वा अस्य शक्ती। पुस्तकमेतत् मञ्जुश्री-विक्रीड़ितं खृष्टीय ३१३ अब्दे चैनभाषयानूदितम्।

सरस्वती हि वागीश्वरी। मञ्जुश्रीः पुनः वागीश्वरः। बौद्ध-तान्त्रिका वागीश्वरशक्त्या वागीश्वर्या भक्ताः सन्तः तामपि पूजयितु-मारेभिरे। आर्य्यतान्त्रिका अपि तस्याः पूजां प्रवर्त्तयामासुः किल। देवीयं चतुर्भुजा त्रिनेत्रेति पञ्चरात्रागमः। हस्तेषु अस्याः दण्डः पुस्तकं माला कमण्डलुश्च वर्त्तन्ते, कालक्रमेणासौ बहुधा परिचिता आसीत् धेनु-वागीश्वरी सौभाग्य-वागीश्वरीत्यादिरूपेण। आसां त्रिनयनं शिरसि जटाजूटश्च। धेनु-वागीश्वरी शब्दब्रह्मेति आर्य्य-तान्त्रिकाणां मतम्। बौद्धानां साधनमालायां कतिविधानां सरस्वतीनां ध्यानानि विद्यन्ते। ताः पुनः—

(१) महासरस्वती (२) वज्रवीणासरस्वती (३) वज्रसारदा (४) आर्य्यासरस्वती।

महासरस्वती चन्द्रमण्डलस्थिता। सा द्वादशवर्षीया नानालङ्कार-भूषिता स्मेरमुखी करुणामयी च। अस्या वक्षसि मुक्ताहारः, दक्षिणहस्ते वरमुद्रा, वामे च सदण्डश्वेतपद्मम्। सा सर्वशुक्ला। अस्याः वर्णः शरदः पूर्णचन्द्रांशुरिव शुभ्रः। अस्या आननं पद्मं वसनञ्च शुभ्रम्। तया धृतं गन्धपुष्पमपि शुभ्रम्। महासरस्वत्याः पुरतः चतस्रः स्वनायिकाः—पुरतः प्रज्ञा पश्चात् मतिः दक्षिणे मेधा वामे स्मृतिः।

एवञ्च सरस्वत्याः ध्यानम्—सा चन्द्रमण्डलमध्यवर्त्तिनी पुण्ड-रीकासना; पद्ममिदं ह्रींकारव्याप्तम्। एवं चिन्तयित्वा पश्चात् तस्मिन्नेव पद्मे—

"तेन च भगवतीं महासरस्वतीमनुविचिन्तयेत् शरदिन्दुकराकारां सितकमलोपरि चन्द्रमण्डलस्थां दक्षिणकरेण वरदां वामेन सनाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सितसरोजधरां स्मेरमुखीमतिकरुणामयीं श्वेत-चन्दनकुसुमवसनधरां मुक्ताहारोपशोभितहृदयां नानारत्नालङ्कारवतीं द्वादशवर्षाकृतिं मुदित-कुचमुकुलदन्तुरोरस्तटीं स्फुरदनन्तगभस्तिव्यूहावभासितलोकत्रयाम्। ततस्तत्पुरतो भगवतीं प्रज्ञां दक्षिणतो मेधां पश्चिमतो मतिं वामतः स्मृतिं एताः स्वनायिकासमानवर्णादिकाः सम्मुखमवस्थिताश्चिन्त-नीयाः।" साधनमाला-संख्या १६२ पृ० ३२९

देवीमाहात्म्ये महासरस्वती—आर्य्यतान्त्रिका अपि आद्याशक्तिं दुर्गां महासरस्वतीरूपेण कल्पयन्ति। तेषां महासरस्वती तु अष्टभुजा। दक्षिणे शङ्खं हलं शूलं घण्टां वामेन तु मुषलं चक्रं धनुः सायकं च बिभ्रती राजतेऽसौ। देवी पद्मोपरि पद्मासनोपविष्टा। मार्कण्डेय-पुराणान्तर्गतदेवीमाहात्म्ये देव्याः प्रथमचरितस्य महाकाली देवता, द्वितीयचरितस्य महालक्ष्मीः, उत्तरचरितस्य तु रुद्रः ऋषिः महा-सरस्वती देवता, उष्णिक् छन्दः, भीमा शक्तिः भ्रामरी बीजं, वायु-स्तत्त्वम्। अत्र महासरस्वत्या ध्यानमप्यस्ति—

"घण्ठाशूलहलानि शङ्खमुषले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविदधच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वां मन्त्रसरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥"

अनेन मन्त्रेण पञ्चोपचारैः देवीं पूजयित्वा नित्यं चण्डीस्तवं पठेदिति नियमः। अत्र दुर्गा एव महासरस्वतीति प्रतिभाति। अस्याः चण्डीरूपत्वं दुर्गारूपत्वञ्च महाभारते अपि दृश्यते—

"त्वं महाविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि॥ ८०३

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती।
सावित्री वेदमाता च तथा वेदान्त उच्यते"॥ ८०४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भद्रकाल्याः सरस्वत्याश्च अभिन्नरूपत्वं पूजापद्धतावपि प्रतिपाद्यते—"ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।" इति

वज्रवीणासरस्वती—वज्रवीणासरस्वती द्विभुजा शुभ्रवर्णा। अन्यत्र देवी महासरस्वत्या तुल्या। अस्याः हस्तद्वये वीणा। साधनमालायाम् एवमस्याः रूपं दृश्यते—

"सप्तमस्य द्वितीयस्थमष्टमस्य चतुर्थकम्।
प्रथमस्य चतुर्थेन भूषितं तत् सबिन्दुकम्॥
तदुद्भवां सरस्वतीं वीणावादनतत्पराम्।
चन्द्रावदातनिर्भासां सर्वालङ्कारभूषिताम्॥"

—नं १६५ पृ० ३३५

जपमन्त्रः—"ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा।"

वज्रशारदा—वज्रशारदाया दक्षिणे हस्ते पद्मं सव्ये तु पुस्तकम्। असौ सर्वालङ्कारभूषिता त्रिनेत्रा शुक्लवर्णा च। असौ पद्मोपरि संस्थिता अर्द्धचन्द्रकिरीटिनी। अस्या ध्यानं यथा—

"शुभ्राम्बुजोपरि लसत्तनुमादधानां
नेत्रत्रयं मुकुटसंस्थितमर्द्धचन्द्रम्।
वामेन पुस्तकधराम्बुजमन्यहस्ते
पश्चात् स्वदेहसमतामनयत् प्रयत्नात्॥"

साधनमाला नं १६६ पृ० ३३७

वज्रसरस्वती वा आर्य्यासरस्वती—वज्रसरस्वती साधनमालायां एवं वर्ण्यते—

"सितवर्णां मनोरमां दक्षिणेन रक्ताम्बुजधारिणीं वामेन प्रज्ञापारमितापुस्तकधारिणीम्।"

मनोज्ञाया मूर्त्तेरस्याः सव्येतरहस्ते लोहितपद्मं वामे प्रज्ञापार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मितापुस्तकम्। इयं षोड़शी श्वेताम्बरा सितवर्णा च। चन्द्रवीज-निष्पन्ने यम् आर्य्यसरस्वतीरूपेण च गीयते। अस्या मन्त्रो यथा—

"ॐ पिचु पिचु प्रज्ञावर्द्धनि ज्वल ज्वल मेधावर्द्धनि धिरि धिरि बुद्धिवर्द्धनि स्वाहा।"

आर्य्यवज्रसरस्वती—असौ त्रिनयना रक्तद्युतिसमन्विता सद्भूषणालङ्कृता प्रत्यालीढ़पदेन संस्थिता षड्भुजा च। असौ दक्षिणेन पाणिना पद्मम् असिं कर्त्रीञ्च, वामेन पुनः ब्रह्मकपालं रत्नं चक्रं च धारयन्ती राजते। मुखस्य दक्षिणं पार्श्वं नीलवर्णं वामपार्श्वन्तु श्वेतम्। अस्याः ध्यानम्—

"तस्माद् रक्तमहाद्युतिं भगवतीं सद्भूषणालङ्कृतां
प्रत्यालीढ़पदस्थितां त्रिवदनां षड्बाहुभिर्भूषिताम्।
सव्ये नीलमुखां बिभर्त्ति च करे पद्मासिकर्त्रीश्च वै
वामे शुक्लमुखां च पात्रसहितां सद्रत्नचक्रं तथा॥"

कृष्णयमारितन्त्रे तु वज्रसरस्वत्या ध्यानमेवं—

"त्रिमुखां षड्भुजां रक्तां सरस्वतीं भावयेद् व्रती।
पद्महस्तधरां सौम्यां प्रज्ञावर्द्धनहेतवे॥"

शिवाजि-चरितम्

(पूर्वतोऽनुवृत्तम्)

[निबन्धकः—श्रीकालिदासविद्याविनोदः]

अथ यवननृपाणां दक्षहस्तस्वरूपो
विषमसमरजेता राजपुत्राख्यसैन्यैः।
विविधविजयवार्त्तां घोषयन् सिंहनादै-
रभजत जयसिंहो दक्षिणं भारतं तत्॥ १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदित-सकल-वार्त्तो वीरवर्य्यः शिवाजिः
समरविजयिसैन्यैरभ्युपेतः ससज्जः।
अगणित-शरजालैस्तैर्वलैर्योद्धुकामो
दृढविरचितकाये रायदुर्गेऽवतस्थे ॥ २
विपुलयवनसैन्यैर्विप्लुतं हिन्दुधर्मं
प्रतिदिनमथ विप्रान् गाश्च पश्यन् विपन्नान्।
नरपति जयसिंहो मर्म्मविद्वः स्वदूत-
मनयदसमकीर्त्तिः शैलदुर्गं शिवाजेः ॥ ३
भुवनविदितकीर्त्ते ! हिन्दुधर्मैकरश्मिन्
हत-निपतित-धर्म्मान् राजपुत्रान् स्ववंश्यान्।
यवन-कलित-देहान् मातृशान् भाग्यहीनान्
विमलय करजालैर्भारताकाश-सूर्य्य ! ॥ ४
त्वमसि यवनजेता राजपुत्रप्रधानम्
अहमपि तव वंश्यः कर्म्मणा म्लेच्छदासः।
मम वचनममान्यं यद्यहो सर्वथा ते
तव पितृसम-वृद्धः साहसादेव वच्मि ॥ ५
यदि च कपटसन्धिः क्षत्रियाणां निषिद्ध-
स्तदिह सरलसन्धेः प्रस्तुतं पत्रमेतत्।
सुतसम कुरु सन्धिं सम्यगारङ्गजेवै-
र्न खलु तव निवृत्तं युद्धकण्डूयनं स्यात् ॥ ६
त्वयि कृतवति सन्धिं नूनमारङ्गजेवो
यदवधि बलहीनस्तावदेवास्य सन्धिः।
प्रचुरबलसमेतः सन्धिमद्यैव भङ्क्त्वा
तत इह भविता ते हिन्दुसाम्राज्यमेव ॥ ७
त्वयि मम सुतभावो रामसिंहे यथास्ते
नसुलभगुणयोगात् स्नेहबन्धोऽधिको वा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमिह तव वश्यः स्नेहरज्ज्वा शिवाजे
मयि तव पितृभावश्चेदहं स्यां कृतार्थः ॥ ८
अकपट-जयसिंहस्यैतदालोच्य पत्रं
स्वयमयमुपतस्थे निर्विशङ्कः शिवाजिः ।
सकलसमरनीतिः पात्रभूतस्य तस्य
शिविरमुपगतः सन्नाह धर्मैकनाशम् ॥ ९
समधिककृतयत्नो राजपुत्राख्य-सेना-
पतिरतितरवृद्धो भीष्मवद् युद्धवीरः ।
कृतिवर-जयसिंहः पुत्रवत् तं शिवाजि-
मकुरुत निजमङ्के वेशयन् शान्तभावम् ॥ १०
त्वमसि हि मम पुत्रो धर्मतस्ते पिताहं
क्वचिदपि विषये त्वं रामसिंहात् समुच्चः ।
त्वयि जितवति विश्वं विश्वजित्-पुत्र-तातो
भवति हि जयसिंहो धर्मरक्षाव्रतात् ते ॥ ११
तव मुखमिदमद्य प्रेमवीरत्वयुक्तं
भवतु विजयलक्ष्मी-प्रोल्लसत्-कीर्त्तिकान्तम् ।
मम हृदि गगने तत् पूर्णचन्द्रस्वरूपं
विलसतु परिलुम्पद् हिन्दुचित्तान्धकारम् ॥ १२
त्वमिह हि चिरकालं भारते हिन्दुराज्यं
सुरमुनिजनसेवा-तत्परं शान्तियुक्तम् ।
यवनगणविनाशात् धर्मशीलं समृद्धं
सदयहृदयवृत्ते ! स्थापयन् वर्द्धयस्व ॥ १३
तव पितृसमवृद्धाः सर्वदाशास्महेऽद्य
बहुशत-शतवर्षान् जीवतात् त्वं शिवाजे ।
अपि सकलजनानां नन्दयन् चित्तवृत्तिं
रघुपतिरिव राज्यं सर्वथा संविधेहि ॥ १४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थलपथ-जयमात्रान्नैव साम्राज्यलाभो
जलपथमपि जेतुं भूरि-पोतान् कुरुष्व।
इति मतमुपदिष्टस्तेन राज्ञा शिवाजि-
रकुरुत रणपोतान् भूरिसंख्यान् ससैन्यान् ॥ १५

रसद-सकलभोज्यैर्लेह्यपेयैः समेतान्
अनुदिनमपि भुक्तैरक्षयं प्रापितैश्च।
गृहवसतिमुपेतैर्लभ्यते यः पदार्थः
सकलसमरपोतान् तत्पदार्थैश्च युक्तान् ॥ १६

बहुशत-शतसंख्यं दिव्यमाग्नेयमस्त्रं
बहुशत-शतसंख्या आयसोर्व्याः शतघ्नोः।
अलभत जलदस्यून् 'पर्त्तुगिज्' वीरवर्गान्
विषमसमरभूमौ संपराजित्य राजा ॥ १७

अपि स सकलमस्त्रं यत् पुनर्भारतीयं
बहुविधमपरास्त्रं बाहुवीर्य्येण लब्ध्वा।
शतमथ रणपोतान् षष्टिसंख्यांश्च वीरै-
र्जलपथमभिजेतुं प्रेषयामास वीरः ॥ १८

कति कति रणपोताः सागरे भासमानाः
बहुतर-नरसेव्यैः सत्पदार्थैः समेताः।
विविध-विपणियुक्ता मुक्तवातायनास्ते
स्थलभुवि बहुदुर्ग-भ्रान्तिमापादयन्ति ॥ १९

अमरसमशरीरैर्हिन्दुसैन्यैः समन्तात्
कृतविविधसुरार्च्चाः शेषनिर्माल्यपुष्पैः।
चित-बहुतुलसोकैर्विल्वपत्रैः समाल्यै-
र्बहुविधशिवलिङ्गैः काशिकान्तिं वहन्ति ॥ २०

हर हर शिव बम् बम् रक्ष मातर्भवानि
सुरहर नरकारे हिन्दुसाम्राज्यलक्ष्मीम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वितर वितर विष्णो तादृगुच्चारयन्तो
भ्रममिव जनयन्ते क्वापि वृन्दावनानाम् ॥ २१
बहुतर-रणपोताः सागरद्वीपतुल्या
नव-वसतिमुपेत्य भ्राजमानैश्च लोकैः ।
बहुविधमणिमुक्ता आददानांश्च सैन्यान्
वणिज इव विपक्षः सर्वदा धारयन्ति ॥ २२
शिववसतिमुपेता यक्षविद्याधराद्या
हरिहरगुणगानैर्यादृशं तोषयन्ति ।
सुरनरपशुवर्गानीश्वरप्रेममुग्धान्
शिवनरपतियोधास्तद्वदानन्दयन्ति ॥ २३
कमलदलजलाभं जीवनं सर्वजन्तून्
परिहरति निमेषाद् दृश्यतेऽद्यापि सर्वैः ।
न खलु गुणशरीरं कल्पकल्पान्तरेऽपि
व्रजति हि परिनाशं कीर्त्तिमेवार्ज्जयामः ॥ २४
समरविजयकीर्त्त्या भीष्मकर्णार्जुनाद्याः
बहुचिरमृतपूर्वाः सन्ति तेऽद्यापि लोके ।
चिरतरमितिहासा नाम यस्याश्रयन्ते
अमर इव स जीवन् जीवयेत् सर्वलोकान् ॥ २५
इत्थं निर्माय सैन्यान् स्थलजलसमरे सर्वदोत्साहपूर्वान्
निर्भीकान् धर्म्मरक्षाव्रतधृतमनसो देववीर्य्यप्रभावान् ।
संस्कुर्वन् सर्वदुर्गाण्यगणितपृतनाशस्त्रजालैरधृष्या-
ण्यात्मप्रीतः शिवाजिः समभजत सुरैर्हिन्दुसाम्राज्यलक्ष्मीम् ॥२६

—:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्ते सांख्याधिक्षेपपरतानिरासः

[निबन्धकः—श्रीशरच्चन्द्रभादुरी एम् ए वि एल्]

ईक्षामात्राद् वदति निगमो यत्कृपां सृष्टिरूपां
ध्यायं ध्यायं निखिलजगतां कारणं तं पराख्यम् ।
मायाधीशं मुनिजनमनोहारिणं ज्ञानगम्यं
ब्रह्मव्याख्या मननबहुला तन्यते भीतभीतैः ॥ १
इन्द्रादि-वन्दितं वन्दे भास्करस्यापि भास्करम् ।
मूढोऽपि यत्कृपालेशाददभ्रं पण्डितायते ॥ २
वेदव्यासं प्रणम्यादौ वेदविद्याप्रकाशकम् ।
प्रणम्य शङ्कराचार्य्यं महेशमूर्त्तिरूपिणम् ॥
संविमृश्य च तद्वाक्यं यथाज्ञानं यथाश्रुतम् ।
व्याख्याकृतां तथाऽन्येषां व्याख्येयं सुभिया कृता ॥ ३

महाभारत-श्रीमद्भागवतादिषु यदुक्तं कापिलमतमिति तत् तत्त्वानां क्रमविकाशादिविषयेषु नव्यसाङ्ख्यमतानुरूपमपि सेश्वरम् ईश्वराधीन-प्रकृतिवाचकञ्च । श्रीमच्छङ्कराचार्य्यपरमगुरुणा सयत्नं व्याख्यातत्वात् साङ्ख्यकारिका न भवितुमर्हति निरीश्वरा वा स्वतन्त्रप्रकृतिप्रतिपादिका वा । साङ्ख्यमतावलम्बी प्रकृतेरीश्वर-पारतन्त्र्यं यदि स्वीकुर्य्यात्, तदा भवति निर्दोषं साङ्ख्यमतमिति स्पष्टमुक्तं साङ्ख्यमतखण्डनावसरे भगवता शङ्कराचार्य्येण * । सूचितं भगवता साङ्ख्यसूत्रकारेण "प्रकृति-निबन्धनाच्चेन्न ; तस्या अपि पारतन्त्र्यम्" ॥ १।१८

---

* "अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्प्येत, यथाऽग्नि-निमित्तमयः-पिण्डादेर्दग्धृत्वम् । तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तम्"—इति ईक्षतिसूत्रभाष्ये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीन-भाष्यकार-टीकाकारैः साङ्ख्यसूत्र-साङ्ख्यकारिके यन्निरीश्वरवादपक्षे स्वतन्त्र-प्रकृतिवादपक्षे जीवात्मबहुत्ववादपक्षे च व्याख्याते तद् भ्रमात्मकमिति साङ्ख्यसूत्रादि-व्याख्यानावसरे प्रदर्शयितुं यतिष्ये।

परब्रह्मजिज्ञासूनां महाभाग्यवतां सम्बोधाय विभिन्नोपनिषद्वाक्यसमन्वयादि वेदान्तसूत्रैः सम्पादितं ज्ञानमूर्त्तिना भगवता वेदव्यासेन। श्रीमच्छङ्कराचार्य्य-निम्बार्क-रामानुज-मध्वाद्यैर्महात्मभिर्विभिन्नं व्याख्यातेष्वपि सूत्रेषु बहूनि सूत्राणि साङ्ख्यमत-निरसनपक्षे एकवाक्यतया व्याख्यातानि। ईक्षत्यधिकरणगतानि रचनानुपपत्त्यधिकरणगतानि च तेषु प्रधानानि। एतानि सूत्राणि यथा साङ्ख्यमतखण्डनपक्षे व्याख्यातानि श्रीमच्छङ्कराचार्य्यादिभिस्तथाऽस्मभ्यं न रोचते। अत ईक्षत्यधिकरणादि व्याख्यातुमस्माकमयमुद्यमः साधुभिः सदसद्विचारपरायणैः सम्यक् क्षन्तव्यः, विचार्य्याणि च सूत्राणि प्रोज्झिताधीतभाष्यटीकादिजनितसंस्कारैरिति सप्रश्रयं प्रार्थये।

ईक्षत्यधिकरणसङ्गमनाय तदुपक्रमप्रदर्शनाय च प्रथमं चतुःसूत्रीव्याख्यानं विधीयते।

१।१।१ "अथाऽतो ब्रह्मजिज्ञासा"।

ब्रह्मजिज्ञासुरेव एतच्छास्त्राधिकारी नाऽन्य इत्यायात्यस्मात् सूत्रात्। येन केन प्रकारेण सञ्जातायां ब्रह्मजिज्ञासायां भवत्यधिकारी ब्रह्मजिज्ञासुरिति बोद्धव्यम्।

किं-लक्षणं तद् ब्रह्म इत्याह

१।१।२ "जन्माद्यस्य यतः"।

"अस्य" जगतो "जन्मादि" सृष्टिस्थितिलयाः "यतो" यस्मात् कारणाद् भवति तद् ब्रह्म।

कथं गम्यते सृष्टिस्थितिलयकारणत्वं ब्रह्मण इति। प्रमाणं त्रिविधं प्रत्यक्षानुमानशब्दाभिधम्। ब्रह्म न प्रत्यक्षसिद्धम्। "न तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुर्गच्छती"त्यादिभ्यः श्रुतिभ्यः। नाप्यनुमानसिद्धम्। "यन्मनसा न मनुत" इत्यादिभ्यः। अतः, शास्त्रप्रमाणकमेव सृष्टिस्थितिलयकारणत्वं ब्रह्मण इति प्रदर्शयन्नाह

१।१।३ "शास्त्रयोनित्वात्"।

"ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः" इति श्रीमच्छङ्कराचार्यपादाः। शास्त्रञ्च "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व। तद् ब्रह्मेत्यादि। "अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते, अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्ती"ति। एवं "प्राणाद्ध्येव खल्विमानि भूतानी"त्यादि। एवं "मनसो ह्येव खल्विमानि भूतानी"त्यादि। एवं "विज्ञानाद्ध्येव खल्विमानि भूतानी"त्यादि भृगुवल्ल्यामेव। "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यान्ती"त्यादिषु छान्दोग्यादिषु श्रुतिषु अन्नप्राणमनोविज्ञानाकाशादिभ्योऽपि "जन्माद्यस्य" श्रूयते। अतो नासन्दिग्धं ब्रह्मण एव जगत्कर्त्तृत्वादिकमिति शङ्कां परिहरन्नाह

१।१।४ "तत्तु समन्वयात्"।

एतेषां श्रुतिवाक्यानां "समन्वयात्" "तत्" "तु" ब्रह्मैवास्य जगतः सृष्टिस्थितिलयकारणमित्यवगम्यते। वक्ष्यति च "आकाशस्तल्लिङ्गात्" श्रुतिसमन्वयात् कथमवगम्यते ब्रह्मण एव सृष्टिस्थितिलयकारणत्वमित्याह ईक्षत्यधिकरणम्।

१।१।५ "ईक्षतेर्नाशब्दम्"।

जगदुत्पत्त्यादि यथा ब्रह्मणस्तथा अन्नादेरपि आकाशादपि पूर्वोक्तेभ्यः श्रुतिवाक्येभ्यः श्रूयत इति सत्यम्। परन्तु अचेतनस्य अन्नाकाशादिकस्य "न" जगत्कर्त्तृत्वादिकम्। कुत इत्याह एतद् "अशब्दं" न श्रुत्यभिमतम्। कस्मादित्याह "ईक्षतेः" जगत्कारणस्य ईक्षितृत्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतेः छान्दोग्यादिषु, अचेतनानामन्नादीनां कस्यापि न भवितुमर्हति सृष्ट्यादिकारणत्वम्। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्म" ततश्च दृश्यते "अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते, अन्नेन जातानि जीवन्ति, अन्नं प्रयन्त्यभिसंविशन्ती"ति। एवं "प्राणाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यादि एवं "मनसो ह्येव खल्विमानि भूतानि जायन्ते" इत्यादि। एवं "विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यादिषु श्रुतिषु अन्नप्राणमनोविज्ञानादिभ्योऽपि "जन्माद्यस्य" सूत्रत्वाद् अचेतनानां तेषां व्यावृत्त्यर्थं सूत्रितम् "ईक्षतेर्नाशब्द"मिति।

"ईक्षतेर्नाशब्द"मिति सूत्रे तत्पूर्ववर्त्तिनि कस्मिंश्चिदपि सूत्रे "यतो वा इमानि भूतानि जायन्त" इत्यादिश्रुतयः तैत्तिरीयाद्यन्तर्वर्त्तिषु यत्प्रकरणेषु दृश्यन्ते तत्रापि वा नास्त्युल्लेखः इङ्गितं वा। अत एतत्सूत्रस्य साङ्ख्योक्तप्रधानव्यावृत्तिवाचकं दृश्यते यद् व्याख्यानं तन्न समीचीनमिति साधुभिर्बोद्धव्यम्।

"तत्तेज ऐक्षत ; ता आप ऐक्षन्त" (छान्दोग्य ६।२।४) इत्यादिषु दृश्यते अचेतनानामप्तेजआदीनामीक्षितृत्वम्। अतो नायुक्तमचेतनानां सम्बन्धिनी ईक्षितृत्वोक्तिः गौणी इति शङ्कामपाकरोति—

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्था:

		मूल्यम्			
२।	कालीतत्त्वम्—सटीकानुवादम्	साधारणानाम्	॥/०)	सदस्यानाम्	॥०)
३।	शङ्करीसङ्गीतम्	,,	।/०)	,,	।/०)
४।	मुक्तिवाद:—गदाधर-भट्टाचार्य्यविरचित:, सटीकाद्वय-भाष्यानुवादसहित:	,,	२)	,,	१॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,,	३।०	,,	६)
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा		१।०)	,,	१)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,,	।०)	,,	।/०
८।	कारकोल्लास:—भरत-मल्लिककृत:, सोदाहरण-कारकनिर्णयरूप:		/०)	,,	/०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गल-भाषाटिप्पणसमेता		॥०)	,,	।/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,,	।/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थ:	,,	१।०)	,,	१)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,	।/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्,,		॥०)	,,	।/०)
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्)	साधारणानाम्		सदस्यानाम्	
	श्रीकाशीपद-तर्काचार्य्यकृतम्	,,	१।०)	,,	१)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्		२)	,,	१॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विष्णो रथयात्रादि द्वादशयात्राप्रकृति-रूपम्		१)	,,	॥०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्		२।०	,,	२)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृती वैष्णवदर्शनग्रन्थ:		१।०	,,	१)

देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा बङ्गाक्षरमुद्रितनामानि बङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कृष्णनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समन्वया—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। उद्वाहतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्।

———

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M.A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.
Printed at
Siddheswar Press,
38, Vidyasagar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

१८५१ शकीये आषाढ़े | १२श-वर्षस्य ३य-संख्या

July, 1929.] | [Vol. XII, No. 3.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकः—श्रीदुर्गामोहन-भट्टाचार्य्यः, एम. ए.

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7 s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে সুরভিত ও কোমল করিবার জন্য

কেশ-রঞ্জন তৈল—



এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে ; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কথানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকর স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ —"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

July, 1929.	१८५१ शकीये आषाढ़े १२श-वर्षस्य ३य-संख्या	Vol. XII. No 3.

ब्रह्मकृपा हि केवलम्

[निबन्धकः—श्रीपुलिनविहारी वेदान्ततीर्थः]

ब्रह्मकृपा हि केवलम्।
शमन-दमन-सुखसम्बलम् ॥ १

श्रवण-मनन-निदिध्यासनशक्तम्
श्रोत्रिय-सद्गुरुसेवन-भक्तम्
वृणुते ब्रह्म वृणुते शर्म्म
अभयममलमतिमङ्गलम् ॥ २

पूर्णं भज पुनः पुनरपि मनसि
शुद्धं जप सदा सत्यं सदसि
कोऽहं केति नेति नेति
त्यज तु तामसमवमर्गलम् ॥ ३

यदि खलु विलसति मतिरुपनिषदि
गतिरपि सततं सुजन परिषदि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृत्युं जयति तद् यो वेत्ति
भजति गगननिभ-निष्कलम् ॥ ४

रहसि विचारय नित्यानित्ये
शम-दम-सम्पत्संभृतचित्ते
चिन्तय वेदं परिहर खेदम्
अनृतमक्षतमथ दुर्बलम् ॥ ५

सुखयति चित्तं विषयविलासः
क्षणमवशेषे विफल-विनाशः
मोहनिमग्नम् कुरु चिद्लग्नम्
मानसमनिशमतिचञ्चलम् ॥ ६

सलिलं तत्त्वं सरिति च कूपे
अवितथमित्यं न नामरूपे
ब्रह्माद्वैतम् बहुधा व्याप्तम्
कनकमिव कटककुण्डलम् ॥ ७

घटमठकुड्य-प्रभृति-विकाराः
वाचारम्भणमात्रमसाराः
तेषु सदात्मिका तत्त्वं मृत्तिका
अनुगतमविकृतनिर्मलम् ॥ ८

एवं सच्चित्-शक्तेः कार्य्यम्
हित्वा कारणमिहावधार्य्यम्
ब्रह्म विभाति बहु विदधाति
श्रुतिरिति निगदति पुष्कलम् ॥ ९

अशनायादिभिरनवच्छुप्तम्
दिगादिदेशैरनवच्छिन्नम्
अद्वयमेकं विश्वमनेकम्
विशति च विहरति निश्चलम् ॥ १०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जागरणेऽथ च निद्राश्रयने
सम्पदि विपदि स्वकार्य्यगमने
स्मर रे धीर !　　　　　साधक-वीर !
ॐ ॐ ॐ ॐ इत्यलम् ॥ ११

सार्वभौमो धर्मः

[निबन्धकः—श्री............　　　　　　]

"यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह।" "यतो वा इमानि भूतानि जायन्ते ··यत् प्रयन्त्यभिसंविशन्ति ॥"

इति श्रुतिवाचा विवेचितं, मतिगतिमतीत्य वर्त्तमानं, सूर्य्य-शशाङ्क-पावकैरप्यकल्पनीयं, चिरन्तनानन्दसन्दोहावेदकं, भूयसा प्रयत्य योगिभिः कथञ्चित् सहस्रदलाकारे हृदयकमले निर्वीजसमाधि-संयोग-विगलित-कालुष्य-धवले प्रत्यक्षीकृतं, प्रतिक्षणमनुष्ठीयमानैः कार्य्यकलापैर्विलोक्यमानैश्च कार्य्यजातैरनुमेयसत्ताकं, चेतनाचेतननिर्विशेषं पदार्थमात्रे विनिहितात्मरूपमेकमपि शतधा, सहस्रधा, लक्षधा च तड़ागे मन्दानिलाञ्चलचलद्वीचिचञ्चलजलभागे प्रतिफलितेन्दवीकलेव बह्वात्मना प्रतिभासमानं विजयते किमपि परमं धाम। अनादिप्रवाहपरम्परया चिराच्चङ्क्रम्यमाणे सर्गचक्रे निसर्गत एव प्राणिनां हृदयेषु दृश्यं दृश्यं विविधविधभयातङ्काशङ्कासङ्कासं प्रतिकूलवेदनीयं पदार्थमुपगच्छति करुणाश्मटांकारितः स्वसमर्पणात्मको यस्य ज्योति-स्फुलिङ्गः ; यदीयानुचिन्तन-लवेनापि सर्वथा क्षीणक्षीणाकारस्य बहुविधाधिपीडितात्मनो जनस्यापि हृदि जागर्त्ति काचिदाशालोकप्रसारिणी मोहतमोऽपहारिणी ज्योत्स्ना ; यतश्च संचसङ्गिर्लोकलोचनैर्मन्दाक्षमीलितैरिव परपीड़नादिरज्यते, तदखिल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेक्षावज्जिज्ञासागोचरं वस्तुतत्त्वं परमधामनाम्ना व्यपदिष्टमनुसन्धातुं बद्धपरिकराः समत्र प्रयतन्ते, प्रायतन्त, भाविनि च कति प्रयतिष्यन्ते। परमद्य यावत् कृताया अद्यत्वे च क्रियमाणाया गवेषणाया विवरणं तदीयं कार्यशक्त्युत्थापितं सत्त्वं विहाय प्रमाणान्तरमयोगिनां प्रत्यक्षानुभवावेदकमनुपस्थापयद् गवेषकाणामपूर्णकामतां समाक्ष्यमुद्घोषयति। वाणी यदीयं स्वरूपं वर्णयितुमुत्कापि मनसो निदेशं प्रतीक्षमाणा, भर्त्तुरनुज्ञामनुपालयन्ती कुलकामिनीव चिरायते ; चिरचर्चयापि वा मनःसहचरी वाचा नालं भवति तदीयं रहस्यजालमुद्घाटयितुम्, मनसा परे पारे परिनिष्ठितो विप्रादाचर्मकारं प्रतिशरीरं कृतनिवासः—अनिर्वाच्याविद्याद्वितयसचिवः स कश्चनास्त्येव द्रष्टव्यः श्रोतव्यो मन्तव्यश्च। परःसहस्रं ग्रन्थाः सङ्ख्यातीताश्च निबन्धा अस्माकं चक्षुषोरग्रे सम्प्रति सन्ति, येषां रचनाया लक्ष्यं तदेव परमात्मनो रूपम्। भगवती श्रुतिस्तमेव गायन्ती शाखासहस्रैरक्लान्तभावेन समन्द्रमन्थरं समुद्रमभियान्ती सुरसरिदिव चकास्ति, स्मृतयश्च तद्रश्मिरञ्जितामिव दिशमनुधावन्त्यो मरुमरीचिकयातर्कितमनिलमभि क्रियमाणाः कस्तूरीहरिणा इव विलोक्यन्ते। "बाइबिल"-"कुरान"-प्रभृतिभिर्भारतेतरनीवृदधिवासिनां मान्यतमैर्ग्रन्थैरपि स एव भगवान् जगन्नियन्ता प्रार्थ्यते, कल्याणाय चानुनीयते। ये च कियन्तश्चन परमां शान्तिमन्वेष्टुं प्रयस्य स्वस्य मालिन्याद्वा, स्वान्तःकरणस्य चापल्याद्वा तच्चानधिगत्य पदार्थमिष्टं रिक्तहस्ताः परावर्त्तन्ते, तेषां चार्वाकादीनां तमःकलिला बुद्धिरैहिकेष्वेव स्रक्चन्दनवनितादिषु प्रचरन्ती तानेव विषयान् बहुमन्यमाना तेष्वेव लिम्पति। एवं क्रमेण प्रस्थानभेदात्— "यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनः" इति नयेन स एव परमात्मा बह्वीषु भूमिकास्वभिनीयमानः—'उल्लेखालङ्कारमुज्ज्वलयन्' सत्त्वरजस्तमोमय्या प्रकृतिवैचित्र्यविलसितया बुद्ध्या तत्तद्रूपेण परिचीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिल-नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥"

इति प्रतिपादयन् पुष्पदन्तः सर्वेषामेव ऋजुकुटिलनानापथजुषां पयसामिकत्र तोयनिधौ निधानमिव विश्वेषां दर्शनादिकृतामेकत्रैव परमकारुणिके वैषम्य-नैघृण्य-पङ्कसम्पर्करहिते क्वचन परमात्मनि विश्रान्तिरिति मतं सर्वथानवद्यं प्रस्तुवंस्तमुपतिष्ठते।

"अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदः।" इत्युपनिषदा श्रुतेरादिकारणत्वेन प्रतिपादितं परमात्मानं विशकलय्य निरूपयन्ति दर्शनानि, पुराणानि, धर्मशास्त्राणि च पार्थक्येन व्यभज्यन्त; तथ्या एव च सूक्ष्मो विषयो विस्तरेणोपपाद्य सर्वेषां सुखावबोधाय सप्रपञ्चमेषु महर्षिभिः स्थापितः। यद्यपि ग्रन्थेष्वेषु लौकिक-पारलौकिकभेदमादाय, तत्रापि च प्रातिस्विकविषयान् राजनीत्यर्थनीतिधर्मनीतिप्रभृतीन् विसृश्य प्रदर्शिता भिन्नतयैव समस्ता विषयास्तथापि तेषां परम्परयोपसंहारस्तत्रैव निखिलाभिवन्द्ये परमात्मतत्त्वेऽवसीयते—इति विषयः

"कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्।
करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत् तत् ॥

इति दिशा विचारयितुमुपक्रम्यते। तर्ककर्कशप्रणाल्या गभीरतर-विचारशृङ्खलया च प्रायशः पारलौकिकीं सामान्यतस्त्वैहिकीं मर्यादां प्रतिपादयतां ग्रन्थानां मध्ये दर्शनानामेव गणना प्राथमिकी। भारतीयदर्शनानामपि चार्वाकादीनामक्षपादादीनाञ्च प्रस्थानभेदादास्तिकनास्तिकभेदविधया द्विधा भवति निर्वेदितो मार्गः। आस्तिकदर्शनेषु यथा वेदान्त-न्याय-सांख्य-वैशेषिक-योग-मीमांसारूपाणां षण्णां प्राधान्येन तदितरेषाञ्च पाशुपतादीनां साम्प्रदायिकदर्शनत्वेनैकदेशि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया च गौणत्वेन भवति व्यपदेशस्तथैव नास्तिकदर्शनेषु चार्वाक-सुगत-क्षपणकादीनां मतस्य दृश्यते परिगणनम्।

तार्किकपितामहो भगवान् गौतमः प्रमाणप्रमेयसंशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव तर्क-निर्णय वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति निग्रहस्थानानां षोड़शपदार्थानां परमेश्वरानुग्रहवशाद् वैशद्य-मुपगतेन ज्ञानेन दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामभावे निःश्रेयसं चिन्तयन् साटोपं विप्रतिपन्नपुरुषप्रतिपादकत्वेन प्रवृत्तिहेतुत्वेन च प्रमाणमुपाहृंहयत्। स हि जगतः सचराचरस्य कारणं परमाणु-मीश्वरश्च निर्दिश्यात्मनः सगुणत्वमारम्भवादञ्च साधयति।

कणादः—द्रव्यगुणकर्मसामान्यविशेषसमवायरूपैः षड्भिः सप्त-भिर्वाभावसहितैः पदार्थैः समस्तं जगत् स्थितं विभावयन् गौतमप्रदर्शित-मेव सिद्धान्तमभिप्रैति। उभयेषां मते परलोकप्रतिपादनं पुनर्जनि-श्चाविरुद्धे।

कपिलस्तु—परिणामवादमवलम्ब्य दुग्धदध्यादिन्यायेन परिणममानां पञ्चविंशतितत्त्वात्मिकां प्रकृतिं जगतः कारणत्वेनाभ्युपगम्य तत्र चैतन्या-भिनिवेशाय पुरुषसंसर्गमाध्यासिकं कल्पयति। सत्कार्य्यवादञ्च समाद्रियते। कार्य्यकारणयोस्तादात्म्यम्, आत्मनः कूटस्थत्वं बहुत्वञ्च, प्रकृतेर्नैत्त्कौसादृश्यमिति तस्य सिद्धान्तः।

पतञ्जलिः—कपिलस्याचार्य्यतां सहयोगेन समर्थयन्नपि भगवतः परमेश्वरस्य स्वीकृतौ ततः प्रविरज्यमानः प्रकृतिपुरुषातिरिक्तं षड्विंशं तत्त्वं तयोर्नियामकं क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषविशेषं मन्य-मानः—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनामनुशी-लनेन परमेश्वरप्रणिधानेन च सत्त्वपुरुषान्यथाख्यातौ सम्प्रज्ञाता-सम्प्रज्ञातसमाधिद्वारेण कैवल्यमाह। तच्चेदं पातञ्जलं हेय-हेतु-हान-हानोपायप्रतिपादनमिषेण भगवता चतुर्व्यूहं गीतं कृष्णद्वैपा-यनेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैमिनिर्वेदानामपौरुषेयतां सप्रमाणोहापोहं प्रसाध्य कर्म्मकलापपरम्परया दुःखासंभिन्नमनन्तरञ्चाग्रस्तमभिलाषोपनीतं स्वर्गसुखमुपस्थापयन् यागादिकेषु सांसारिकान् प्रेरयति, तैस्तैश्च यागैस्तांस्तान् दिव्यभोगान् प्रमाणयन्—तत्र लोकानुत्कयति। स चायं ज्ञानविप्रतीपमीश्वरञ्च प्रकारान्तरेण निरस्यन् कर्म्मणो महत्त्वं स्थापयति।

भगवान् कृष्णद्वैपायनस्तु—जीवब्रह्मणोर्भेदवादमविद्यानिबन्धनं प्रख्याप्य समुद्रगर्भादुत्पद्य तत्रैव विलीयमानानां तद्विकाराणां तरङ्गावर्त्तबुद्बुदादीनां सत्त्वमिव जगतः सत्तां परमात्मनः सकाशान्मन्वानो विवर्त्तवादपथेन सत्कार्य्यमर्य्यादया चात्मसिद्धान्तमव्यग्रं प्रतिपादयति। तदनुयायिनां मते परमार्थिकं वस्तु केवलं शुद्धमद्वैतं ब्रह्म, इतरेषां पुनः व्यावहारिकमाध्यासिकं वा सत्त्वमिति तेषामुद्घोषः।

इहापि वेदान्तदर्शनप्रतिपाद्ये परमात्मसत्त्वे केचन विशिष्टाद्वैतशुद्धाद्वैत-द्वैताद्वैतादिभेदात् विविधमार्गानुसारिणः स्वमतमन्यथा समर्थयन्तोऽभ्यवतिष्ठन्ते भक्त्युपासनोपकल्पितभेदाश्च दृश्यन्ते।

"सत्यपि भेदापगमे नाथ ! तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥
"सर्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥"

इति रीत्या च भगवता प्रतिपादितं राद्धान्तमात्मनः पक्षसिद्धये भागवता ब्रह्मवादिनश्च निक्षिपन्ति।

तदेवं सामान्यतो दर्शनानां सिद्धान्तप्रकारे निरुक्ते तेषां विशिष्टमपि वक्तव्यं निरूप्यमाणं भवति। नैयायिका यथा परिणामवादं न सहन्ते तथैव साङ्ख्यास्तेषामारम्भवादमपि सर्गौपयिकममत्वा नाद्रियन्ते। आत्मनि सुखदुःखादीनां स्थितिं स्वीकुर्वन्तः काणभुजा जपाकुसुमसंसर्गात् तल्लौहित्ये काचफलके प्रतिफलति सत्यपि काचगतं स्वच्छशुक्लभावमव्याहतं विलोकयद्भिः सुतरां ब्रह्मणोऽविद्यासंसर्ग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतितस्यात्मनोऽस्य नैर्गुण्यमौदासीन्यञ्च मन्यमानैर्वेदान्तिभिः साङ्ख्य-योगविद्भिश्च विवादमारभन्ते। साङ्ख्यैः समं यत्र तत्र संवदन्तोऽपि वेदान्तभक्ताः पुरुषबहुत्वं, जगतः प्रकृतिमूलतां, द्वैतवादञ्चावहेल-यन्ति। मीमांसकानां कार्य्यजन्यो लोकः अपूर्वभावनाभावितस्तार-तम्ययुक्तं सुखं प्रसूते, प्रतिद्वन्द्वितासहचरं च स्वर्गं जनयतीति यागादिक-मविशुद्धिक्षयातिशययुक्तं प्रतिजानानाः साङ्ख्यवेदविहितपद्धत्या कर्म्ममार्गमनुशासतं जैमिनिमधिक्षिपन्ति। एवमेव यत्र क्वचन सत्यपि विरोधसद्भावे ऐकमत्यञ्चापि नैव नास्ति। परलोकसिद्धौ देहात्मतादि-खण्डने च सर्वेषां साजात्यमेवायातीति सामान्यविशेषतया विरोधः साम्यञ्च स्फुटं प्रतीयेते।

सम्प्रति विचारणीयमेतद् भवति—किं तथ्यमेवैषां सरणिः पृथङ्मुखी? वास्तविकश्च किमेषामेष विभेदः? तदा तु प्रतिवचने ब्रूमः—अङ्ग! एकस्मादपरस्य विभेदो न साधनीयः, साम्यमेवापादनीयं यत्र क्वचिद् किञ्चिद् भवति। इहापि सम्प्रवर्त्तितविचारा वयं यदैषां मूलभूतं विज्ञानं श्रुतिमनुसन्दध्मस्तदा स्पष्टमिदं विज्ञातं भवति—तत्र नास्ति कोऽपि भेदवादो नापि वा भ्रमापादकः कोऽप्युपदेशः। यत्र भेषजं वदता मनुना—"श्रुतिद्वैधन्तु यत्र स्यात्" इत्यादि प्रतिपादितं, किञ्च —"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि"त्यादि च यज्जैमिनि-रसूचयत् तस्य श्रुतिस्मृत्योर्विरोधे श्रुतेः प्राधान्यस्य श्रुतीनां स्मृत्योर्वा परस्परं जायमाने विरोधे उभयोरेव प्रामाण्यस्य मान्यतया करणीयस्य ख्यापनं विवक्षितमिति वाग्भिः श्रुतिविरोधो नोन्नेयः। भगवत्या त्रय्या लोककल्याणायैव भगवतोन्नीतया न खलु प्रमादपरया भवितव्यं नापि वा सिद्धे वस्तुनि यथाकथञ्चिद् यत् किमपि समालपनीयमिति— "उदिते जुहोत्यनुदिते जुहोती"त्यादिभेदवादस्य सामञ्जस्यमुखेन कृतार्थतया निःसंशयं वचः। कर्म्मज्ञानोपासनाकाण्डात्मिका त्रयी मन्त्रभागेण कर्म्मकाण्डमुखेन यागादावुपकरोति, ब्राह्मणभागेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रार्थानामितिकर्त्तव्यतां ज्ञापयति, उपनिषद्भिश्च परमात्मप्रणिधानमात्मानात्मविवेकञ्च प्रस्तौति। सेयं यथा कालक्रमेण बहुशाखा समपद्यत, विभिन्नाश्चास्यास्तथैव प्रावर्त्तन्त व्याख्यात्मिका निबन्धाः ; परमद्याप्येतस्याः प्रतिपाद्यमक्षुण्णं रक्षन्तो बहिरागतेभ्यः कादिशीकेभ्यश्चेमामबाधितां ख्यापयन्तस्तदनुयोजितेनैव पथा च सञ्चरमाणा आचार्य्या भवन्तीति तेषां मतालोचने महानेषोऽवलम्बः। उपर्युक्तानां दर्शनानां लक्ष्यभूतं किमपि परमार्थतत्त्वानुसन्धानं प्राणिनामार्त्तिनाशाय मोक्षाधिगमश्चेति प्रागेवावोचाम। अवश्यमेव तेषां क्रमे विवेचनदिक्षु च विभिन्नमन्तरं पश्यामः। यतश्च ज्वरापनोदनाय ज्वराङ्कुश-मृत्युञ्जय-लक्ष्मीविलासादीनामौषधानां यथावस्थं श्रूयते व्यवस्था पृथग्गुणानां, तथैव दुःखध्वंसाय लोकानां प्रवृत्ता आचार्य्याः स्वानुभवानुमानज्ञातैः पथिभिर्बहुभिर्गता अपि पुनरेकत्रैव सम्मिलन्ति। यथापि वायुयानविमानादिना होरामात्रेणैव गमनीयं स्थानं वयं धूमवाष्पयानैः शकटिकया च यथाक्रमं चिरेण चिरतरेण च कालेन समासादयामस्तथैव कर्म्मकलापेनोपासनया विवेकेन च तदेव वस्तु लब्धव्यं भवति ; अपेक्षितः केवलं तत्र तीव्रस्तीव्रतरश्च संवेगः। साधनभूतानामङ्गानां सिद्धये निरूपणाय च साडम्बरं प्रपञ्चपुरःसरमुपवर्णितानां सर्वेषामवान्तरपदार्थानामसत्यपि प्राधान्ये स्थूलतो भवत्येव प्रकर्षः प्रमाणयोग्यता च प्रातिस्विकी। अध्यात्मविचारचिन्तायां तर्कसाधनभूतान् प्रमाणादीन् पदार्थान् सावशेषनिर्विशेषं प्रमाणयन् नैयायिको न भवति तथा श्रद्धाभाजनं विदुषां, यथा कापिलः। अथापि कापिलस्य पुरुषसाधनवत् नैयायिकस्य प्रामाण्यवादव्यवस्थापनं सर्वेषां हृदयहारि भृशमनुसरणीयञ्च भवति। कापिला हि यत्र सूक्ष्मेक्षिकयात्मानं विविचयन्ति "ह्यसङ्गोऽयं पुरुषः" इत्यादिश्रुतिप्रतिपाद्यञ्च संगमयन्ति, तत्र नैयायिकाश्चार्वाकादीनां सन्देहशङ्काकीलमुन्मूल्य "देहाद्भिन्नो देही"ति व्यवस्थया प्रतिपादयन्ति। अतश्च सोपानपौर्वापर्य्येनयेन न्यायसांख्ययोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षमीक्ष्यमाणोऽपि वस्तुगतो नास्त्येव भेद इति प्रतिपन्नं तर्केणेयं निर्वर्त्याव्यक्त केन पथेति साधनायैव तर्कशास्त्रस्य मुख्यतो विनियोगात्। तथा च वेदप्रतिपाद्यस्य ब्रह्मणः परमात्मनो वा न्यायदर्शनं साधन-परम्परया परिचये भूरिश उपकुरुते—इति तदीयोहापोहसरणिः काणादस्य चानुमितिसिद्धान्तः प्रधानो विषयः। इत्थमेव साङ्ख्या यत्र प्रकृतेः प्राधान्यं पुरुषस्य च निर्लेपतां प्रदर्शयन्ति, तत्राद्यस्य मतस्या-नङ्गीकारेऽपि परं परं गृह्यते। यद्यपि साङ्ख्यैर्महता समारम्भेण प्रतिपादयितुमुपक्रान्तं प्रधानं प्रधानवद् भासमानं चमत्कुरुते, परन्तु चैतन्यस्वरूपे पुरुषेऽवगतमात्र एव तस्य (प्रधानस्य) सर्वस्वं विलीय-मानं तदीयं मायामयमकिञ्चित्करं रूपं परिचाययति। सूर्यस्य तेजसि क्रमेणाकृष्यमाणे चन्द्रमसो ज्योतिर्विजयते परं तदेव तदभावे कदा-चिच्च सर्वात्मना लोपमुपेतं समस्तमेव निपातयत्यन्धतामिस्रे जगज्जालम्। सुतरां साङ्ख्यानां यथा सत्कार्यवादो मनोरमः यथा च सर्गप्रक्रिया मञ्जुला न तथा ईश्वरस्य सिद्धिरिति विमृश्यैव योगज्ञानैकचक्षुषा भगवता पतञ्जलिना परमात्मनः सत्त्वं महता प्रयासेन प्रतिष्ठापितम्। यौगिकीं क्रियां प्रत्यक्षमेव निभालयतां ततश्च विहितात् सिद्धिं विन्दतां महात्मनां प्रभावमनुभवञ्च विभावयतो जनस्य हृदि सोऽयमुक्तप्रकारो योगिनां परमात्मसिद्धेस्तार्किकाणां क्षित्यादिसकर्तृकत्वानुमितिमहत्त्वं तिर-यति। यश्च पुनर्जैमिनीयानां सिद्धान्तः स सम्प्रति यागाद्यनुपयुक्तसमय-त्वादसम्भवत्वपालने लोकान् नोपकुर्यादिति केवलं तेषां कर्ममार्गानु-सरणं शरणम्। ते हि धर्मस्य फलं स्वर्गीयं निरतिशयसुखं वदन्तः कर्मणि लोकान् व्यापारयन्ति, ततश्च धर्मोन्मुखी प्रजा पापेभ्यो विरत-पदा श्रेयसे चेष्टते। मन्त्रभागस्योपयोगयाथार्थ्यं प्रचारयतामेषां—"तद् यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते।" इति श्रुतेः स्वर्गस्यापि दुःखजनकतया स्वर्गसुखानन्तरं पुनर्जननेन च, मीमांसकानां लक्ष्यमितरेषामेकान्तात्यन्ततोऽभावा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्मकं दुःखत्रयस्य प्रच्यवमानमपेशलं भवति। इदमुक्तं भवति—यो हि यस्य प्रधानो विषयस्तत्र तस्य प्रामाण्यम्, इतरस्मिन्नंशे तस्य पुनर्गौणत्वम्, 'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। एतदेव रहस्यमधस्तनीनां सूरिसूक्तीनामप्यनुशीलनतः प्रकटमुन्नीयते।

(क्रमशः)

वर्षबिन्दुः *

[निबन्धकः—इ. वि. रामशर्म-नम्पूरी]

अयं वियत्तः प्रपतत्यधोऽधो, हा! हन्त! केनापि विनाश्रयेण।
कालप्रभेदादवशश्च कोऽपि कल्याणमूर्त्तिः सलिलस्य बिन्दुः ॥१

नभस्तले मञ्जलमौक्तिकाभं सचेतनासेचनकत्वशस्तम्।
लसन्तमेनं तु निहत्य वक्षं कस्योन्नतं पातयितुं पदाऽधः ? ॥२

कस्त्वं ? सुरद्रोर्निपतन्निवात्र निर्ह्रन्तबन्धो मुकुलप्रवेकः।
मन्दाकिनीसैकतभूमिभागात् प्रभ्रष्टहंसाण्डतराण्डतुल्यः ॥३

विधातृयानद्विजचञ्चुनिर्यत्सिताम्बुजस्वादु-मृणालिकेव।
श्वेतातपत्राच्चुटिता बलारेर्हारस्फुटस्फाटिकखण्डिकेव ॥४

स्थानात्प्रमाद्याम्बरचत्वराद्राग्धः समागच्छदिवोडुरत्नम्।
पुण्यक्षये हन्त! विहाय नाकं भूलोकगामी सुमना इवापि ॥५

आयासि शङ्के शिशिरानिलात्तो गङ्गामृतोद्यत्कणतल्लजस्त्वम्।

---

* इदन्तु काव्यं 'कवितिलक' प्रभृति बहुबिरुदभूषितानाम्, M.A. B.L. M. R. S. L. इत्याद्युपाधिधारिणां बञ्चिमहामण्डलप्रधाननगरे स्यानन्दूरपुरे उपमन्त्रिपदे शशोभमानानाम् 'उळ्ळूर् परमेश्वरय्यर्' महाशयानां केरलभाषाललितिषु कृतमत् संस्कृतभाषया अनूदितं केरलभाषान्तर्गतः पद्यसाहित्यभागः कियन्तमुत्कर्षमेभिर्महाकविभिरभिगत इति सर्वेषां सुखावबोधाय सहृदयशिरोरत्नानां सादरं प्रकटीक्रियते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नो चेत् सदोदीर्णमदाम्बुशुभ्रदैरावतश्रीकर-शीकरस्त्वम् ॥६
मधुव्रतास्वादितशेषभूतो मन्दारमाध्वीककणिकावतंस: ।
पुलोमजाङ्गेषु सखीप्रयुक्तं गन्धद्रवाम्भःपृषतप्रकाण्डम् ॥७
दत्तस्य वाचस्पतये मघोना पाद्याम्बुनः पावननव्यबिन्दुः ।
स्वर्गस्थपीयूषघटात् स्फुटोद्यद्दिसंष्ठुलश्चोरसि नर्त्तितोऽश: ॥८
नैव त्वमाशाङ्गनयाऽसि मङ्क्त्वा मृष्टा जलं संशयिलं प्रधूते ।
कालाम्बुदश्यामलकेशपाशे ततस्तुरत: कोऽपि पयःकणोद्व: ॥९
निजोदरे त्वां तव सोदरांश्च कादम्बिनी कम्रमुखी वहन्ती ।
कियद्दिनान्यत्र न सा न्यवात्सीत् सुपर्वपादाङ्कितपुष्करान्ते ॥१०
कियद्दिनात्प्रागगनेचरास्तन्मङ्गल्य सीमन्तमहामहे ताम् ।
अभूषयन् केन न भूषणेन विद्युद्युराट्चापविनिर्मितेन ॥११
कादम्बिनी सा दिवि सन्महेन्द्रनीलाग्रनिष्कत्वमिता यदासीत् ।
कल्याणतद्दर्शनमेकमक्ष्णो: कालाञ्जनालेपनकान्तिदायि ॥१२
तथाविधाया नवकालिकाया यूयं प्रबालच्छविकालिकाया: ।
पुण्योदरं प्राप्य विभूषयन्त: पुष्टा: कियद्वत्तबलर्चरूपा: ॥१३
पूर्णाऽभवद् गर्भदशाऽम्बिकाया: क्रमेण निर्वृत्तमपत्यजन्म ।
तदाऽस्मदक्ष्णां विषयस्तु कोऽपि सन्तानगोपालकथाप्रभेद: ॥१४
सञ्जातमात्रा: सकला: समन्तात् पतन्त्यधोऽध: शिशवश्च हा ! हा ! ।
नाके न कस्याप्यधिवासयोगो भवानरिष्टाभिध-सर्वशून्य: ॥१५
अयं सविद्युद्वलयं क्व भूय: प्रसारयस्यद्य पयोदमाले ।
गता: सुतास्ते समयस्तवायं सर्वस्वपाटच्चर एव जात: ॥१६
सह्याद्रिशृङ्गोपल इत्युदीता घनाघनस्यास्तमिताऽथ कीर्त्ति: ।
वर्षा-वधूटीकरपल्लवे स सुस्नच्णसंशोधनवस्त्रमद्य ॥१७
कोऽप्याकलय्यौषधिमन्त्ररग्निमायोज्य मेघाश्मघटां भिनत्ति ।
त्रुटन्ति नाडीनिनदास्ततोऽधस्तुषारगौरं समुदेति चाम्भ: ॥१८
जन्मक्षणे हन्त निजां प्रसूतिं हित्वाऽथ नक्षत्रपथाद्भवन्त: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनन्धयाः क्षिप्रमधः पतन्ति महत्त्वका ! मध्यमलोकपान्याः ॥१९
संवाहनोल्का अमरर्षयो वः कृत्वा जिगासन्ति सुरस्त्रियोऽङ्के ।
स्तन्यं प्रदातुं सुरभिश्च साशा तथा भवन्तस्त्वभिजातरूपाः ॥२०
तत् किं ब्रवीम्यद्य रटत्वजस्रमाक्रन्दनं निष्फलमम्बरान्ते ।
नास्त्येव तेषां भवतां च सत्यमितः परं कश्चिहणानुबन्धः ॥२१
सद्योतरोऽयं घनपुत्रशोकः कादम्बिनीमातुरितः क्रमेण ।
दिक्कामिनीनां निटिलान्तरात् तत् कस्तूरिकाचित्रकमुद्धृतं स्यात् ॥२२
अयं लघुबिन्दुरपीश्वरस्य रूप्योद्भवागार ! न किं त्वदुत्थः ।
वयं त्ववोचाम तदेकदेशमन्यत्र भागेऽस्त्यपरो विलेखः ॥२३
एह्येहि हे ! मक्षख ! वत्स ! युष्मत्सम्प्राप्तिरस्मत्पुरुपूर्वपुण्यात् ।
आगन्तुकोपासकनैकलोका ब्रूमो वयं स्वागतमादरेण ॥२४
नीहारकालेऽवसिते कदाचित् स्नातुं गतः सायमिनोऽपराब्धिम् ।
अभूददृश्यः परचित्रभानुर्जातः प्रभाते बडवामुखाग्निः ॥२५
चुल्लयां निधायाण्डकटाहमाज्यं प्रक्षिप्य तत्राग्निमधश्च चित्वा ।
हे 'सू'र ! सम्भर्जयतोऽथ लोकं स्थानेऽत्र रेफस्य तु ते 'द'कारः ॥२६
निदाघकाले दिननाथकृप्तां पञ्चाग्निमध्यस्थितिमेत्य लोकाः ।
द्रुतस्य बिन्दोरमृतात्मकस्य नवावताराय भृशं प्रतप्ताः ॥२७
जीमूतभावाज्जनतापवह्निधूमोत्करो विष्णुपदे व्यलागीत् ।
करान् सहस्रं वहतः सतः सा नीलाञ्चिताऽधो न्यपतत्पताका ॥२८
तस्यावलेपप्रशमाय शम्या-पीताम्बरं श्रीकरमादधानः ।
नीलाम्बरोपान्तगतो व्यलासीच्छार्ङ्गेन्द्रचापेन च कृष्णमेघः ॥२९
तज्जीवनाधारगलोद्गतस्य गीतामृतस्य प्रथमाक्षरं त्वम् ।
अशेषलोकस्य हृताऽर्त्तिरित्थमावेदकः कश्चिदमर्त्यदूतः ॥३०
सरोवरान्तर्गतपङ्कजातादुद्यत्सिताम्भोरुहकुड्मलस्त्वम् ।
त्वमेव सन्मेचकपेटकस्था महाह्निका हीर-मतल्लिकाऽपि ॥ ३१

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्ते सांख्याधिक्षेपपरतानिरासः

(पूर्वतोऽनुवृत्तः)

[निबन्धकः—श्रीशरच्चन्द्रभादुरी एम् ए. बि. एल्]

१।१।६ "गौणश्चेन्नात्मशब्दात्"।

"तदैक्षत"त्यादिषु न ईक्षितृशब्दो गौणार्थे प्रयुक्तः। कुतः "आत्मशब्दात्"। प्रधानस्याचेतनत्वमवलम्ब्य यथा व्याख्यातमेतत्सूत्रं भाष्यकारादिभिस्तथा अन्नप्राणादेरचेतनत्वमवलम्ब्य अस्माभिर्व्याख्यातम्, अतो वस्तुत एतयोर्व्याख्यानयोरभेदः, एतत्सूत्रस्य परवर्त्तिनः त्रस्य च। "कुत एतदात्मशब्दादीक्षतेरगौणत्वमित्यत उत्तरं पठति।

१।१।७ "तन्निष्ठस्य मोक्षोपदेशात्"।

मोक्षोपदेशश्छान्दोग्यादिषु। (छान्दोग्य ६।१४।२।६।१५।१—३) अथ प्राणादितो न "जन्माद्यस्य" कुतश्च हेत्वन्तरादित्यत आह—

१।१।८ "हेयत्वावचनाच्च"।

"हेयत्व"-रूपम् "अवचनं" निन्दा तस्मात्। "ईक्षतेर्नाशब्द"-मिति सूत्रेण यद् व्यावृत्तं तदन्नादिकं न प्रधानमित्येतत्सूत्रात् सुस्पष्टमवगम्यते। "महतः परमव्यक्तमव्यक्तात् पुरुषः पर" इत्यादिषु श्रूयत आत्मनः प्रधानस्यावरत्वम्। न श्रूयते कुत्रापि प्रधानस्य "हेयत्वावचनम्" "श्रुतिस्मृतिपुराणानामालयेन" श्रीमच्छङ्कराचार्य्येणापि एतत्सूत्रभाष्ये नोद्धृता काचिदपि प्रधान-"हेयत्वावचन"परा श्रुतिः। अपि तु श्रूयते भृगुवल्ल्यामेव "भृगुर्वै वारुणिः वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति तस्मा एतत् प्रोवाच "अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तं होवाच यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व। तद्ब्रह्मे"ति। स तपोऽतप्यत। स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। तद् विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। तपोऽतप्यत। स तपस्तप्त्वा मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपस्तप्त्वा विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपस्तप्त्वा आनन्दो ब्रह्मेति व्यजानात्। अत्र श्रुतिः प्रथममरुन्धतीन्यायेन अन्नादिकं ब्रह्मत्वेनोपदिश्य पश्चात् अन्नादीनां हेयत्वं स्पष्टमुवाच। अन्नहानेन प्राणम्, प्राणहानेन मनः, मनोहानेन विज्ञानम्, विज्ञानहानेन आनन्दं सृष्टिस्थितिप्रलयकारणत्वेनोपदिदेश। "ईक्षतेर्नाशब्द"मिति सूत्रेण यद् व्यावृत्तं तस्यैव "हेयत्वावचन"मस्मिन् सूत्रे उक्तमिति सुस्पष्टमवभाति। "हेयत्वावचनं" न श्रूयते प्रधानस्य। श्रूयते हि अन्नप्राणादीनाम्। अत "ईक्षतेर्नाशब्द"मिति सूत्रेण व्यावृत्ता अन्नप्राणादयः, न व्यावृत्तं कपिलप्रोक्तप्रधानमिति समायातम्। सूत्रस्थ "च" शब्दो ब्रह्मप्रतिपादक-कारणसमुच्चयार्थ इति मन्ये। अपि तु "'च' शब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थ" इति श्रीमच्छङ्कराचार्यपादाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा सत्यपि प्रस्ताविते ऽस्मिन्नर्थे नापतति को ऽपि दोषः। एतदनन्तरं दृश्यते निम्बार्कभाष्ये "प्रतिज्ञाविरोधा"दिति स्वतन्त्रसूत्रम्।

१।१।६ "स्वाप्ययात्"।

१।१।१० "गतिसामान्यात्"।

१।१।११ "श्रुतत्वाच्च"।

प्रधानस्याचेतनत्वमवलम्ब्य यथा व्याख्यातमेतत्सूत्रत्रयं भाष्यकारादिभिस्तथा अन्नप्राणादीनामचेतनत्वमवलम्ब्य अस्माभिर्व्याख्येयमिति बोद्धव्यम्।

इतीक्षत्यधिकरणं समाप्तम्।

अथ रचनानुपपत्त्यधिकरणम्।२।२।१-१०

१। "रचनानुपपत्तेश्च नानुमानम्"।

शब्देतरप्रमाणेन केनचित् "न" भवति "रचनोपपत्ति" रतो "नानुमानं" भवितुमर्हति प्रमाणं ब्रह्मकर्त्तृकाया जगद्रचनायाः। अत्र न काचिदप्यपेक्षा "अनुमान"शब्दस्य प्रसिद्धार्थहानेन साङ्ख्यशास्त्रकल्पनायाः अपि तु एतत्सूत्रार्थं स्पष्टमाह "सम्बन्धाभावान्नानुमान"मिति साङ्ख्यसूत्रम् (५।११)।

२। "प्रवृत्तेश्च"।

एतदादिसूत्रेषु "नानुमान"मित्यध्याहार्य्यम्। कर्त्तुः "प्रवृत्तेः" प्रवर्त्तते रचनादिकार्य्यम्। असङ्गस्य परिपूर्णस्वभावस्य ब्रह्मणः प्रवृत्तिलेशाभावान्नानुमातव्या जगद्रचना ब्रह्मणेति। एतत्सूत्रार्थं स्पष्टमाह "न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वा"दिति साङ्ख्यसूत्रम् (५।६)।

३। "पयोऽम्बुवच्चेत् तत्रापि"।

प्रवृत्त्यभावेऽपि यथा "पयो" दुग्धं दध्यादिरूपेण परिणमते; यथा च "अम्बु" करकादिरूपेण परिणमते, तथा ब्रह्मापि जगद्रूपेण परिणमत इत्यपि नानुमातव्यम्। कुत इत्यत आह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४। "व्यतिरेकानवस्थितेश्चानपेक्षत्वात्"।

ब्रह्मव्यतिरिक्तस्य कस्यचित् पदार्थस्य "अनवस्थिते"रनस्तित्वात् "पयोऽम्बु"—दृष्टान्तोऽपि न सङ्घटते। कुतः "अनपेक्षत्वाद्" ब्रह्मणः।

५। "अन्यत्राभावाच्च न तृणादिवत्"।

यथा "तृणादि" क्षीराद्याकारेण परिणमते तथा ब्रह्मापि जगदाकारेण। नैवम्, "अन्यत्राभावात्" तृणाद्युपयोक्तृधेन्वादिवन्न वर्त्तते ब्रह्मणोऽन्यत् किञ्चनेति। अतो नैवमप्यनुमानम्। "च" शब्दः समुच्चये।

६। "अभ्युपगमेऽप्यर्थाभावात्"।

अथापि ब्रह्मणो जगदाकारेण परिणाममनुमाने "नाभ्युपगच्छेम" पूर्वोक्तदोषसत्त्वेऽपि, तथापि दोषान्तरमनुषज्यत एव। कुतः, "अर्थाभावात्" न दृष्टं केनापि कुत्रापि प्रयोजनमनुद्दिश्य चेतनप्रवर्त्तनम्। ब्रह्मणः प्रयोजनाभावात् न स्थानमस्यापि पक्षस्य। एतत्सूत्रार्थं स्पष्टमाह "स्वोपकारादधिष्ठानं लोकवदि"ति साङ्ख्यसूत्रम् (३।५६)।

७। "पुरुषाश्मवदिति चेत् तथापि"।

स्वप्रयोजनाभावेऽपि यथा पुरुषस्य नखलोमानि पुरुषात् सञ्जायन्ते; यथा च प्रस्तराकारेण परिणतो वृक्षांशः स्वप्रयोजनाभावेऽपि प्रस्तराकारेण वर्द्धते, यथा वा अयस्कान्तोऽश्मा स्वप्रयोजनाभावेऽपि अयः परिणमयति अयस्कान्ताकारेण, तद्वत्। न घटतेऽयमपि दृष्टान्तः, ब्रह्मणो निष्क्रियत्वादिश्रुतेः। "यथा सतः पुरुषस्य केशलोमानी"त्यादिषु श्रुतिर्ब्रह्मणो जगदुपादानत्वमेवोपदिशति, न दृष्टान्तदार्ष्टान्तिकयोः सर्वविषयसाम्यमिति ज्ञेयम्।

८। "अङ्गित्वानुपपत्तेश्च"।

ब्रह्माङ्गकल्पनायाः श्रुतिविरुद्धत्वात्। "निष्कलत्वादि" श्रुतेः "निर्भागत्वादि" श्रुतेश्च। दृश्यते हि "निर्भागत्व" श्रुत्युल्लेखः साङ्ख्यसूत्रेऽपि (५।७३)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९। "अन्यथानुमितौ च, ज्ञ-शक्तिवियोगात्"।

अङ्गाङ्गिभावा"दन्यथाऽनुमितौ", यद्यपि मन्येत ब्रह्मण उत्पत्त्यनन्तरं जगज्जहाति ब्रह्माङ्गत्वं भवति च ब्रह्मभिन्नं तथापि दोषान्तरं प्रसज्येत, "ज्ञ-शक्तिवियोगात्" जगतोऽचेतनत्वात्। चिद्रूपाद् ब्रह्मणोऽचिज्जगदुत्पत्तिवादो न विचारसह इति ब्रह्मणो जगद्रचना नानुमानसाध्येति निर्णया।

एतत् सूत्रस्य-"वियोगादि"ति पदप्रयोगात् समवगम्यते ब्रह्मणो जगद्रचनोपपत्तिर्नानुमानसाध्येत्येतदधिकरणप्रतिपाद्यमिति। साङ्ख्यवादखण्डनपक्षे प्रवर्त्तिते व्याख्याने कारणरूपस्य प्रधानस्य "ज्ञ-शक्ति-वियोगः" कल्पनीयः। कल्पितश्च तथा भाष्यकारादिभिः। वियोगशब्दनिर्वचनात् सिद्ध्यति योगापगमनं न योगस्य प्रागभावः, यथा "पितृवियोगादिषु"। यथा च—

"वार्द्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापैः।
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढ़िहीनश्च दीनम्॥"

इत्यादिषु च। भाष्यकारादिकल्पितार्थे सूत्रकाराभिप्रेते सति सूत्ररूपं "ज्ञ-शक्त्यभावादि"त्यभविष्यत्। "ज्ञ-शक्तिवियोगादि"तिरूपात् अस्मत्कल्पितार्थः सूत्रकाराभिप्रेत इत्यायाति। चिद्रूपाद् ब्रह्मणोऽचिद्रूपं जगन्निर्गतमित्यभावनीयमतो नानुमानविषयमिति सूत्रार्थः।

१०। "विप्रतिषेधाच्चासमञ्जसम्"।

ब्रह्मण उत्पत्त्यनन्तरं जगज्जहाति ब्रह्माङ्गत्वं भवति च ब्रह्मभिन्नमिति मतं "सर्वं खल्विदं ब्रह्मे"त्यादिश्रुतिविरुद्धम्। अतः "असमञ्जसम्"। अथवा परस्परविरुद्धसिद्धान्ताः प्रसज्येरन् अनुमानेन ब्रह्मणो जगदुत्पत्ति-परिकल्पनात्। अतोऽसमञ्जसमिदं परिकल्पनफलमित्यादिभिर्हेतुभिर्ब्रह्मणो जगद्रचना नानुमानबलेन साधनीयेति सिद्धम्। एतदधिकरणप्रतिपाद्य तत्त्वं "शास्त्रयोनित्वादि"ति सूत्रेण प्रागेव परिसंख्ययोक्तमिति रचनानुपपत्त्यधिकरणं समाप्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सखीं प्रति श्रीराधायाः सकरुणोक्तिः

[निबन्धकः—५योगीन्द्रनाथविद्याचुञ्चुः]

कृष्णप्रेमार्णवनिधिगतध्यानसंसक्तचित्ता
तद्विच्छेदज्वरभवमहातापशीर्णात्मदेहा ।
श्रुत्वा वेणुध्वनितमतनूद्बोधनं चक्रपाणे
राधा मन्दद्युति-सहचरीं साश्रुपातं जगाद ॥ १॥
किं ध्मायते सखि तटे तपनात्मजायाः
श्रुत्वावसीदति मनो व्यथते च चित्तम् ।
पर्य्याकुलास्मि विवशेन्द्रियबुद्धिवृत्तिः
का मे गतिः किमधुना करणीयमास्ते ॥ २
किं-निर्म्मिता सखि हरेर्मुरली विचित्रा
यत्काकली मधुमयी श्रवणैर्वधूनाम् ।
पीता सती वितनुते हृदि तापमुग्रं
दोषोऽयमस्य किमु काकलिकाभवो वा ॥ ३
यावत्तु मोहनरवः प्रविवेश कर्णौ
तावन्न धैर्य्यमवरोद्धुमलं कथञ्चित् ।
कं वा गुणं समधिरोप्य न वाद्यतेऽसौ
यन्मे दशां घटयतीदृश-शान्तिहीनाम् ॥ ४
धारा सुधारसमयी श्रुतिरन्ध्रतो मे
हृन्मध्यमेत्य कुरुते नितरामनर्थम् ।
औदास्य-मोह-भय-सङ्करभावजाड्यं
चोद्देजयत्यतितरां मम चित्तमस्याः । ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृच्छापरा मम शुभे हृदयात् प्रजाता
वंशोध्वनी कथमिदं ननु मादकत्वम् ।
संज्ञाविलोपि गुणवत्त्वमयेऽबलाना-
माधारदोष इह किं वद हेतुभूतः ॥ ६
गीतस्य शब्दमयता किल यत् प्रसिद्धा
तद्विच्चणं स्थितिपरं श्रुतिपेयमेव ।
तत्सम्भवाः कथममी चिर-तीव्रतापा-
श्चेतांसि मे विदधते विकलान्यतीव ॥ ७
सद्वंशजा कथमसौ मुरली मुरारे-
र्नारीजनस्य हृदयं हरति त्वकस्मात् ।
किं वा प्रभुर्भवति यत् प्रकृतिर्धरण्यां
तस्याश्रितोऽपि हि गुणान् भजते तदीयान् ॥ ८
सद्वंशत्वे मधुरवचने सत्यपि च्मातलेऽस्मि-
न्नन्तःसारैस्थिरविरहितं निष्फलं यच्चिराय ।
नो चित्रन्तद्भवति जगतां क्लेशशङ्कानिदानं
त्वत्माद्वेणौ करुणपरता नान्तरे तन्महत्त्वम् ॥ ९
यन्नाममात्रकथनाद् भवसिन्धुगर्भात्
क्लेशोर्म्मिशोकवडवानलदुर्निरोध्यात् ।
शान्तिं लभेत मनुजश्चिरदुःखभोगी
तापं ददाति किमु तन्मुरलीदृशं नः ॥ १०
स्वान्तं ध्वान्तमयं निरन्तरमयि बुद्धिर्जडत्वं गता
नेत्रे कृष्णमयं दिगन्तगगनं भास्वत्सुतायास्तटम् ।
ईक्षेते सखि मे प्रशाधि चपलं कार्य्यं मदीयं ध्रुवं
शान्तिर्भ्रान्तिसरित्प्रवाहकलुषा मोहाम्बुधौ धावति ॥ ११

प्रकाशयते श्रीहरिपदभारतीशर्म्मणा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी

(पूर्वतोऽनुवृत्ता)

[निबन्धिका—श्रीमती रेणुदेवी]

एकदा निशीथसमये विपुलेयं वसुन्धरा विशुष्का बदरीव क्षुद्रतरतामासादितवती। न क्वापि मया निगूहनस्थानं लब्धम्। ततः प्रभृति देशेषु परिभ्रमणव्रतमेव मया गृहीतम्।

अथ क्रमेण भगवतः सर्वहरस्य कालस्य महिमातिशयः शीतलविलेपनसम्बन्धेनेव मम तादृशमतिदुरपनेयमपि हृदयक्षतं शनैः शनैः उपशमयामास।

अथ काशीधाम्नि गोविन्दकान्तदत्तो नाम कश्चन सच्चरित्रः सम्मानितो जनो बहुकालात् प्रतिवसति। तेन सह जातपरिचयस्य मे कदाचित् कथोपकथनप्रसङ्गेन राजपुरुषाणाम् अत्याचारप्रकर्षप्रसङ्गः समुपस्थितः।

तत्रोपस्थिता बहव एव तेषाम् अत्याचारकथामपरिमितां वर्णयामासुः। काचन कथा सत्यभूता, काचन कल्पनामात्रप्राणा प्रस्तुता। गोविन्दकान्तोऽपि कथामेकां कथयामास। तस्या अयं सारसंक्षेपः। "हरेकृष्णदासनामा कश्चन दरिद्रः कायस्थोऽस्माकं ग्राममध्युवास। तस्य तावदेकैव दुहिता मातृहीना, स च रोगेणाक्रान्तः। अतः स तां कन्यां प्रतिपालयितुं श्यालिकापतेर्हस्तगतामकरोत्। आसंश्च तस्य कन्यकायाः कतिचित् स्वर्णाभरणानि। लोभात् तानि न श्यालीपतेर्हस्तगतान्यकरोत्। स च मृत्युम् उपस्थितं परिज्ञाय तान्याभरणानि मयि न्यासीकृत्य समुवाच—समुत्पन्ने बोधविकाशे भूषणान्यमूनि मम दुहितुः प्रदेयानि, अन्यथा ग्रहीष्यति राजचन्द्रः। एवं प्रतिपन्ने मयि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृते च तस्मिन्, निर्दायोऽयमिति नन्दिकेश्वरप्रभृत्यशेषप्रमथपरिवार-वेष्टितः समुपगतो देवदेवः शान्तिरक्षकपतिः। तेन च तस्य जलपात्रादिकं स्वल्पं वस्तुजातं सर्वमेव निःस्वामिकमिति कृतं हस्तगतम्। कैश्चित् अभिहितं, वर्त्तते तावदस्य हरेकृष्णस्य काचन कन्या कलिकातानगर्य्याम्। सा चास्य दायमर्हतीति। शान्तिरक्षकास्तु तान् निर्भर्त्स्य प्रोचुः, स्थितश्चेद् दायादः कश्चित् स कथं न समागत इति। तदा मम शत्रुभूतः कश्चित् तमुक्तवान् यत्, गोविन्ददत्तसमीपे मृतस्य स्वर्णाभरणानि वर्त्तन्त इति। स च मां समाह्वयत्। अहञ्च तेनाहूतो देवादिदेवसमीपमागत्य विहिताञ्जलिरतिष्ठम्। तिरस्कारवाचश्च काश्चिल्लब्धवान्। अभियुक्तश्चास्मि। निरुपायेन च मया समर्पितानि तान्याभराणि तस्य पादपद्मयोः। ततश्च दक्षिणामुपाहृत्य मुद्राणां पञ्चशतं लब्ध्वा कथञ्चिन्निष्कृतिः। स च शान्तिरक्षकपतिस्तान्याभरणानि स्वदुहितुर्व्यवहाराय स्वालयं नीत्वा स्वप्रभु' प्रति विज्ञापितवान् यत्, निर्दायादस्यास्य मृतस्य घटीमेकां दीपाधारञ्चैकं विना नान्यत् किञ्चिदस्तीति।" श्रुतञ्च मया प्रसङ्गान्तरे हरेकृष्णस्य नाम। ततोऽहं गोविन्ददत्तमपृच्छम्। "किमस्यैव मनोहरदासो नाम कश्चित् सहोदर आसी"दिति। "वाढ़मेवं, किञ्च कथं त्वया ज्ञायत"इति तेनाभिहितो न काममपि प्रतिवाचमदाम्। भूयश्च अपृच्छं "किं तावत्तस्य श्यालीपतेर्नाम" ? स प्रत्युवाच, 'राजचन्द्रदास' इति। मया च भूयः 'क्व तस्य वासस्थान'मिति पृष्टः स, 'कलिकातायां स निवसति किन्तु कस्मिन् स्थान इति तु मया विस्मृत'मिति प्रोक्तवान्। पुनरपि मयाभिहितं 'किमस्य दुहितुर्नामधेय'मिति। स प्रोवाच 'रजनी'ति। अथ स्वल्पेनैव कालेन अहं परित्यक्तवान् वाराणसीम्। प्रथममेव मया तावदिदमवधारयितव्यं यन्मया किमन्विष्यत इति। मम चित्त' दुःखसंकुलं, संसारस्य तमसा ग्रस्तः। अद्यैव चेन्मरणमासादयेयं नाहं श्वस्तत् कामये। यदि च दुःखमेव निरन्तरमनिवारितं वर्त्तते, कस्तर्हि मयि पुरुष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार: ? चिकित्सायाः प्रागेव विधेयो रोगनिर्णयः। दुःखनिवारणाच्च प्रागेव युक्तं दुःखस्वरूपं निरूपयितुम्। किमिदं दुःखं नाम ? अभाव एव दुःखस्वरूपमिति। स्वास्थ्याभावस्वरूपो रोगो दुःखमेवेति नहि सर्व एवाभावो दुःखमिति तु जानामि, रोगस्याभावस्तु न दुःखमिति किन्तु अभावविशेषस्यैव दुःखरूपतेति। मम तर्हि कस्यायमभावो वर्त्तमानो मां दुःखयति ? किमहं प्रार्थये ? कोऽयं वा मानवानां प्रार्थनाविषयः ? धनमेव किम् ? तत्तु मे प्राचुर्य्येण वर्त्तते। अथ यशः ? पृथिव्याम् एतादृशो न वर्त्तते कश्चिद्, यः सर्वथा यशसा परिहीनः। प्रवञ्चकप्रवरोऽपि बुद्धिप्रकर्षजातस्य यशसो भाजनं भवति। मांसविक्रयिणोऽपि यशः श्रूयते यत्, स मांसे न कञ्चन वञ्चयते, कदापि मेषमांसमिति न सारमेयमांसं विक्रीणीते। सर्वेषामेव यशो वर्त्तते। न तु कस्यापि यशः सर्वथा परिपूर्णतां प्राप्तम्। बेकनाख्यस्तावदुत्कोचग्राहीति दुर्यशो लेभे। सक्रेटीगाख्यश्च दुर्यशोहेतुं प्राणदण्डमाससाद। तथा धर्म्मराजस्यापि द्रोणवधे मृषाभाषित्वं जिष्णोश्च स्वात्मजात् पराजयः। एवमन्येषामपि यशस्विनां तेषु तेषु व्यापारेषु दुर्यशो विदितमेव ; यशो न मे प्रार्थनीयम्। तद्धि साधारणानाम् एव नराणां मुखेषु प्रसरति। ते हि मूर्खाः स्थूलबुद्धयश्च न प्रसमीक्ष्यकारिणः। का नाम स्थूलबुद्धीनां मूर्खाणां वा यशःप्रचारेण मे सुखसमृद्धिः।

अतो न मे काम्यं यशः। नापि मानो मे कामनाविषयः। संसारेऽस्मिन् कस्तावदेवं वर्त्तते येन सम्मानितः सुखी भवेयम्। ये च द्विशा वर्त्तन्ते, तेषु सम्मानोऽपि सुप्रतिष्ठितो मे वर्त्तत एव। अन्यैर्विहितो मानस्तावदपमान एव। राजसभायां सम्मानोऽपि केवलं दास्योत्कर्षचिह्नमेव। न मे काम्यो मानः। आत्मनि सम्मानस्तु सदैव मे कामनाविषयः। रूपं वा कियत् काम्यम् ? स्वल्पमेव नाधिकं, यथा न मां विलोकयन् कश्चिदपि निष्ठीवति। न च कश्चित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा करोति। मयि प्राचुर्य्यं वर्त्तते रूपस्य। स्वास्थ्यन्तु तावदद्यापि मय्यनन्तमिव वर्त्तते। बलमपि केवलं परपीडनायैव अपेक्ष्यते। न च वाञ्छितं मे परपीडनम्। इह जगति बुद्धिरपि तथा प्राचुर्य्येण वर्त्तते यथा सोऽपि कदापि न तस्या अभावमनुभवति। सर्वं एव जना आत्मानं बुद्धिमन्तं मन्यन्ते। तथैवाहमपि मन्ये। जानामि नास्ति मे विद्येति। न तु तदभावेन कश्चिदपि आत्मानम् असुखिनं मन्यमानो दृश्यते। न हि विद्याभावो मां दुःखयति। धर्म्मस्तु परत्रैव सुखनिदानं, नेह जगति। जनचरित्रवेदिनो धर्म्माभावमेव दुःखं मन्यन्ते। जानामि मृषैवैतत्। जानतोऽपि न मे धर्म्मकामना। न मे तथा वा दुःखम्।

प्रणयो वा स्नेहो वा अन्यत् वा किञ्चित्, एतेषामभावमेव सुखमवैमि। प्रेमैव दुःखम्। लवङ्गलता तत्र प्रमाणम्।

एवञ्चेत् कथं मे दुःखम्? कस्याभावो मां व्यथयति? कथं मे कामना, यां सफलयन् अपनयामि दुःखम्? किमिदं मे काम्यं वस्तु?

एतत्तु समवगतं, काम्यवस्तुनोऽयमभाव एव दुःखम्। एतदप्यवगतं सर्वमेवेदमसारमिति केवलं मम दुःखमेव सारभूतम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोदूतम्

चैतन्यदेवमातुल-कवीन्द्र-विष्णुदासविरचितम्

[श्रीचिन्ताहरणकाव्यतीर्थ (एम्-ए) सम्पादितम्]

भूमिका

इतः पूर्वमेव संस्कृतसाहित्य दूतकाव्यस्येतिवृत्तमवलम्ब्य कथञ्चिद विस्तरत एवास्माभिः कृता काचनालोचना। (१) तत्र चास्माभिः प्रतिपादितं यत् कालिदासोपज्ञमीदृशं काव्यम् अर्वाचीनैरनेकैरेवानुकृतं कविभिः। तथा च प्रायेण पञ्चाशदेव दूतकाव्यानीदानीमासाद्यन्ते प्राचीनान्येव। आधुनिकैस्तु साम्प्रतिकेऽपि काले प्रस्तूयन्ते काव्यान्येवंविधानीति न नामानवगतं सुमनसाम्।

न च सकलान्येव दूतकाव्यानि गुणादिमत्तया सामाजिकानां चेतांसि समाकर्ष्टुमलम्भवन्ति। परं गुणभूयिष्ठानि कष्टकल्पनादिदोषविशेषसमाक्रान्तानि च तेषु कानिचिदिति वैचित्र्यं सुमहत् एव विलसति। तथा च—आदौ शृङ्गाररसात्मकस्य वस्तुनः शान्तरसात्मकतया परिणमनं परममेकं वैचित्र्यपदम्। जैनकविनिबद्धेषु च ग्रन्थेषु जैनमेघदूतादिषु विशेषेणेदम् उपलभामहे। न चेदृशस्य वस्तुनः कश्चिदप्यासीदभावो ब्राह्मण्यधर्म्ममालम्बमानेषु। तत्र मनोदूतादीन्येवोदाहरणरूपेणोपस्थाप्येरन्।

मनोदूताख्यानि च पञ्चषाणि काव्यान्युपलभ्यन्ते। तेष्वेकं त्रैलङ्गव्रजनाथ-कृतम् काव्यमालायास्त्रयोदशगुच्छे प्राकाश्यं नीतम्। एकं मनोदूताख्यं जैनं काव्यं जैनग्रन्थावल्यां (Jain Svetambar Con-

---

(१) संस्कृतसाहित्यपरिषत्पत्रिका (अष्टमाब्दे ३७५-३८० पत्राणि) तथा (दशमाब्दे १४५-१५१ पत्राणि)। Indian Historical Quarterly (तृतीयखण्डे २७३-२८७ पत्राणि)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ference, Bombay इत्यतः प्रकाशितायां) २३२ तमे पत्रे निर्दिष्ट-मास्ते। एकं मनोदूतकाव्यं कश्मीर-रघुनाथमन्दिरग्रन्थागारे विराजते। अन्यत् चैतन्यदेव-मातुल विष्णुदास-वंशोद्भव-रामराम-द्विज-निर्म्मितं वङ्गीयसाहित्यपरिषद्ग्रन्थालये वर्त्तते। अपरं च विष्णुदास-निर्म्मितं सुमनोहरं वस्तु। अनन्तरनिर्दिष्टं द्वितयमत्र प्राकाश्यं नीयते आदौ।

तत्र च प्रबन्धद्वितये पुरुषेण मनसो दूतरूपेण कृष्णसमीपे प्रेषण-मेव विषयीक्रियते काव्यस्य। विष्णुदासकृतं च काव्यं सारल्येन वस्तुमाहात्म्येन कवित्वेन च सुतरामेवावर्जयति रसिकानां चेतांसि। चैतन्यसम्बन्धश्च नाल्पमुपयोगमावहेदेतत् सम्प्रदायविशेषेषु वैष्णवानाम्।

विष्णुदासेनैतत्काव्यमुपायनीकृतं स्वजामात्रे कृष्णार्जुनीयाख्य-काव्यकर्त्रे कवये श्रीमते गोपीनाथकविकण्ठाभरणायेति प्रसिद्धिः कविकण्ठाभरण-वंशप्ररोहेषु पूर्ववङ्गीय-धानुकाप्रदेशीय-वैदिक-कृष्णा-त्रेयगोत्रीयाग्रजन्मसु। परं दौर्भाग्यतो नः पदार्थान्तरमिव पुस्तक-मेतदपि गोपीनाथवंशीयेषु विभागमभजत। तत्र चार्द्धमात्रं परिषदा-धिगतम् २६श-श्लोकं यावत्।

विष्णुदासकृतकाव्यपुस्तकत्रितयमासादितमस्माभिः। तत्र प्रथमं संस्कृतसाहित्यपरिषत्स्थं खण्डितम् अशुद्धञ्च। द्वितीयम् 'इण्डिया अफिस्' पुस्तकागारतो लब्धं नातिशुद्धम्। तृतीयं च कथञ्चित् शुद्धं ढाकाविश्वविद्यालयतोऽध्यापक-श्रीयुक्त-सुशीलकुमारदे-महोदयस्य साहायकेन समधिगतम्। एतत्त्रितयतुलनेन निर्द्धारितो मूलपाठः। परं न चैतावतापि निःसंशयं सर्व एव निर्द्धारिताः पाठा इति शक्यते कथयितुम्। पादटीकायां च यथाक्रमं P., I., D. इति सङ्केत-निर्देशपुरःसरं तत्तत्पुस्तकगताः समुल्लिखिताः पाठभेदाः।

साम्प्रतञ्च पाठकमहाभागा एवास्य गुणागुणविचारे प्रभव इति विरमामो मुखबन्धबाहुल्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वर्ण्य तानि रहसि स्वयमर्जितानि
भूयस्तराणि दुरितानि सुदुःसहानि।
श्रुत्वा च कालविहितान्यवशेन्द्रियाणां
दुःखान्यचिन्तयत कश्चन विष्णुदासः ॥ १ ॥

दृष्टो धनैः शमदमादिभिरेव योगः
क्षान्त्वा तपो बहुविधं भ्रमतश्च तीर्थम्।
तत् किं करोमि विकलोऽहमितः क्व यामी-
त्येवं विलप्य शरणं हरिमालुलोचे ॥ २ ॥

यत्पाद-तामरस-लालस मानसास्ते
भ्रान्त्यापि कर्णपदवीं न नयन्ति सन्तः।
वृन्दारकप्रकरमौलि किरीट-कोटि-
रत्नांशुरञ्जितपदं पदमामरेन्द्रम् ॥ ३ ॥

तस्मात्तमेव जगदण्डपरार्द्धकोटि-
कोटीश्वितारमकुतोभयदं नतानाम्।
सर्वात्मनेह शरणं करवाणि वाणी-
प्रेयांसमास्मदमशेषसमोहितानाम् ॥ ४ ॥

---

2. a दृष्टो—P, I. दृष्टा—D. d-णालुलोचे—P. -मालुलोचे—D. -मालुचोचे—I.

3. a-सास्ते—D, I. -सन्ते—P. b-न नयन्ति—D. नमयन्ति—I. d. -रञ्चित—P. -रञ्जित—D, I.

4. d. -श्रेयां—I. -प्रेयां—D, P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योग्यं न कालहरणं मरणञ्च जन्तो-
रावश्यकं जगति कः खलु कस्य बन्धुः ।
बद्धः स्वकर्मनिगडैश्चलितुं न सेहे
प्रस्थापयामि तदिदं मन इत्यमंस्त ॥ ५ ॥

नानाविधेषु विषयेषु निमग्नमुच्चै-
स्तुच्छीकृताबलविवेकबहुप्रयत्नम् ।
उक्तं किमत्र रमसे विरमेति वारं
वारं तथापि हृदयं प्रविवेश तेषु ॥ ६ ॥

नीचाति-नीच-रस-नीरतमीहमानं
क्रोधादिकं गतकृपं निरपत्रपञ्च ।
यन्नाचिरं सुजनसङ्गमतः कथञ्चि-
दानीय नीतिवचसा मन इत्युवाच ॥ ७ ॥

एकं त्वमिन्द्रियगणस्य मनो वरीयः
पारन्तथा जगदुपैति तव प्रशक्त्या ।
इत्यर्थये प्रणतिपूर्वकमानुकूल्यं
नो चेत् करोषि मम तादृशमेव कर्म ॥ ८ ॥

---

5. c-बद्धः—D. बन्धः—I. बन्धु—P. d. दंमन—D, I, मंसन—P. -संस्त—I. -मंस्त—D. P.

6. b. -विवेक—D, I. -विकेन—P. c -रमसे—D, I. -मवले—P.

8. a तथापि—P. तथा—D, I. -शक्त्या—I. -मत्या—P. -सत्या—D c. -पूर्वं—I. पूर्वक—D, P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वानपास्य विषयान् क्षणमेव ताव-
च्चेतोऽवधेहि करुणाकणिकां विधेहि।
आर्त्तस्ततः कतिपयानि निवेदयामि
नो चेदरण्यरुदितं किमिदं करोमि ॥ ९ ॥

आ जन्मनस्तव मनः प्रतिपालयन्तः
प्रायः समीहितममुं समयं नयामः।
अस्माकमेकमिदमेव मुकुन्दपाद-
पद्मं व्रजेत्यभिमतं सफलं कुरुष्व ॥ १० ॥

चेतस्त्वमेव परिचिन्तय तावदेतत्
संसार-जर्ज्जरवने भ्रमणेन किं स्यात्।
वाञ्छाधिकाधिकसमीहितसिद्धिधाम
नामापि ते न विदितं किमु माधवस्य ॥ ११ ॥

अव्याहतेन्द्रियततिर्जगतीत्रयान्तः
कस्तादृशः कथय मानस कुत्र जातः।
निर्वर्ण्यं सर्वमनवद्यमिदं मुरारेः
यत् किञ्चिदन्यदपि वस्त्वनुसन्दधासि ॥ १२ ॥

जातः स एव सुकृती सफलं जगत्यां
तेनैव रत्नजननी जगती जनेन।
एतद् य एव हि नभःकुसुमोपमेयं
गेयं कुधीभिरवधार्य्य परं परैति ॥ १३ ॥

---

9. a -तोव—I, P. -तोवि—D.
d. चेदवर्षा—P. -चेदरण्य—I, D.
10. a. ममु—D, I. -मनु—P.
12. b. -स्त्वा—D, P. -स्ता—I. c. -वेद्य—I. -वद्य—D, P.
13. a. सफलं—D, P. सकलं—I. d. कुधी—I, P. सुधी—D.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं वीक्ष्य नील-नवनीरद नीलकण्ठ-
कण्ठेन्द्रनीलधरणीधरमेदुराभम् ।
कारुण्यनीरनिधिमम्बुधिमद्भुतानां
नानाविधं विधुरमुज्झसि किं नु चेतः ॥ १४ ॥
न व्याहतः क्वचन ते विषयस्त्रिलोक्या-
मध्वानमाब्धिकमुपैषि निमिषतोऽपि ।
जानासि मद्व्यवसितानि मनो विना त्वा-
मार्त्तेन कः कथय दूतपदे नियोज्यः ॥ १५ ॥
नाहं मुकुन्दपदवारिरुहं प्रयामी-
त्युक्तोऽपि कः कथय हन्त करोतु किन्ते ।
यातव्यमेव यदि वा निरनायि किं तद्
आलम्बितेन हृदयातिविलम्बितेन ॥ १६ ॥
प्रायस्त्वया न परिचीयत एव तावत्
पन्थाः कदाचिदिति मानस मा विषीद ।
उच्चैस्तरः सकलतापनिवारहेतु-
र्यास्यत्ययं परिचयं स्वयमेव यस्मात् ॥ १७
एवं यथाश्रुतमनेन पथा प्रयत्नात्
सुखेन पुण्यचरितैरकुतोभयेन ।
साकं शमेन च दमेन च याहि चेतः
प्रायो न वेद पथि खेदमनर्घ्यसङ्गी ॥ १८

-धार्थ्यं—P. I. -धौर्य्यं—D अनन्तरे च पुस्तके पत्रकोणे (margin) 'धा' इति संशोधितम् आस्ते ।

14. a -राज—I. राभं—D, P. c. -मम्बुधि परिषत् पुस्तके त्रुटितमेतत् ।
15. a अव्या—P. न व्या—D, I.
16. a मुरारि—D. b. क्ते पुनः—D. करोमि—D.
18. a मनः श्रुतम्—D. -नेकमथ—D, b. चरिताद—D,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्सर्य्य-दम्भ-मद-मान विमोह-लोभ-
क्रोध-भयादि विरहय्य समस्तमेव ।
यातव्यमाप्तवचसा हृदयात्त्वतैन
सत्यं कुसङ्गमधमं जनमापदेति ॥ १९ ॥

श्रान्तं मनःसरितमार्य्यजनेन पीतां
गीतामनन्तमहनीयरसाभिगीताम् ।
यत्नादनन्तमवगाह्य निरस्तपापं
कृष्णा-तरङ्ग-लहरीकमथ प्रयाहि ॥ २० ॥

आशैशवं मयि चिरं परिवर्द्धमान-
स्त्वेमानमाव हसि न क्वचनेति दूये ।
तत्साधुजामतिरसां जगदेकवन्द्यां
विन्द त्वमां हृदय सम्प्रति निर्वृणोमि ॥ २१ ॥

तन्नः प्रियात् प्रियतरां यदि तां दयाञ्च
तस्याः परां सहचरीमुररीकरोषि ।
सा सर्वभूतनिचयेषु मनो नियुङ्क्ता
कस्मै मुदे न भविता त्वमया त्वमान्ते ॥ २२ ॥

---

19. a लोभ—D. लोभा—I.

20. a भ्रान्तं—D. श्रान्तं—P, I. -जनेन—D, I. कुलेन—P. b. गीता—D. I, पीता—P, -तिप्रीतां··D, P. c. -दमन्द—D,P, d. -मथ—D, -मह—P.

21. a नहि—P, मयि—D, I. b. स्ते—I, स्त्वे—D. c. साधुतां—P साधुजां—D, I, d. निर्वृणोति—P, निर्वृणोमि—D,I,

22. a करोमि—I, करोषि—D, P. d. कस्मै—D, कस्मै—I, -स्ते—I, न्ते—D. मान्ते—P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आश्रेति या तत इतः परितो नटन्ती
तावत्त्वमेव दधती किमपि क्षमायाः ।
आकृष्य सर्वत इमां मुरवैरि-पाद-
पद्माश्रयां घटय सर्वमशोच्यमस्तु ॥ २३ ॥

प्रायः क्षमातिशयमानवतो न रूढ़-
प्रेमा प्रयाति पुनरस्थिरतां नवोढ़ा ।
तस्माद्विधेयमिदमेव मनः प्रयत्नाद्
विश्लेषलेशमपि नैयसुपैति यस्मात् ॥ २४ ॥

ब्रह्माण्डमण्डलमहेन्द्रमहं कुतो वा
द्रक्ष्यामि देवमिति विप्रतिपद्यसे किम् ।
सोऽयं विभुर्विषयसङ्गमपास्य यत्र
यत्राभियुक्तमसि तत्र पुरस्त एव ॥ २५ ॥

तत्रापि तावदवधारय माधवस्य
क्रीडानिकेतनमनर्घ्यतमं दिवोऽपि ।
यस्मिन्निनाय समयं शमयञ्जनानां
कर्म्माणि कर्म्मभिरनेकगुणैर्मुरारिः ॥ २६ ॥

गोगोपगोपतनुगोपसुतासुतेन
रम्येण सम्यगनुरञ्जितसंविभागम् ।
क्ष्मामण्डलीमुकुटमण्डलरत्नमास्ते
जानीहि गोकुलमनाकुलसर्वलोकम् ॥ २७ ॥

(सावशेषम्)

---

24. b युष्मत्—D. P. यस्मात्—I,
27. b ·कुल—D. कुत—I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रप्रस्थम् (देहली)

[निबन्धकः—अध्यापकः श्रीनरेन्द्रनाथचतुर्धुरीणः, एम्. ए ; काव्य-व्याकरणतीर्थः ।]

इह खलु भारते वर्षे देहली महानगरी नितरां प्रसिद्धिमुपगता। इयं हि साम्राज्य-लक्ष्म्याः प्रधानं लीलाक्षेत्रम्। 'नलिनीदलगत-जलमिवातितरला राजलक्ष्मी'रिति नगरीयं सुतरां प्रतिपादयति। इयं हि बहूनां पृथ्वीश्वराणां समुत्थानस्य पतनस्य च चिह्नजातं वक्षसि धारयन्ती प्रबलं काल-विलासं दर्शयति। अत्र तावत् संस्थापितानां राजभवनानां ध्वंसावशेषं पश्यतां जनानां मनसि—"देहली खलु प्राज्य-साम्राज्यमहाश्मशान"मिति सत्यं समुदेति।

पुरीयं नगरी इन्द्रप्रस्थनाम्ना संस्तुतासीत्। इदं महाभारते समुपवर्णितमस्ति यत्, पुरा पाण्डुतनया धृतराष्ट्रेण समनुज्ञाता यमुनायाः पारे, घोरमरण्यं खाण्डवप्रस्थमागत्य तत्र मनोरमं नगरं स्थापयामासुः। तथा च भारतम्—

"प्रतिगृह्य तु तद्वाक्यं नृपं सर्वे प्रणम्य च।
प्रतस्थिरे ततो घोरं वनं तन्मनुजर्षभाः॥
अर्द्धं राज्यस्य संप्राप्य खाण्डवप्रस्थमाविशन्।
ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः।
नगरं स्थापयामासुर्द्वैपायनपुरोगमाः॥" इति।

अथ तन्नगरं परिखाभिः प्राकारै रथ्याभिर्भवनैश्च समलङ्कृतमात्मनः शोभासम्पदं परितः प्रकटयामास। तथा च महाभारतस्यादिपर्वणि वर्णितम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम् ।
प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ॥
सुविभक्त-महारथ्यं देवतावाधवर्जितम् ।
विरोचमानं विविधैः पाण्डुरैर्भवनोत्तमैः ॥" इति ।

अथैकदा भगवति वह्नौ दहति खाण्डववने, तत्र निवसतो मयस्य प्राणा अर्जुनेन रक्षिता आसन् । दानववरो मयोऽपि प्रत्युपचिकीर्षुः पाण्डवानां कृते, तत्र महतीमेकामनुपमां सभां चकार । तथाच भारतम्—

"प्रतिगृह्य तु तद्वाक्यं सम्प्रहृष्टो मयस्तदा ।
विमानप्रतिमां चक्रे पाण्डवस्य शुभां सभाम् ॥
तदाहृत्य च तां चक्रे सोऽसुरोऽप्रतिमां सभाम् ।
विश्रुतां त्रिषु लोकेषु दिव्यां मणिमयीं शुभाम् ॥" इति ।

पाण्डवाश्च तत्र वासं परिकल्प्य राजसूयं महायज्ञं विदधुः, परया शान्त्या कञ्चित् कालं कलयामासुश्च । अथ द्यूतनिर्जितेषु वनं गतेषु पाण्डवेषु, तस्याः सभाया रमणीया दिव्या शोभापि शनैः शनैर्व्यलीयत । ततः कुरुक्षेत्र-महासमरात् परं जयश्रीसमुद्भासिताः खलु पाण्डवाः प्राचीनां कुरुराजधानीं हस्तिनामेव समलञ्चक्रुः । इत्थमिन्द्रप्रस्थं क्रमेण हतलक्ष्मीकमिव जातम् । अधुनापि यमुनायास्तीरे किञ्चित् स्थान-मिन्द्रप्रस्थनाम्ना समुन्नीयते । तत्र च भग्नप्राकारवेष्टितः कश्चिद् भूभागः पाण्डवानां सभास्थानमिति लोकैः सम्प्रत्यपि निर्दिश्यते । मोगलवरः सम्राट् हुमायुनस्तु अस्मिन्नेव प्राकारवेष्टिते स्थाने राजधानीं स्थापयामास । अधुना तु भग्नप्राकारमध्ये प्राधान्येन गृहद्वयमेव वर्त्तते । तत्रैकं हुमायुनस्य पाठागारतामन्यच्च महम्मदीयानामुपासनागृहत्वं लम्भितम् । अत्रैव द्वितले पाठागारे अध्ययननिरतो हुमायुनः, अन्तिकस्थादुपासनाभवनादुपासनाह्वानमाकर्ण्य त्वरयावतरन्, भागधेयवकल्यवशादेकस्मात् सोपानात् प्रभ्रष्टः, अचिरेणैव कालेन पञ्चत्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मवाप च। एतद् गृहमेव पाण्डवानां 'हवनगृह'मिति निर्दिश्यते तावदनिश्चितैर्निर्देशकैः। गृहस्यास्य निपुणमवेक्षितात् संस्थान-विशेषात् तादृगनुमानं नामूलकं प्रतिभाति।

मस्जिद-निकेतनं तु पाण्डवानामुपासनागारमासीदिति घोष्यते। अत्र गृहे पञ्चासनानि वर्त्तन्ते। श्रूयते च यत्, पाण्डवा यमुनायां स्नानं समाप्य तेष्वासनेषु उपविश्य सन्ध्यादिकं व्यधुः। गृहस्य पुरतः सूर्य्यकुण्डनामधेयं किञ्चित् कुण्डमपि दृश्यते। प्रासादस्यास्य निर्माणशैली, कारुकार्य्यम्, उपकरणानां प्रस्तरादीनां प्राचीनत्वं च जनवादं समर्थयन्त एव। मस्जिदभवने पञ्चानामासनानां समावेशः कुत्रापि न दृश्यते। तद्गृहं तानि चासनानि महम्मदीयभावानुगुणं परिवर्त्तनजातमुपगतानीति स्पष्टमेव। तथापि तेषां हिन्दुभावानुविद्धत्वं कथमप्यपह्नोतुं न शक्यते। तत्र प्राङ्गणे एकः कूपोऽपि विद्यते। स च द्रौपद्याः स्नानार्थं खात आसीदिति श्रूयते। अपि च पाण्डवप्रासादान्मथुरां यावत् कश्चिद् बिलमार्गोऽपि समवलोक्यते, परन्तु राजशासनात् स साम्प्रतमवरुद्धद्वारः कृतः। पाण्डवजनन्याः कुन्त्याः काचित् पाषाणमयी मूर्त्तिरप्यत्र लब्धा। कश्चित् लिङ्गरूपः शिवोऽपि अत्रैकस्मिन् मन्दिरे प्रतिदिनं पूज्यते। प्राकाराद् बहिर्भैरव-मन्दिरमप्यस्ति। तत्र भैरवविग्रहोऽपि विराजते।

परन्त्वस्मिन् विषये ऐतिहासिकानामैकमत्यं नास्ति। केषाञ्चन मतेन पाण्डवप्रासादानां चिह्नमपि इन्द्रप्रस्थे साम्प्रतं नोपलब्धुं शक्यम्। विजयि-राजसार्थैस्तत्सर्वं नाशितमात्मकृत्ये योजितञ्चेति।

अथेन्द्रप्रस्थात् कियत्यपि दूरे अनङ्गपालस्य पृथ्वीराजस्य च राजधानी आसीत्। अनङ्गपाल एव देहलीतिनाम्नः प्रवर्त्तक इति गीयते। जयचन्द्र-पृथ्वीराजयोर्वैरमधिकृत्य भगवता महाकालेन भारतस्य यस्तावद् भाग्यविपर्य्यासो विहितः, स तु श्रीमतां विदित एव। महम्मदघोरिणा कुरुक्षेत्र-समरभूमौ जिते पृथ्वीराजे देहल्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दुराज्यावसानं जातम्। पाठान-नृपवरेण च पृथ्वीराजभवनमधिकृतम्, राजधानी च तत्र स्थापयाञ्चक्रे। तद्भवनं हिन्दुचिह्नजातं परित्यज्य क्रमेण विजयि-राजविभूतिमेव दधार। अथ गच्छति काले पाठानमहीधराणां केचन पृथ्वीराजभवनं परित्यज्य, अन्तिक एव रम्यां राजधानीं कल्पयामासुः। इत्थं पृथ्वीराजभवनं शनैः शनैर्ध्वंसमेवाभजत। साम्प्रतमपि तत्र पृथ्वीराजकृतस्य मन्दिरस्य अङ्गविशेषमात्रमेव दर्शकानां चेतसि तत्कालीन-कथामुद्बोधयति। अद्यापि तत्र कश्चिन्निर्मलो लौहस्तम्भो दृश्यते। स हि हिन्दूनां रसायनविद्यापारीणत्वं सुष्ठु प्रतिपादयति। केचन कथयन्ति यदयं स्तम्भो भूपालेन खलु अनङ्गपालेन कारित आसीत्। चित्रमेतद् यदयं स्तम्भो बहुतिथे काले गतेऽपि न मालिन्यलेशमपि स्पृशति।

अथ कुतवस्तम्भस्तु श्रीमतां विदित एव। श्रूयते यदयं स्तम्भः पृथ्वीराजमहिष्याः संयुक्ताया यमुनादर्शनार्थं निर्म्मापितः।

अथ पाठान-राज्यप्रारम्भे कुतवुद्दिनस्तु परिवर्त्तनादिना आत्मनाम्नास्य निर्देशमकार्षीत्। ततः प्रभृत्ययं कुतवस्तम्भ इति नाम्ना घोष्यते। अस्यापि निर्माणविशेषदर्शनेनानुमीयते यदयं स्तम्भोऽपि हिन्दुराजेनैव निर्म्मापितः। साम्प्रतं पृथ्वीराजदुर्गस्य सीमानिर्देशः पुरातत्त्वविद्भिः कृतः। दुर्गाभ्यन्तरे योगमायादेवीस्थानमपि वर्त्तते। परन्तु साम्प्रतं समन्ताद् दुर्गस्य भग्नस्तूपनिचयो दर्शकानां चित्तं नितरां दुःखसन्तानसन्दानितमेव विदधाति। एवञ्च तोग्लकावादनामधेया यात्र तोग्लकराज-राजधानी दृश्यते, सापि भग्नप्राकारराजिनिचिता "कालो हि बलवत्तर" इति कालस्य सार्थक्यं प्रतिपादयति।

तथा च साधूक्तम्—"यदुपतेः क्व गता मथुरापुरी, रघुपतेः क्व गतोत्तरकोशला। इति विचिन्त्य कुरुष्व मनः स्थिरं, न सदिदं जगदित्यवधारय॥" इति।

अथ मोगलभूपालानां वासनगरी तु इन्द्रप्रस्थं निकषा, यमुनाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तीरे पर्वतोपरि स्थापिता। कालवशादियमपि साम्प्रतं दर्शकेभ्यो मोगलसाम्राज्य-सौभाग्य-गर्वस्य निदर्शनमात्रं प्रकटयति। अधुनास्तं गतेऽपि मोगलसाम्राज्यरवौ, प्राचीनकीर्त्तिसंरक्षणपरा महानुभावा आङ्गलराजेश्वरा मोगलराजभवनादिकं ध्वंसापचयाद्युपप्लवाद् रक्षितुं विधानमारचितवन्तः।

अथेयं मोगलराज-राजधानी महद्भिः प्राकारैर्यमुनया च परि-रक्षिता। समन्ताद् नगरप्रवेशाय समुन्नतानि तोरणानि वर्त्तन्ते।

तेषां च 'देहलीद्वारम्', 'अजमीरद्वारं', 'लाहोरद्वारं', 'काश्मीर-द्वार'मित्यादि युक्तं नामधेयमपि कृतमासीत्। नगर्याः पूर्वस्यां दिशि यमुनायास्तीरे मोगलराजवासो वर्त्तते। तत्र च प्रथमं सुदीर्घं वक्रं च प्रवेशद्वारमस्ति। ततो रम्यं सङ्गीतगृहं दृश्यते। तस्य पुरतः सभामण्डपं विलसति। तत्र हि सम्राजः कृते कारुकार्यखचितं समुन्नतं सिंहासनपीठमद्यापि राजते। तस्य पश्चात् सम्राजां प्रमोद-गृहैर्मन्त्रगृहैः स्नानगृहैर्महिषीगृहैरन्यैरपि विविधैर्भवनैः समन्ताद् व्याप्तम्। एकस्य प्रासादस्याभ्यन्तरे लिखितञ्चास्ति—

'स्वर्गो यदि धरायां स्यात् सोऽयं सोऽयं विराजते।' इति।

दुर्गाभ्यन्तरे महिषीभवनानामन्यतमं खलु सम्प्रति कौतुकागारतां प्रापितम्। अत्र हि मोगलभूपालानामस्त्राणि, चित्राणि वस्त्राणि, अन्यान्यपि विविधानि द्रव्याणि सुरक्षितानि वर्त्तन्ते। तेषु खलु सम्राज औरङ्गजेबस्य महानसिः कालपुरुषलीलां सुष्ठु प्रतिपादयतो-त्यवदातमेव। अथ दुर्गाद् बहिः, समन्तात् प्राचीनकीर्त्तिकलापा वर्त्तन्ते। तत्र प्रथमतस्तावद् हुमायुनस्य समाधिमन्दिरं प्रेक्षकाणां विस्मयमुत्पादयति। अत्रैव बाहादुरसाह-नामधेयः खलु अन्तिमो मोगलमहीपालः 'सिपाही'विद्रोहावसरे कृताङ्गलराजद्रोहापराधो भयाकुलः प्राणरक्षणाय न्यलीयत। अस्मादेव स्थानात् स गृहीतः संयमितश्च। अनेनैव सह मोगलसाम्राज्यमपि नामशेषमेव जातम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव न केवलमिदं हुमायुनस्य, परन्तु मोगलसाम्राज्यस्यापि समाधिमन्दिरमिति जनाः कथयन्ति । अथ मानमन्दिरम् (वेधशालाम्) अधिकृत्य किञ्चिद् वक्तव्यमेव। इदं हि हिन्दूनां ज्योतिर्विद्यानिष्णातत्वं सुतरामवगमयति। अत्र हि पुरा ग्रहादीनां गतिनिर्देशाय समवलम्बितास्तावत् शैलीविशेषा हिन्दूनां बुद्धिपाटवं क्रियाकौशलञ्च सम्यक् प्रतिपादयति ।

ननु विदितमेवेदं श्रीमतां यदियं देहली नगरी तोरणनिचयैः पुरा सुशोभितासीत् । अथ तेषु 'काश्मीरद्वारं' 'सिपाही'-विद्रोहयुद्धचिह्ननिवहमद्यापि वक्षसि दधत् प्राचीनमाभाणकं जनानां मनसि जागरयति ।

प्रशमिते 'सिपाही'विद्रोहवह्नौ, आङ्गलराजानुचरैरत्र पर्वतोपरि कश्चिद् विजयस्तम्भोऽपि संस्थापितः । स हि अभ्रंलिहेन शिरसानुदिनम् आङ्गलराजप्रतापोत्कर्षं प्रख्यापयति । एवञ्च कविवरस्य खसरोः समाधिमन्दिरम्, अशोकस्य स्तम्भद्वयम्, सहस्रस्य मानवानामेकदैवोपासनार्थं निर्मापितं 'जुम्मामस्जिद'नामधेयं महम्मदीयानामुपासनागृहम्, अन्यच्च बहुविधं रम्यं हर्म्यग्रमस्या नगर्य्या गौरवं नितरां वर्द्धयति। अपि च सम्प्रति आङ्गलराजेश्वरैः, प्राचीने खलु इन्द्रप्रस्थे स्थापिता नवा राजधानी नितरां मनोरमा जाता। राजवर्त्मभिर्दीर्घैर्मञ्चगृहैर्विचित्रैः प्रासादैश्चेयं पाण्डवानां द्वितीया नगरीव विराजते। इत्यमत्र बहु द्रष्टव्यमस्ति। नूनं शोच्यास्ते, ये नेमां महानगरीं पश्यन्ति। इति शम् ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातिपरिवर्त्तनम्

[निबन्धकः—श्रीघनश्याम-वेदान्ततीर्थः]

चेष्टाशतेनापि पटः कदाचिद् घटायमानो न घटत्वमेति ।
शूद्रो द्विजाचारसहस्रयुक्तो द्विजायते न द्विज एव स स्यात् ॥१
खरोऽश्ववत् स्याद् यदि शीघ्रगामी सुशिक्षया वाथ यदृच्छया वा ।
न जात्वसौ घोटकशब्दवाच्यो लोके भवेत् प्राकृत एष पन्थाः ॥२
न कर्म्मणायाति न वा प्रयाति नित्या च जातिः समवैति नित्यम् ।
व्यक्तिष्वनित्यास्विति जन्मनः प्रागूर्द्ध्वं च सा भाति समानरूपा ॥३
न जातु जातेः परिवर्त्तनं भवेद् नवा गवाम्बा नृसुतं प्रसूयते ।
उत्कर्षमाप्तुं यदि कर्म्मगौरवं कुर्य्यास्तदा तत् सफलं भवान्तरे ॥४
न कश्चिदात्मोन्नतिसाधनं शमं दमं यमं वा यमभीतिनाशनम् ।
समीहते कालवशादधोगतेर्बीजं च जातेः परिवृत्तिमिच्छति ॥५
कुरुष्व कर्म्माखिल-धर्म्मरक्षकं सुकर्म्मवद् धर्म्ममतीव शर्म्मदम् ।
नर्म्मप्रसङ्गं परिहाय सर्वदा ततस्तु जात्युन्नतिमेवमाप्स्यसि ॥६
सत्यादयो येऽखिलशास्त्रसम्मताः साधारणाः सर्वशुभाविरोधिनः ।
सुसिद्धिमादौ परिलभ्य तेष्वथाधिकारवान् स्यान्निरतः समुन्नतौ ॥७
सदा सदाचाररतेन चेतसा सुरासुराराध्यपदं परेश्वरम् ।
ध्यायेत् सदाहारविहारचेष्टया दयामयोयस्तु तदा दयोदयः ॥८
पूर्वपुण्यवशतो गुरोः कृपालेशतो यदि भवेद्धरेः कृपा ।
भाजनं हि न च तत्र जातितो गौरवं किमपि कर्म्मतोऽथवा ॥९
विप्राज्जातो हीनसन्ध्योऽपि वन्द्यो नैवं सन्ध्याशालिनो जातिरन्या ।
शुद्रोऽश्वत्थः पूजनीयो वटो वा नैवं तालाः संविशालाश्च शालाः ॥१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वाचार्य्यादिष्टमार्गप्रकारं पर्य्यालोच्याचर्य्यते यैः स्वधर्म्मः ।
ते विप्रा वा क्षत्रिया वाथ शूद्रा भुक्तिं मुक्तिं चाप्नुवन्तीह शश्वत् ॥११
असंयमाचारविचारशालिनः सदा कदाचारपथानुवर्त्तिनः ।
व्रजन्त्यधः सद्द्विजवंशसम्भवा अप्यूर्द्ध्वगा नीचजनाः सुमार्गगाः ॥१२
ये स्वधर्म्मपरिनिष्ठिताशयाः शास्त्रसिद्धनियमैरथोद्धताम् ।
वृत्तिमिन्द्रियचयस्य साग्रहं शान्तयन्ति किल ते नरोत्तमाः ॥१३

भ्रममार्जनम्

एतद्वर्षीय-पत्रिकाया द्वितीयसंख्यायां तृतीय-(एतत्) संख्यायाञ्च "वेदान्ते साङ्ख्याधिक्षेपपरतानिरासः" इति शीर्षकप्रबन्धस्य कर्त्तृनामपदांशे "भादुड़ी"ति सम्पातताया-तोपाधि-परिवर्त्तनेन "दाँ" इति भविष्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्थाः *

		मूल्यम्	
२।	कालीतन्त्रम्—सटीकानुवादम्	साधारणानाम् ॥/०)	सदस्यानाम् ॥०)
३।	शङ्करीसङ्गीतम्	,, I/०)	,, I/०)
४।	शुक्तिवादः—गदाधर-भट्टाचार्य्यविरचितः, सटीकाद्वय-भाष्यानुवादसहितः	,, २)	,, १॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,, ३।०	,, ६)
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा	१।०)	,, १)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,, I०)	,, I/०
८।	कारकोल्लासः—भरत-मल्लिककृतः, सोदाहरण-कारकनिर्णयरूपः	/०)	,, /०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, बाङ्गला-भाषाटिप्पणसमेता	॥०)	,, ॥/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्यकृतम्	,, I/०	,, I/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थः	,, १।०)	,, १)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्यकृतम्	,, I/०	, I/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम् ,,	॥०)	,, ॥/०)
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्)	साधारणानाम्	सदस्यानाम्
	श्रीकालीपद-तर्काचार्य्यकृतम्	,, १।०)	,, १)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	,, १॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विजया रथयात्रादि द्वादशयात्राप्रकृति-रूपम्	।)	,, ।०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्	२॥०	,, २)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृती वैष्णवदर्शनग्रन्थः	१।०	,, १)

* देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा बङ्गाक्षरमुद्रितनामानि बङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्था:

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कृष्णनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्था:

१। समञ्जसा—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। रामायणम्—वाल्मीकि-विरचितम्।

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
38, *Vidyasagar Street, Calcutta.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

१८५१ शकीये श्रावणे
August, 1929.]

१२श-वर्षस्य ४र्थ-संख्या
[Vol. XII, No. 4.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारते भातु भारती

सम्पादकः—श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकः—श्रीदुर्गामोहन-भट्टाचार्य्यः, एम्. ए.

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—



এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে,অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কথানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भिषक्चक्रचूडामणिः
कविराज—गङ्गाधर-कविरत्नः ।

न्मशकाब्दाः—१७२०   मृत्युशकाब्दाः—१८०७

कविराज—श्रीयुक्त-गणपतिसेन-कविरत्नस्यौदार्य्येण प्राप्तेयं प्रतिकृतिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

August, 1929.	१८५१ शकीये श्रावणे १२श-वर्षस्य ४र्थ-संख्या	Vol. XII. No 4.

वर्षबिन्दुः

(पूर्वतोऽनुवृत्तः)

[निबन्धकः—इ. वि. रामशर्म-नम्पूरी]

साध्वीमणेस्त्वङ्गदपाङ्गकोण-समुल्लसत् सत्प्रणयाङ्कुरस्त्वम् ।
मनस्यकस्मात्कुपितस्य शुद्धे जातोऽनुतापोऽपि च स त्वमेव ॥२२
स्वर्वाहिनीबिन्दुविनिर्गमाय कृत्वा धनुर्जिह्ममधः स शक्रः ।
अयःशरैः किं कृतवान् नु सेतुमित्यभ्रकैः शोभितमूषनाशे ॥२२
निदाघकाले नितरां दिनानां विराम-चारुत्व-विघातकत्वात् ।
प्रतापयन् लोकमभूदिहाब्दः प्रह्लाददाता स हिरण्यदैत्यः ॥ २४
परोपकारप्रवणस्य मेघः प्रादुर्भवायैव तव व्यतानीत् ।
इमां निजां जीवित-दूरयात्रां तदीय-जन्माद्य कृतार्थमासीत् ॥२५
अङ्गीक्रियात् काममनर्घदिव्य-सायुज्यमभ्रं तदतीव धन्यम् ।
अपार-नीहार-कृपा-रसार्द्रो भवानिहायातु वि-नाथ-बन्धो ।२६
विवारयन् वक्त्रमुदीच्य तत् खं पश्येव चास्ते ह ! ह ! चातकस्ते ।
मनोहरे तस्य गले जवात्त्वमन्तर्विभूषा-मणितां प्रयाहि ॥२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरन्तनश्रीमुनियाज्ञवल्क्यवान्तं यथा तित्तिरिपक्षिशावः ।
वेदान्तसर्वस्व-रहस्यसारं स चातकः संस्वदिता तथा त्वाम् ॥ ३८
सुधाकरस्याग्रकराङ्कुरं तं यथा चकोरः स तथा तपस्वी ।
प्रायोपवेशव्रत-तान्तधीस्त्वामास्वाद्य साक्षादमृताशनः स्यात् ॥ ३९
किमत्र चित्रं खलु नीडजस्य क्षुद्दाहशान्त्यै तु परानपेक्षम् ।
आत्मार्पणं कर्म पुराऽपि चाद्य जीमूतवाहस्य वरिष्ठधर्मः ॥ ४०
तवाथवातीत्य जवादधस्तात् तदत्र रत्नाकरवेदिकायाम् ।
शुक्तौ महत्यां पतनं समस्तु दिव्यस्य हव्यस्य हुतार्चिषीव ॥ ४१
महाकवीन्द्रस्य नवाशयः सत्-पद्यस्य मध्ये न यथा समेति ।
यथाऽपरोक्षः स च तत्त्वबोधो भक्तान्तरङ्गं परमं प्रयाति ॥ ४२
हा! तावदब्धेरधरे निषण्णां तले विषण्णां भवति प्रविष्टे ।
तां शुक्तिकां सा तरसैव च स्यात् कान्तिच्छटा-कन्दलकामधेनुः ॥ ४३
कालक्रमात् त्वं कमनीयरूपः कल्याणमुक्ताफलतल्लजः स्याः ।
तारुण्यवल्यास्तरलायताक्ष्या नासाग्रभूषा-नव-रत्नराजः ॥ ४४
अनङ्गसाम्राज्यपताकिकाया नासामणिस्त्वत्तरुणीमणेस्त्वम् ।
बिम्बाधराकीर्णसितं स्मितं तत् करिष्यसि द्राक् पुनरुक्तशोभम् ॥ ४५
तवाथवाऽग्र्योपवनाङ्कणस्थे महातपक्लान्तदले स्थितिः स्यात् ।
'रोसा' प्रसूने शुकशावकस्य चञ्चौ यथा चारुपयःकणस्य ॥ ४६
मुखस्य कान्तिं मुकुरे निरीक्ष्य विचालयन्तीव शिरो वराङ्गी ।
'रोसा'भिधा सा तरसा धुता स्यात् स्वकीयमाध्वीरसपानमत्ता ॥ ४७
पानीयबिन्दो भवताक्षताङ्ग-विलेपनानां कुशलेन तस्य ।
सुमस्य नेच्छास्त्यपरे दलानां लावण्य-पीयूष-सरोऽवगाहे ॥ ४८
शनैः शनैर्बालपलाशपत्र-गारुत्मतश्रीमणिमञ्चगं तम् ।
समौक्तिकं कुङ्कुमविग्रहं स्याद्वायुः समालोक्य कृतार्थजन्मा ॥ ४९
भूत्वा मधुस्वादुकणाङ्कुरस्त्वं नीत्वा सुमे तत्र कियद्दिनानि ।
मन्दानिलाय भ्रमरार्भकाय विभज्य दद्याः स्वतनुस्वमद्य ॥ ५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पलाशपर्यच्छदतल्पजाल्तर्लग्न' भवन्तं श्रियि नृत्तवत्याम् ।
मृदिष्टपट्टास्तरणे विशीर्णं मञ्जीरमाणिक्यमिवेक्षिताहे ॥५१
केकारवेण स्तनिताय दत्त्वा प्रत्युक्तिमग्रे प्रमदोन्मदाढ्यम् ।
प्रसार्य पिच्छं विवलच्छिखी स कृषीवलान्तःप्रतिबिम्बरूपः ॥५२
यत्र स्थले त्वं परमृश्यमृङ्गसमः सकृन्न्यस्यसि पादपद्मम् ।
प्रत्यक्षगारुत्मतपद्मराग-पद्मालयायाः स विशिष्टसौधः ॥५३
महाजनास्ते भवता प्रहीणं महीविभागं मरुमामनन्ति ।
सच्चित्स्वरूपस्य कृपाकटाक्षैरलक्षितं कल्मषशालिनश्च ॥५४
यद्येकदा ते स-सहोदरस्य सान्निध्यसौभाग्यमजीन स्पृष्टा ।
प्रतप्तया वालुकया लभेत सुशाद्वला स्यादपि सा 'सहारा' ॥५५
चणार्द्धमायुस्तृणमात्रमङ्गं कृते परेषामुभयं च दत्त्वा ।
स्वजीवितोद्देशनिवृत्तिमीप्सुं वृणोम्यहं देशिकशेखरं त्वाम् ॥५६
मोदामहे नैव नभःस्थितं त्वां स्तुमो भवन्तं तमधः पतन्तम् ।
दृष्टं कृतार्थीकृतजीवितानां किरीटमाणिक्य ! तदेमि तेऽपि ॥५७
आगामिनां त्वं जनुषां शतेऽपि परोपकारव्रतबद्धकक्षः ।
आकल्पमादित्यसमस्य ते सा दैनन्दिनव्यापृतिरेव धन्या ॥५८
युद्धाय सज्जस्य भटस्य लब्धा मुखप्रभा कापि रिपूंस्तु जित्वा ।
उरश्छदप्रश्लथनोत्सुकस्य योधप्रभोः पूर्णमुखप्रभाऽन्या ॥ ५९
दिवो मुखं सृष्टकलङ्कशङ्कम् ह्रद्दक् च भूमिः शिशिरत्वमागात् ।
सर्वत्र सन्तुष्टिरलं व्यलासीत् सर्वं शुभं त्वत्करुणाविलासात् ॥६०
जयाग्र्यकल्याणगुणैकसिन्धो ! जयाद्य विश्वोत्तरविश्वबन्धो ! ।
जयात्र विख्यापितसर्वजन्तो ! जयाग्र्यपर्जन्य-कृपाम्बुबिन्दो ! ॥६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्वभौमो धर्मः

(पूर्वतोऽनुवृत्तः)

[निबन्धकः—श्री........]

मोहं रुणद्धि विमलीकुरुते च बुद्धिम्
सूते च संस्कृतपदव्यवहारशक्तिम् ।
शास्त्रान्तराभ्यसन-योग्यतया युनक्ति
तर्कश्रमो न तनुते कमिहोपकारम् ? ॥

कर्म्म ब्रह्मविचारणां विजहतो भोगापवर्गप्रदां
घोषं कञ्चन कण्ठशोषपुलकं कुर्वन्त्यमी तार्किकाः ।
प्रत्यक्षं न पुनाति नापहरते पापानि पीलुच्छटा
व्याप्तिर्नावति नैव पात्यनुमितिर्नो पक्षता रक्षति ॥

आदौ धर्म्मे प्रमाणं विविध-विधिभिदा शेषतां च प्रयुक्तिं
पौर्वापर्य्याधिकारौ तदनु बहुविधं चातिदेशं तथोहम् ।
बाधं तन्त्रं प्रसङ्गं नयमनय-शतैः सम्यगालोचयन्तो
भिन्ना मीमांसकेभ्यो विदधति भुवि के सादरं वेदरक्षाम् ॥

मीमांसकाः कतिचिदत्र मिलन्ति वेद-
प्रामाण्यसाधनकृतोऽपि न तेऽभिवन्द्याः ।
उद्घोषितोऽप्युपनिषद्भिरशेषशेष-
ब्रह्मैव नाभ्युपगतः पुरुषत्तमो यैः ॥

* * * *

इदमेव निरूपयद्भिः पौराणिकैः कथ्यते—

अक्षपादप्रणीते च काणादे साङ्ख्य-योगयोः ।
त्याज्यः श्रुतिविरुद्धोऽंशः श्रुत्येकशरणैर्नृभिः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।
श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ ॥

सुतरां व्यावहारिकं वस्तु परमपरञ्च पारमार्थिकमिति धिया शास्त्राणां षण्णामपि वर्त्तत एव लक्ष्यैक्यं, प्रतिपादनसाम्यमविरोधश्चेति न तिरोहितं किञ्चित्। पशुपतिभक्ता नारायणभक्ता इतरेऽपि च तत्तद्देवानां स्वविधानानुरूपं पूजोपकल्पनं कुर्वन्ति, स्वपरभेदेन च साम्यं वैषम्यं च तेषामपि सिद्धान्तेऽन्तःपतति परमितस्तोऽपि गतार्थाः।

स्थितमिदानीमास्तिकानां मतम्। नास्तिकानां पुनर्मतपरीक्षावसरे तेषामग्रणीश्चार्वाक एव पुरतः समायाति। लौकायतिकापरपर्य्यायः सोऽयं प्रत्यक्षमात्रप्रमाणविभवः कस्यापि वस्तुन्यात्मापरविचारनिर्विशेषमस्ति निक्षिपन् पापात्, लोभात्, कामात् मोहाद्वा मनागप्यातङ्कं भयं वा नानुचिन्तयन् देहमेवात्मानमध्यवस्यति। एष च पुनरालस्यग्रहगृहीतो नैसर्गिकेण वेदद्रोहेण परमात्माप्रत्ययेन च पुरस्कृतः "न स्वर्गो नापवर्गो वे"ति बहुशः प्रगल्भते।

चार्वाकादीषदधिकविवेकवन्तो माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकाश्चतुर्विधा बौद्धाः सर्वशून्यत्वं वाह्यशून्यत्वं वाह्यार्थानुमेयत्वं वाह्यार्थप्रत्यक्षत्वं च पुरस्कृत्य भगवतो बुद्धस्य नास्तिकत्ववादानुद्घोषयन्ति। आद्याः "यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी"-त्यादि-नयेन कृत्स्नं वस्तुजातं शून्यमेवेति प्रत्यवतिष्ठन्ते। द्वितीयो योगाचारः—अनादिवासनावशतया ऋते वाह्यार्थाननेकाकारैरवभासमानां बुद्धिं केवलां बोधयति। स हि भगवदुपदेशं "सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यम्" निशम्य तस्य भावनाचतुष्टय-प्रचयबलान्निखिलवासनोच्छेदविगलित-विविधविषयाकारोपप्लव-विशुद्ध-विज्ञानोदय एव महोदय इति मन्यते। सौत्रान्तिका वाह्यान् पदार्थाननुमेयान् मन्यन्ते, वैभाषिकाश्च पुनः शून्यविज्ञानवादादीनां मध्ये पारस्परिकं विरोधं विलोकयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्हता विवसनाः सौगतानां क्षणिकत्वं खण्डयन्तः सप्तभङ्गीन्यायानुसारिणो जीवा-जीवा-स्रव-संवर-निर्जर-बन्ध-मोक्षान् पदार्थानभ्युपगम्य शरीरपरिमाणं जीवं मन्यन्ते।

तेषु तेषु स्थलेषु समीचीनतया आस्तिकदर्शनैः खण्डितास्तदिमे नास्तिका अपि निम्नवर्गीयच्छात्राणां युक्तिजालमिव तर्कजालमुपन्यस्य स्वीयं मतं प्रचिख्यापयिषवः, वकुलमालतीपारिजाततरव इव पुष्पराशिभिः शरैर्मन्दरशृङ्गं प्रहर्तुमभ्युद्यताः, आस्तिकदर्शनानामलङ्कारायैव जायन्ते। चार्वाको लोकदृष्टिं पुरस्कुरुते, परन्तु बौद्धा आर्हताश्च ततः कमप्युदारतरं विचारमादाय प्राधान्यं ततः समधिगच्छन्ति। लौकिकसुखैषणया तत्रापि च मर्यादाभङ्गमङ्गीकृत्य कर्मकरणान्नितरां क्षोदीयान् खलु चार्वाकविचारः। नायमध्यात्मविवेचनापराङ्मुखः स्रक्चन्दनवनितादिष्वेव विषयेषु लग्नो जातुचिच्चेतयितारमात्मानं स्वप्नेऽपि ध्यायति। सौगतानामपि क्षणिकत्वादिकं दुस्तर्कं युक्त्याभासञ्च कक्षीकृत्य योद्धुं प्रवृत्तिरध्यात्मसंगरे। परन्तु तेऽपि पराहता एवास्तिककुञ्जरैः। यत् किमपि भवतु, 'ऋणं कृत्वा घृतं पिब'त्तु चार्वाकेषु न लोके कोऽपि प्रत्येति, दूरतस्तु परमात्मसमीपे तेषां चर्चा तदिह क्रम-विचारचिन्तायां दर्शनानां प्रथमभूमिकास्तु इमे चार्वाकसौगतादय एव पदमाप्नुवन्ति। "तुषकणोपहितान् व्रीहीन्" "दुःखोपसृष्टं सुखञ्च" कामयमाना अधमपुरुषार्थपक्षपातिनोऽनुपपन्नविचारा अपि तस्मादेते मैत्रीकरुणादृग्निक्षेपेण समुद्धरणीया एवेति कः संशयीत? आरम्भात् प्रभृत्येव वेदवादनिन्दनपरैराप्तपरिपन्थिभिर्नास्तिकैरास्तिकानां कोऽपि विरोध एव लक्ष्यीक्रियते, परं कारणैरुपरिष्टान्निर्दिष्टैस्तेषामपि स एव गन्तव्योऽध्वा।

तदेतत् स्वल्पमतीनां नास्तिकानां मतं कपिलस्य ब्रह्मसूत्रकृतश्च सूत्रनिर्माणकालात् प्रागेव भारते प्रासरदिति तेषां खण्डनया प्रतीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषत्स्वपि गुरुरात्मावबोधनाय समागतं शिष्यं क्रमशः प्राणादीनां परीक्षया देहादिभ्यः पृथक्स्वरूपमात्मानं ग्राहयतीति मन्दधियां प्रकृतिमनुशीलयन्त्याः श्रुतेरुभयपक्षवैशद्यकारिणी पद्धतिः। अवश्यमेव सूत्रकाराणां बादरायणादीनां केचन सन्निहिताः प्रतिवेशिन एव तथाभूतं सिद्धान्तं कस्मैचन स्वार्थानुसन्धानाय प्रावर्त्तयन्निति प्रवादः सार्थकः। बृहस्पतिर्वा भवतु कश्चनान्यो वा भवतु, कालक्रमेण तैस्तैरेव विचारैः सम्भाव्यमानं कार्य्यसाधनं कर्त्तुं दुष्टेनापि पथानुयान्त्येव विपश्चितः—"घनाम्बुना राजपथे हि पिच्छिले क्वचिद् बुधैरप्यपथेन गम्यते।" परन्तु—सौगतानामार्हतानाञ्च मतं भगवतो बुद्धस्य पार्श्वनाथमहावीरादेश्च प्रादुर्भावानन्तरं प्रचलितम्। बुद्धदेवस्य निर्वाणकाले प्रारम्भोन्मुखः सौगतो धर्म्मस्तन्मृत्योरनन्तरं विम्बिसारा-जातशत्रुप्रभृतिभिः सोत्साहमुत्थापितो राज्ञः अशोकस्य समये परं समुदजृम्भत। तेन चात्मधर्म्मसमुन्नतये न केवलं भारत एव वर्षे, अपि तु भारतवर्षं परितः सुदूरव्यापिषु देशेष्वपि उपदेशाः शिला-प्रस्तरादिलेखेभ्यः, उपदेशकैश्च प्रेषिताः। किमधिकं पुत्रं पुत्रीञ्च तदर्थमसौ बहिर्देशं संप्रेष्य तथा प्राचारयद्धर्मं यथा संसारस्याद्यापि कियन्तमंशं सौगतेन धर्म्मेणाक्रान्तं निभालयामः। तथैव जैनानामपि सिद्धान्तो जीवाहिंसामूलकः प्रचरति। एष्वेव कालेषु प्रसिद्धिं गते बौद्धधर्मे भगवता शङ्करेण वैदिकधर्म्मस्य निःश्वासमात्रेणानुमित-जीवातोः सकरग्रहमुद्धारं कर्त्तुं भूतले आत्मावतारितः। प्रस्थानत्रयीं विधाय बहूंश्चोपदेशकान् शिष्यानुत्पाद्य राजशक्तितोऽपि साहाय्यमर्जितम्। एतदुक्तं भवति—सूत्रकृतां कालादेव प्रचलतामास्तिक नास्तिकविचाराणां भाष्यकृतां कालेऽपि भूरिशः प्रचारोऽभवदिति विद्वच्चूडामणीनां वाचस्पत्युदयनादीनां सोपष्टम्भखण्डनैरवसीयते, यद्यपि सततमेवानास्थया ताटस्थ्येन च समुपेक्षिता एव नास्तिका आसन्। प्राक्तना राजानोऽपि सौगतमतानुयायिनः स्वधर्म्मप्रचाराय बलात्कारं नाकु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्वन्, नापि यावनीं शिखाकर्त्तन-सूत्रोच्छेदनादिकां परिपाटीमकामयन्त।

आस्तिका दर्शनकृतोऽवतारवादं चातुर्वर्ण्यस्थापनं प्रामाण्यसम्बन्धे आप्तवाक्यानामनुशीलनञ्च साधु मन्यन्ते, परन्तु नास्तिकाः सर्वमेतद्विहाय यथाकामं धर्मपरिवृत्तिं सहमाना लोकोपकारमात्रपरेषु समधिकं श्रद्दधानाश्चिरादागतामपि कौलिकीं परिपाटीं शंकाकलङ्कग्रस्तामिव कल्पयन्तः प्रतिपलं परीचन्ते। अध्यात्मवादस्य प्रचारो यतः प्रभृति विरलो जातः, यतश्च सौगतैर्दिक्पटैर्विभिन्नमतानुयायिभिश्च नास्तिकैर्भारते पदं कृतं, ततः प्रभृत्येव परमात्मचिन्तने शैथिल्यमापतितं, भौतिकीषु च कामनासु क्रमशः प्रवृत्तिरुन्नता। जीवात्मवादस्य चर्चया येषां कालस्तरुतले याति, त एव साधारणैर्मुद्राकर्षटान्नचिन्तने व्यापृताः पथ्यन्तरमेव समाश्रयन्। सोऽयं धर्माणां संक्रान्तिकालस्तथाविधां परिस्थितिमुपास्थापयद् येन उपदेशानां सर्वत्र सम्भूतं दुर्भिक्षम्। यवनानां साम्राज्ये परदारापहरणमार्य्याणां शिरश्छेदः, परद्रव्यलुण्ठनञ्च तथा प्रवृद्धिं गतं, येन सकलेयं भारतधरा भग्नावशेषमपि धर्ममन्दिरं पुनरवस्थापयितुं कृच्छ्रादेवापारयत्। परःशता मानवा यावनं मतमङ्गीकृत्य श्रुतिदर्शनोपपादितं सिद्धान्तं व्यस्मारयन्। शतञ्च पुरुषाः सबलात्कारमाकारिता दुहितॄरपि तेभ्यः प्रायच्छन्। यद्यपि तेष्वपि कालेषु धीरधौरेयाणां सहस्रं प्राणैः पणैः तैः सह समरे निपातमाप, परन्तु धार्मिको ह्रासोऽन्तर्वृद्धिं गच्छन् व्रण इव बहिरनवलोक्यमानोऽपि अन्तर्महतीं समृद्धिं विधाय समस्तमेव देशमेकपदे जग्रास। । परन्तु सर्वत्र नैराश्य नीहारावृतेऽपि भारते उषसि नभोमार्गे विकीर्णारुणरागरञ्जिता लेखेव तदानीमपि परमात्मना बहूनां हृदये धर्मबीजं सारवती शक्तिश्च समर्पिते। एतादृशेष्वेव धर्मसङ्कभीरुषु पूज्यपादाचार्य्याः श्रीमन्तो रामानुजस्वामिनः प्राचीकटन्, यस्योपदेशसारैर्भक्तिभावनापरिप्लावितैर्भूयाम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भागो धर्म्ममर्म्मज्ञः सम्पन्नः। 'हिन्दीभाषामवलम्ब्य कवीरादयोऽपि दार्शनिकानां भावानां प्रचाराय समुदयतन्त। श्रीचैतन्यदेवश्च वङ्गभूमिं कीर्त्तनकला-सुधाधारया प्लावयन् नवधा भक्तिं विस्तार्य्य चन्द्र इव चमच्चकार वार्त्तोन्मुखांश्च वङ्गान् ररक्ष। एषां समये विप्लव-तमोमालया साम्राज्यगगनं सर्वदा परीतमासीत्, निशाचराणां कवलमिव च भारतीयाः पाटच्चरैरैकागारिकैर्दस्युभिश्च पर्य्यपीडयन्त। राजनीति-निराधारापि धर्म्मनीतिः समाजशृङ्खलायाः विचारविभागस्य च विलीयमाने सत्त्वे लोकैरदोच्यमाणा मन्थरं पदं चक्रे यावन्नानकादिभिः पञ्चनदीयैः संस्थापिता धर्म्मान्तरङ्गा समाजशृङ्खलाभित्तिः कापि चमूरेव संघट्टिता, यानुपदमेव वास्तविकं चमूपदमलञ्चकार। अयमाशयः—दार्शनिको धार्मिको वा विचारो विरलं विलोक्यमानानां संस्कृत-व्यवसायिनामेव हृदये श्रितः; इतरेषां विप्लवमये जीवने पदमधान्मोहमयी अज्ञानता। केचिच्चिरात् विलासदाम्ना संदानिताः कामकुण्डे आत्मानं जुहुवुरन्ये च यावनानामाततायिनां दूरतरैः कल्पनातीतैरत्याचारैर्जीविनोऽपि मृता इव दिनान्यगणयन्। जीवो वा परमात्मा वा भक्तिर्वा ज्ञानं वेति विमर्शः केवलं संस्कृतज्ञानां कवीनां हृदये व्यराजत। दिष्ट्या तदानीं सूरदास-तुलसीदास-समर्थरामदास-प्रभृतिभिः गीतगोविन्द-प्रबोधचन्द्रोदय-चन्द्रप्रभचरित-बुद्धचरित-प्रभृति-कर्तृभिरिव काव्यसंगीतसुधया धर्म्मकर्म्ममार्गे लोकान् व्यापारयितु सुपक्रान्तम्। एषामेव वाणीविभूत्या कथञ्चिल्लुप्ता अपि श्रुतिस्मृति-दर्शनश्रवणमननाभिलाषाः पुनरपि समुज्जीविताः। हन्त! अद्यापि तामेव परिस्थितिं पश्यतां हृदयेषु तथैव कष्टं भवति। राष्ट्रे सर्वचोपचीयमानं जातीयं वैमनस्यं राष्ट्रस्यान्तःकरणं शातयति। पाश्चात्य-चाकचिक्यमुग्धास्तदनुकरणपरायणाः पाश्चात्यवेशभाषाभावभूषितामिव भारतभूमिं द्रष्टुं प्रयतन्ते, नाल्पमपि च ततो हानिं विभावयन्ति।

यूरोपीय-दर्शनकाराणां शताधिकानां कियन्तश्चन पूर्वतनाश्चार्वाका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इव भूतोपात्तका जडचेतनभेदं स्थूलमुपादाय विविचयन्तः परमात्मतत्त्ववञ्चिता एवासन्, परन्तु कालान्तरे "साक्रटिज"मारभ्य तच्छिष्यपरम्परया आत्मानात्मविचारः प्रवर्त्तितः। "प्लेटो" "अरिस्टटल" प्रमुखैस्तदानीमीश्वरसत्ता स्वीकृता, तमेव परमं मत्वा तद्भक्तिकर्म्मणि च व्यापारिता जनाः। पश्चान्मनोविज्ञाना-(Psychology)-नुभवपरीक्षानुभव-वादादीनां मतानां प्रसिद्धिरभूत्। एषां "कांटस्य" परीक्षावादेन प्राधान्यमलुप्यत, संविद्वस्त्वनुभववादिनश्च परमं स्थानमवापुः। अथ तु मनोविज्ञानादिष्वेव नवनवाविष्कारेषु पाश्चात्यदार्शनिकानां मनः संलग्नम्। ते प्रत्यक्षमनुभवनीयानां पदार्थानां पुरतः कल्पनागतं वस्तुजातं नाभिनन्दन्ति। विज्ञानवादिनस्तर्कपराः प्रायेण हि परमात्मसत्तां पश्चात्कृत्य वस्तूनि अनुसन्दधते। तेषां हृदये तात्त्विकी रहस्यजिज्ञासा तिष्ठतीति न ते तत्रान्तःकरणं व्यापारयन्ति। मानवीयशक्तेरतुलनीयं बलमिति ध्यायता विज्ञानवादिना सह स्थूलतो दूरं वृद्धिमुपयाति परमेश्वरवादिनां विवादः। भारतीयाः शास्त्रकारास्तु—

> "योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः।
> स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः॥"
> "भवानीशङ्करौ वन्दे श्रद्धा-विश्वासरूपिणौ।
> याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम्॥" इति

जल्पन्तस्तर्कपरिशीलितेन आस्तिक्येन विचारमेव सर्वत्र प्रशंसन्ति, न तु विपरीतम्। विलोक्यते—वर्त्तमानसमये विज्ञानोदयेन सह नवनवेषु पदार्थेषु आविष्क्रियमाणेषु भौतिकविभूतिकुहकाच्छन्ना दूरङ्गता क्रन्दति वराकी शान्तिः। का कथा ईश्वर-चिन्ताया अध्यात्मचर्चाया वा? विज्ञानवादेन क्रियमाणां क्षतिं वीक्ष्य तज्जनितामुपकृतिञ्चोदीक्ष्य सर्वथा लोभपाशिता भारतीयास्तत्रापि प्रविशन्ति;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परन्तु परमात्मनोऽनुकम्पया माभूत् तेषामात्मविनाशो भारतीयत्वस्य च प्रलय इति परमात्मानं वयं सदैव याचामहे ।

पुराणेभ्यः प्रतीयते पुरा आपामरसाधारणं सर्वेषां परमात्मानुचिन्तनं वर्णसमाजानुगुणं कर्त्तव्यञ्चाभीप्सितमासीत् । प्रजा पापेभ्यो भीता पुण्यकर्म्मसु रमते स्म । दुःखात् त्रस्यद्भिः सर्वैरेव संसारसागरसंतरणतरणिकल्पः परमात्मचरणः शरणीकरणीयो ज्ञायते स्म । ते स्वयं शान्तिपूर्वं तिष्ठासन्ति स्मेति न कमपि प्रतिवेशिनमप्युद्वह्यन् । भूतद्रोहं विहायाहिंसया जीवनं यापयन्तस्ते जनप्रियमात्मानमन्वतिष्ठन् ।

"बाइबिल"-"कुरान" प्रभृति-विदेशीयग्रन्थानां तत्तद्देशीयानां धर्म्माचार्य्याणाञ्च विचारेणास्माकं सत्यपि विरोधबाहुल्ये परमात्मविषये कर्म्मादिविधानविधौ यमनियमादिपालने च भवत्येव तुला ।।

तदेभिर्विवरणैः प्रश्नत्वेवायमनुयोगो हृदये स्थानमधिकुरुते "कच्चिदीश्वर एक एवास्तुत स्विचतुराः ?" "ईश्वरीयोपदेशः किं बहुविधो भवति ?" परमेतस्योत्तरं पारमार्थिकग्रन्थेषु सर्वत्रैव समानरूपेणान्तर्निहितं विलोक्यते । समाजसंस्था-देश-कालप्रकृतिवैचित्र्येण विचारवैचित्र्यं मानवानां भवति, परन्तु तेऽपि परमात्मशक्तेरङ्गरूपं दधाना यान् विषयान् समभावेन स्थापयन्ति, त एव विषयाः परमात्मनो ज्ञानसंदेशात्मना विनिर्दिश्यन्ते । नास्ति कोऽपि देशो यत्र धर्म्मग्रन्थेषु अहिंसा-सत्या-स्तेय-ब्रह्मचर्य्या-परिग्रहाभिधस्य यमस्य, शौच-सन्तोष-तपः-स्वाध्यायेश्वर-प्रणिधानात्मकस्य च नियमस्य न स्यादुत्कर्षः, नापि भूतदयायाः समवेदनायाश्च मानवजातेर्भवेदुपदेशः । सुतरां नास्त्यत्र अणीयानपि संशयलेशो यत् समग्राणां दर्शनानां, पुराणानां, धर्मग्रन्थानां चैकमेव तत्त्व, समानमेव रहस्यं वस्तुतो विद्यते ; यत्र (१) परमात्मनि आत्मसमर्पणम् (२) विश्वबन्धुत्वम् (३) यमनियमादीनां परिपालनम् (४) सचराचरजगता समवेदनाप्रकाशः—इति विषया अन्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवन्ति। एवमेव विषयं प्रदर्शयता भगवता श्रीकृष्णेन गीतासु गीतम्—

"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम् ॥"

उपनिषदश्च गायन्ति—

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।"
"सह नाववतु सह नौ भुनक्तु सह वीर्य्यं करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥" इति शम्।

कविः कृष्णकान्तशिरोरत्नः

[निबन्धकः—श्रीहरगोविन्दशिरोमणिः]

पञ्चचत्वारिंशद्वर्षेभ्य ऊर्द्ध्वमिह नवद्वीप-नगरे शिरोरत्नोपाधिकः कृष्णकान्तनामा कश्चिदध्यापकः प्रादुरासीत्। स च वन्द्योपाध्याय-वंश-शिरोरत्नमिव नवद्वीपनिवासिनां विदुषां परमादरपात्रं समजायत। कवित्वेन पाण्डित्येन बहुदर्शितया च तस्य ख्यातिः सर्वत्र सुविदिताऽभूत्। सोऽयं नैयायिकप्रधानस्य गोलोकनाथ-न्यायरत्न-महोदयस्य परमप्रेयानन्तेवासी बभूव। गुरोर्गृहीतविद्यः शिरोरत्न-महाशयः स्वयं चतुष्पाठीं निर्म्माय बहून् छात्रानध्यापयाञ्चकार। तस्य खलु पाठना-रीतिरेवं हितसाधनी शिष्याणामभवत्, यदेकत्र सुधियः शिष्याः सुबहूनि शास्त्राणि समधीत्य कृतविद्या अजायन्त। तस्य चायमुपदेशश्छात्रसमाजे तदानीं वरीवर्त्ति स्म, यथा—

अनुशासनमुल्लङ्घ्य न कश्चित् पण्डितो भवेत्।
भूषणं देववाण्या हि कोषव्याकरणे मतम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य किल तच्छात्रेषु कवित्वप्रतिभाऽन्तर्जागर्त्ति, तस्यापि तदुद्बोधनमस्मादेव स्वोपाध्यायात् सुतरामुन्मिषति। यतोऽयमध्यापकः कवित्वप्रतिभया नितरां प्रदीप्तस्तस्थौ। सत्सु बहुषु, विद्वज्जनेन कविताघटनादौ मुख्यत्वमस्यैव तदानीं जागराम्बभूव नवद्वीप-नगरे।

एकदा तु नवद्वीपवासिनां विदुषां कवित्वशक्तिं जिज्ञासवः केचन भद्रमुखा 'रमाबाई' नामधेयां द्वितीयां सरस्वतीमिव काञ्चन दाक्षिणात्य-विदुषीं कृष्णनगर-राजधानीमानिन्युः। जाता च सुमहती सभा 'विष्णुमहल'नामक-राजसभामण्डपे। तत्र नवद्वीपात् तदितरस्थानेभ्यश्च बहवो विद्वांसः समाजग्मुः। तान् प्रति नृपतिघोषणेव काचिद् घोषणा निरगात्। येयं विदुषी कृपया राजसभामागता, इयं नाम्ना रमापि विद्यया सरस्वतीव शोभते, काचित् समस्यास्यै दीयताम् भवद्भिरनयासौ झटिति पूरयितव्येति। श्रुत्वैवं नवद्वीपस्थ-पण्डितसमाजादुत्थितेयं समस्या,—

"भृङ्गैः सत्प्रतिपच्चतां प्रविदधन्मा धाव रे पद्मिनीम्।"

रमया च पञ्चषान् क्षणान् ध्यायन्त्या पूरितेयम्, यथा—

मत्तेभात्र सरः परीत्य सततं दूरीकृतान्याहितं
सम्भ्रान्तः किल वासितामभिसमं गच्छन् निरोच्छां त्वयि।
अत्रानन्यसुजीवनैर्मधुमदामोदान्धधीभिः परं
"भृङ्गैः सत्प्रतिपच्चतां प्रविदधन्मा धाव रे पद्मिनीम्"॥

पत्रारूढ़मिदं पूरणं रमासहचरेण श्रीनिवास-शास्त्रिणा नाम केनचित् यूना पण्डितेन सभायामुत्थाय श्रावितं सभासद्भ्यः।

पूरणमिदं निर्म्मलं मलिनं वेति केनचित् सभासदा कथिते कृष्णकान्तशिरोरत्न एष उक्तवान्,—"सुष्ठु पूरितं श्रीमत्या, अस्याश्च समस्यापूरणशक्तिर्नितरां गरीयसी, दोषाश्चात्र केचित् सन्ति, यदि भवतां शुश्रूषा बलवती भवेत, तर्हि तदुल्लेखो मया कर्त्तुं शक्यत" इति। बलवन्तः खलु दोषा ग्रहणीया इति केनचिदुक्ते प्रत्युक्तं शिरोरत्न-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाशयेन,—अत्र मत्तेभस्य भृङ्गैः सह सत्प्रतिपक्षता कदापि न सम्भवति, यतः सत्प्रतिपक्षताया लक्षणं न्यायमते यदुक्तं—"साध्याभावव्याप्यवत् पक्षः सत्प्रतिपक्षः।" "ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यवद् ह्रदादिः" इति सत्प्रतिपक्षग्रन्थः। अन्यच्च गङ्गेशोपाध्याय-कृत-चिन्तामणिग्रन्थेन सत्प्रतिपक्षशब्दस्य यादृगर्थः प्रकटितस्तन्मतमप्युल्लिख्य तेन शिरोरत्नमहाशयेन यदुक्तं तच्चास्माभिरेवं बुद्धम्, विरोध्युपस्थापनसमर्थसमानबलत्वं * सत्प्रतिपक्षत्वमिति। तथा सति रमा-पूरितायां समस्यायां सत्प्रतिपक्षतैव भृङ्गाणां मत्तगजेन न घटितुमर्हति। अन्ये दोषास्तावदालङ्कारिकैर्द्रष्टव्या इति। अथ चैकेनोक्तम्, "भवतामेकेन समस्येयं पूर्य्यतां तावत्" ततः कृष्णकान्तशिरोरत्नेनैव पूरितेयं समस्या पुनः। यथा—

उद्गच्छन्नव-भानु-भानु-निकरासङ्गोन्नताङ्गप्रभां
निष्यन्दन्मकरन्द-नन्दितमनोलोलालिवृन्दस्थलीम्।
मुग्धोन्मत्तपिपीलिको विधिवशात् पृष्ठे विपक्षोन्नमाद्
"भृङ्गैः सत्प्रतिपक्षतां प्रविदधन्मा धाव रे पद्मिनीम्"॥

तत्र पिपीलिकाशब्दो नित्यस्त्रीलिङ्गत्वं वहन्नपि शिरोरत्नकविना पुंलिङ्गत्वेन निरूपितः। सत्यामप्यमरकोषे शब्दस्यास्य नित्यस्त्रीलिङ्गतायां तट्टीकाकृता केनचित् पिपीलिकाशब्दस्य पाक्षिकस्त्रीलिङ्गतैव विहिता, दत्तञ्च तेन महाभारतीयमुदाहरणं, यथा—

"योजनानां सहस्राणि गच्छन् याति पिपीलिकः।
अगच्छन् वैनतेयोऽपि पादमेकं न गच्छति।" इति।

तथा सति पिपीलिक इति पुंलिङ्गः शब्दोऽपि लभ्यते। अतोऽत्र कृष्णकान्तेन कविना पिपीलिक इति शब्दो गृहीतः। 'उ' इति

---

* साध्यविरोध्युपस्थापनसमर्थ-समानबलोपस्थित्या प्रतिरुद्धकार्य्यक-लिङ्गत्वं सत्प्रतिपक्षत्वमिति चिन्तामणिः। न तु तावन्मात्रकेणोपपत्तिः। सं-सा प-सः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बोधनसूचकमव्ययम्। पिपीलिक+उ='पिपीलिको' इति श्लोके निबद्धः। मुग्धेति उन्मत्तेति च सार्थकं सम्बोधनं मन्यताम्। अस्मिन् श्लोके कृष्णकान्त-पूरिते सत्प्रतिपक्षतायाः हानिरपि नास्ति। भृङ्ग-श्चोत्तमबलः पिपीलिकश्चातिदुर्बलस्तस्मात्। अधिकबलं प्रति दुर्बलस्य क्रुध्यतो धावनं मध्यस्थेन सज्जनेन निषिध्यत एव। अतः सर्वथा सङ्गच्छते तदर्थः। अन्यच्च, दोषः कोऽप्यलङ्कारशास्त्रोक्तो न चात्र लक्ष्यते।

एकदा तु नवद्वीपस्थ-हरिभक्तिप्रदायिन्यां सभायां कश्चिद्दाक्षिणात्यः परमहंसोऽशेषशास्त्रवित् समागतः श्रोतुं वङ्गीयपण्डितानां वाग्मिताम्। तस्यागमनं दृष्ट्वा वक्तॄणामभिभाषणं भवितुमारब्धं संस्कृतभाषया। परन्तु न तत् समीचीनमभूत्। तदवगम्य क्षोभमाप्तः सभापतिर्व्रज-नाथविद्यारत्नमहोदयः। ततस्तेन कृष्णकान्तशिरोरत्नो न्ययोजि वक्तव्यं वक्तुम्। अनेन तु उत्थायैव कश्चित् श्लोकः स्वकृतः पठितः। व्याख्या-तश्च स देवभाषया। श्लोकश्चायम्,—

वाणीं सद्वञ्जनार्थं प्रतिगृहमनिशं नर्त्तयामो वयं यां
सा भूत्वा दग्धदेहा जठरज-दहनैरस्मदीयैर्विपन्ना।
हंसं दृष्ट्वा भवन्तं परममिह पुनर्लज्जया व्याकुलात्मा
नो वक्त्रात् स्वं समर्था प्रकटयितुमितो वस्त्रहीना यतः स्त्री॥

श्लोकमिमं तद्व्याख्यानञ्च श्रुत्वा तेन परिव्राजकाचार्य्येण महाधीरेण वक्तुमारब्धमावेगभरेण, 'अहो कवित्वमहो कवित्वं श्रीमतः शिरोरत्न-पादस्य! अस्य किल नैयायिक-कवेः पाण्डित्येन नितरामानन्दिता वय"मिति।

धारा-नगर्य्यां भोजराजसभायां द्वितीयः कालिदास इव सर्वथायं नवद्वीपस्थ-पण्डितसमाजे समादृत आसीत्।

अथैकदा नवद्वीपस्थ-हरिभक्तिप्रदायिन्यां सभायां श्रीचैतन्यदेवस्य भगवत्त्वं स्वीकृत्य स्मार्त्तप्रधानतया परमविख्यातः पण्डितो व्रजनाथ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यारत्नमहोदयः स्वमतं यदा प्रचारयामास, अन्ये च बहवः पण्डितास्तत्र स्वीचक्रुः, तेन च महान् विरोधकलकलः पण्डितसङ्घं विचालयाम्बभूव, तस्मिन् समये पण्डितपूर्णसभायामनेनैव शिरोरत्नकविना काचिद् गौराङ्गविषयिणी मधुरमधुरा वाग्रचना कृता। तया च विरोधभञ्जनं समजनि, जयशब्दश्च कृष्णकान्तमाश्रितः। बाहुल्यभयात् तदुद्धरणे शक्तमतिर्न भवामि।

यथाऽस्य शिरोरत्नकवेः पाण्डित्यं विश्वतोमुखं, तथास्तिक्यबुद्धिरपि चित्ताकर्षिणी सर्वेषाम्। नवद्वीप-नगरे पश्चिमपल्लयामेकं शिवमन्दिरं वर्त्तते। तच्च "बुड़ाशिवतले"ति ख्यातम्। तस्मिन्नेकं शिवलिङ्गं जागर्त्तितराम्। इदञ्च लिङ्गशरीरे नेत्रयुगलाभ्यां श्मश्रुणा प्रहसदोष्ठपुटेन च भक्तानां मानसं रञ्जयति। नवद्वीपवासिभिश्च जाग्रद्देवततया परया भक्त्या पूज्यते भोज्यते प्रणम्यते चेदम्।

असौ शिवः शिरोरत्नकविनानेन प्रत्यहं नियमपूर्वकं समर्च्यते स्म, महिम्नस्तोत्रपाठेन स्तूयते स्म, प्रणम्यते स्म च। अयमसौ महादेवो नवद्वीपवासिभिर्भक्तिदत्तैर्धनैर्धनवानप्यस्ति। यत्र धनं, तत्र तदध्यक्षेणापि प्रयोजनं वर्त्तते। तदयं शिरोरत्नकविः सर्वसम्मतिक्रमेणास्य देवस्य धनाध्यक्षः संवृत्तः; अस्यैव कवेः परमप्रयत्नेन देवस्यैतस्य यात्राः सर्वाः सुष्ठु सम्पादिता भवन्ति स्म। विशेषतः प्रतिवर्षं चैत्रस्य शेषभागे 'गाजन' इत्याख्यया ख्यातो महानुत्सवो यथावदनेनैव निर्वाहितोऽभवच्च। अपरञ्चास्यैव देवस्य विवाहो नाम कश्चिदुत्सवो नवद्वीप-निवासिनां भद्रसुखाणामितरेषाञ्च परमसम्मतो भवतितराम्। एतस्मिन् कर्म्मणि खलु कृष्णकान्तशिरोरत्नकविः पिता यथा पुत्रोद्वाहे यतते, तथा यतमान एवातिष्ठत्। अस्यैव निदेशेन शिल्पिभिः कुम्भकारैः देव-दानव-मानव-विशेषाणां मूर्त्तिशतं निर्म्माय सज्जितमकारि। तेन च दर्शकशतानां प्रीतिशतञ्च परिस्फुरति स्म।

एकदा तु कुमारसम्भवमहाकाव्यस्य पाठनाकाले महाकविना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासेन तृतीयसर्गे हिमालयस्य कस्मिंश्चित् सानौ नीलकण्ठस्य योगपीठो यथा व्यरचि, तच्चिन्तयन्नेव शिरोरत्नकविम्छात्राणां समीपे व्यक्तमुवाच, अस्मिन् वर्षे शिवोत्सवस्य सम्पादनसमये मयापि महाकविकालिदासकृतेः कुमारसम्भवमहाकाव्यस्य तृतीयसर्गरचना मूर्त्तिमती कारिष्यते इति।

तद्यथा कथितं प्रयत्नवशात् तथैव घटितम्। योगासने समुपविष्टः शिवस्तथावद् भाति। गिरिराजेन तस्यातिथ्यं साधयितुं प्रेषिता स्वकन्या विवाहयोग्या पार्वती। या खलु "सती सती योगविसृष्ट-देहा तां जन्मने शैलवधूं प्रपेदे"। तथा पञ्चवाणः कामः शिवसमाधिभङ्गाय शरं सन्धातुमुद्यतो रत्या स्वप्रियया सख्या च वसन्तेन सह तत्रोपस्थितः। अकाल-वसन्तोदयश्च तस्मिन् शृङ्गे जातस्तदानीम्। कुसुमितं तद् गिरिशृङ्गवनम्। कोकिलालापः सर्वत्र। भ्रमरगुञ्जनं प्रतिपुष्पं श्रूयते च। किशलयसज्जा च प्रतिवृक्षेण प्रतिलतया चाङ्गीकृता। काले चैतादृशे परमयोगीश्वरस्य महादेवस्यापि धैर्य्यच्युतिर्जाता। अथ धैर्य्याच्चयुतः शिवः "उमामुखे विम्बफलाधरोष्ठे" दृष्टिं निवेशयन्नपि कथमेवं चित्तवैकल्यं जातमित्यनुसन्दधत् तथाविधं कन्दर्पं दृष्टवान्। तदानीं जातक्रोधस्य त्रिनेत्रस्य तृतीयादक्ष्णो महाप्रतापो वह्निरुदगात्। तद् दृष्ट्वा व्योमचराणां —

"क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥" इति।

यथैव वर्णना महाकविस्तथैव घटिता मूर्त्तयो रामपालेन स्वहस्ते। एतेन खलु कारुकार्य्येण सर्वत्र प्रशंसां लभमानोऽपि स शिल्पी विसूचिका-रोगेण सद्य एव गतप्राणो मन्ये शिवलोकं गतः। यस्य च निर्देशमाश्रित्य निर्माणमिदं सङ्घटितं सोऽपि शिरोरत्नकविस्तेनैव रोगेण गङ्गातीरमासाद्य शिवत्वमाप। छात्राणां तथा नवद्वीपवासिनां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सतामश्रुपातो महानपि न तस्य प्रज्वलितं चितानलं निर्वापयितुं क्षमोऽभवत्।

कविरयं चतुरः पुत्रान् लभमानोऽपि मृत्युकाले एकमेव पौत्रं वंशप्ररोहं रक्षन् चिराय नेत्रे निमिमील।

अस्य कृतयस्तावत् तिस्रः,—एकं 'संशय-तमोहरो' नाम पुस्तकं मुद्रितम्, द्वितीयः 'सत्काव्यकल्पद्रुमो' नाम मुद्रितो ग्रन्थः, तृतीयो 'विधवाविवाहप्रतिवादो' नाम वङ्गभाषया रचितो ग्रन्थविशेषः, स चाप्यमुद्रित एव विलुप्तः। सत्काव्यकल्पद्रुमग्रन्थो मत्समीपे वर्त्तते हस्तलिखितः। यस्यायमाद्यः श्लोकः,—

ध्यात्वा शङ्करपादपद्मयुगलं प्राचीनपद्यावलीं
संगृह्य स्वकृतं तथा सुकवितावृन्दं सदानन्ददम्।
साहित्यार्णव-रत्नराजि-सदृशं श्रीकृष्णकान्तः कवि-
र्धीराभीष्टफलप्रदं प्रतनुते सत्काव्यकल्पद्रुमम् ॥ इति शम्।

वेदान्ते सांख्याधिक्षेपपरतानिरासः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीशरच्चन्द्रखाँ एम् ए बि एल्]

"कामाच्च नानुमानापेक्षे"ति सूत्रस्य सांख्यप्रकृतिवाद-खण्डनपक्षे यद् व्याख्यानं, तद् भ्रमात्मकमिति प्रदर्शयितुम् तत्सूत्रस्योपक्रमोपसंहार-प्रदर्शनाय आनन्दमयाधिकरणं संक्षेपतो व्याख्यायते। सर्वश्रुतिसमन्वयादवगम्यते सृष्टिस्थितिलयहेतुः ब्रह्म एव, न अन्नप्राणादीति "तत्तु समन्वयादि"ति सूत्रेणोपन्यस्य तस्य हेतुप्रदर्शनार्थं प्रथमसुत्रमोक्षत्यधिकरणम्। हेत्वन्तरप्रदर्शनाय प्रारभ्यत आनन्दमयाधिकरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१।१।१२। आनन्दमयोऽभ्यासात् ।

"तस्माद् वा एतस्माद् विज्ञानमयादन्योऽन्तर आत्माऽनन्दमयः" (तै० २।५) इत्यादिषु पुनः पुनः श्रूयते आत्मा आनन्दमय इति। अतो जन्माद्यस्य यतस्तद् ब्रह्म, न अन्नप्राणाद्यचेतनमानन्दशून्यम्।

१।१।१३। विकारशब्दान्नेति चेन्न प्राचुर्यात्।

विकारार्थे मयट्प्रत्ययदर्शनाद् भवति विकारि आनन्दमयं ब्रह्म इति शङ्कामपाकरोति। "न" चात्र विकारार्थे मयट्प्रत्ययः। "तत्प्रकृतवचने मयट्" (पा० ५।४।२१) इति प्राचुर्यार्थेऽपि दृश्यते मयट्प्रत्ययः। यथा अन्नप्रचुरो यज्ञ इत्यर्थे दृश्यते "अन्नमयो यज्ञ" इति।

१।१।१४। तद्धेतुव्यपदेशाच्च।

"एष ह्येवानन्दयति" इत्यादौ श्रूयते आनन्दहेतुत्वं ब्रह्मणः। यो हि अन्यानानन्दयति स प्रचुरानन्द इति निःसन्देहमवगम्यते।

१।१।१५। मान्त्रवर्णिकमेव च गीयते।

"अन्योऽन्तर आत्माऽनन्दमयः" (तै० २।५) इति पर एवात्माऽनन्दमयः सृष्टिस्थितिलयकर्त्ता।

आनन्दमयस्यात्मनः सृष्टिस्थितिलयकारित्वस्थापनात् "सर्वेऽस्मै देवा बलिमावहन्ती"त्यादिषु (तै० १।५।३) विज्ञानात्मनः परमैश्वर्यश्रुतेः भवितुमर्हति आनन्दमयो विज्ञानात्मा जीवः सृष्टिस्थितिलयकर्त्तेति पक्षं निराकरोति—

१।१।१६। नेतरोऽनुपपत्तेः।

इतरो जीवो न भवितुमर्हति सृष्टिस्थितिलयकर्त्ता। कुतः अनुपपत्तेः। सृष्टिस्थितिलयकर्त्तृसम्बन्धिनीनां श्रुतीनां दृश्यते जीवविषये असङ्गतिः। हेत्वन्तरमाह—

१।१।१७। भेद-व्यपदेशाच्च।

"रसो वै सः। रसं ह्येवायं लब्ध्वाऽनन्दी भवति" (तै० २।७) इति श्रुतेरवगम्यते परब्रह्मानन्दस्यांशभाक जीव इति। अतः परा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परयोर्भेदः ; जीवेऽनुपपन्नञ्च सृष्ट्यादिकर्तृत्वम् । "तस्माद् वा एतस्माद् विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः" (तै० २।५) इत्यादौ विज्ञानमयात् जीवात् परमात्मनो भेदः स्पष्टमेवोक्तः ।

१।१।१८। कामाच्च नानुमानापेक्षा ।

"सोऽकामयत बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च" (तै० २।६) इति श्रूयते पूर्वोक्ततैत्तिरीयानन्दमयप्रकरणे । स परमात्मा सृष्टिकामः तत्कामादेव उपादानादि-साधनान्तरं विना "इदं सर्वमसृजत यदिदं किञ्च"। विज्ञानमये जीवे नैतत् सम्भवति । अतो न ऐश्वर्य्यवतो जीवात् सृष्टिरित्यनुमानापेक्षा । वक्ष्यति च "जगद्व्यापारवर्ज"मित्यादि (४।४।१७) सूत्रान्तर्गत"च"-शब्दो हेतुसमुच्चये प्रयुक्तः । "एवा"र्थे प्रयुक्त इति निम्बार्काचार्य्यपादाः । अथवा "सोऽकामयत बहु स्यां प्रजायेये"ति जगत्स्रष्टुः कामना दृश्यते । सच्चिदानन्दरूपस्य ब्रह्मणो न सम्भवति कामना ; अपूर्णस्यैव कामनासम्भवात् । यस्मात् जगत्स्रष्टा कामनायुक्तस्तस्माद् विज्ञानमयो जीव एव जगत्स्रष्टा इत्यनुमानापेक्षा नास्ति । कुत इत्यत आह—

१।१।१९। अस्मिन्नस्य च तद्योगं शास्ति ।

"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवती"त्यादिषु श्रूयते परमात्मनि जीवात्मनः प्रतिष्ठादि । अस्मिन् परब्रह्मणि अस्य जीवस्य च तदात्मना योगस्तद्योग इति श्रीशङ्कराचार्य्यपादाः । तस्य आनन्दस्य योगस्तद्योग इति श्रीनिम्बार्काचार्य्यपादाः । तं शास्ति वदति श्रुतिरिति शेषः । "कामाच्च नानुमानापेक्षे"ति अष्टादशश्लोकस्य पूर्ववर्त्तिषु सूत्रेषु तथा परवर्त्तिनि सूत्रेऽपि जीवस्य सृष्ट्यादिकर्त्तृत्वं निराकृतम् । अष्टादशश्लोकस्थात् "च"-शब्दात् सूचितं सप्तदशाष्टादशसूत्रयोरेकविषयत्वम् । तथोनविंशश्लोकस्थात् "च"-शब्दात् सूचितम् अष्टादशोनविंशसूत्रयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रैकविषयत्वम् । अतोऽष्टादशसूत्रमपि जीवविषयमिति यथाऽस्माभि-र्व्याख्यातं तथा भवितुमर्हति साधुसम्मतम् । सांख्यप्रकृतिवाद-खण्डन-पक्षे व्याख्यातेऽष्टादशसूत्रे भवति प्रकरणभङ्गदोषोऽ"नुमान"-शब्दस्य काल्पनिकार्थदोषप्रसक्तिश्चेति ।

रजनी

(पूर्वतोऽनुवृत्ता)

[निबन्धिका—श्रीमती रेणुदेवी]

किमिति मया किमपि काम्यमन्विष्यापि न प्राप्यते ? संसारोऽयं परिपूर्णः सङ्ख्यातीतैः रत्ननिचयैः, नात्र किं किमपि मे प्रार्थनीयं वर्त्तते ? यत्रास्मिन् संसारे दुरवेक्षणीयानाम् अनन्तानां क्षुद्राणां कीटपतङ्गानाम् एकैकोऽपि अनन्तनैपुण्यपदम् अनन्तज्ञानस्य आधारः, यत्रास्मिन् जगति पथि-प्रान्त-निपतिता क्षुद्रैका सिकताकणापि अनन्त-रत्नप्रभवस्य नगाधिराजस्य क्षुद्रांशः, किं तस्मिन् जगति न मे किमपि वर्त्तते काम्यं वस्तु ? अथवा को नामाहम् ? ज्ञाताखिलतत्त्वानां करकमल-कलिताऽमलक-फलवदखिलं जगदिदम् अवलोकयतां तेषां तेषां महामहोपाध्यायानां सम्भूय यावज्जीवं तत्त्वं पर्य्यालोचयतामपि एतस्य क्षुद्रस्य नीहारकणस्य शर्कराकणिकायाः क्षुद्रीकुसुमस्य वा गुणवर्णनं सामर्थ्यमतिक्रामति ; किं तथापि न मे किञ्चिदस्ति काम्यं वस्तु ? को नामाहम् ?

अवलोकय तावत् । वसुन्धरायामस्यां वर्त्तन्ते मनुष्याणां कोटयः । न हि ते सम्यक् केनापि परिगणय्य निर्णीताः । तथापि बहुकोटय इत्यत्र नास्ति संशयलेशः । तेषु च प्रत्येकं वर्त्तन्ते संख्यान-मतीताः गुणाः, सर्व एव ते भक्तिप्रकर्षस्य, प्रीतिपरम्परायाः, दयायाः धर्म्मादीनाञ्चाधाराः । सर्व्व एव ते पूज्याः आदर्शभूताश्च, तथापि न किं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्त्तते मे किमपि काम्यं वस्तु। कीदृशोऽस्मि ? ममाप्यासीदेकं वाञ्छिततमं वस्तु, अद्यापि तथैव वर्त्तते च। किन्तु न स मे मनोरथः कदापि परिपूर्णतामेष्यतीति हृदयात् चिराय समुन्मूलितः। न तं पुनरुज्जीवयितुमिच्छामि। किं नास्ति ततोऽन्यत् किमपि वाञ्छितं वस्तु? अतोऽहमन्विष्यामि किं करिष्यामीति। अतीतेष्वेषु हायनेषु स्वयमहं प्रश्नमिमं समाधातुं कृतप्रयत्नोऽस्मि, न चालमस्मि समाधातुम्।

ये च मे द्वित्रा बान्धवा वर्त्तन्ते, ते मया जिज्ञास्यमानाः प्रत्यूचुः, यदि ते न वर्त्तते स्वार्थं कर्म्म, परार्थं यतस्व, यथाशक्ति विधेहि लोकानाम् उपकारम्। कथितं चिरन्तनी, किन्तु कथं लोकानाम् उपकारः सिध्यतीति नास्ति निर्णयः। राम-मातुरपत्यं ज्वरेणाक्रान्तं, कुरुष्व तस्य रोगपरीक्षां, विधेहि भैषज्यप्रयोगव्यापारम्; उन्न तस्य रघोर्नास्ति गात्रवस्त्रं, देहि कम्बलम्; शान्ताया जननी विधवा जाता, वितर मासिकीं वृत्तिम्; सुन्दर-नापितस्य तनयः शक्नोत्वध्येतुं पाठशालायां, कुरु तस्य वेतनानुकूल्यम्। किमयमेव परोपकारः। अस्तु वा तावदयमेव तथैव, किन्तु नानेन शक्यते समयातिपातः कर्त्तुम्। कियान् समयस्तावदनेनातिपतति ? कीदृशो वा परिश्रमो भवति ? कतीनां वा मानसिक-शक्तीनां क्रियतो वा सम्भाव्यते समुत्तेजना ? नाहम् एवं ब्रवीमि यदिमान्यपि यथाशक्ति कर्म्माण्यस्माभिरनुष्ठीयन्ते। किन्तु यावन्मात्रमेतादृशं कार्य्यमनुष्ठीयते तावता तु एतावन्निर्णीतमेव, यथा नैवं भविष्यति मे कृतकृत्यता। यदेव मे योग्यं कर्म्म, यत्र च निरतिशयमनुरज्यते मे चित्तं, तदेव अहम् अन्विष्यामि।

अन्यादृशश्चायमुपकारप्रकार आविर्भूतो दृश्यते। यथा मित्रमिलनं, सङ्घस्थापनं, प्रतिनिधिनिर्वाहः, सभानियमः, समाजपद्धतिः, वाग्मितावसरः, नियमनिर्द्धारणम्, आवेदनं, निवेदनं, समवेदनञ्च, नाहम् एतेषु सोत्साहः। एकदा कमपि बन्धुम् एतत् सर्वमेव पर्य्यालोचयन्तम् अवलोकयतो मे सहसा विजिज्ञासा जाता, किमिद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिति ? तेन च व्याहृतं, न किञ्चित्, केवलं भिक्षापद्धतिभेदः। नायं च मम क्षुद्रबुद्धिगोचरः।

अयमप्यपरो रोगस्यास्य विकारप्रकारः प्रकटितो वोच्यते। सम्पाद्यतां विधवानां विवाहः, प्रतिबध्यतां परिणयः कुलीनानां ब्राह्मणानां, दूरीक्रियतां जातिभेदः, स्त्रियश्च गाव इव गोशालासु बद्धाः, अपक्रियतां तासां बन्धनं, चरन्तु ताः सुखेनेति। मम तु गाव एव न सन्ति न वा परगोशालासु सम्बन्धविशेषः कश्चित्। न वा जातिभेदतिरोधाने सम्मतिमानस्मि। न च तथाविधः सुशिक्षितोऽस्मि। इदानीमपि अन्त्यजैः सह भोजनं परिणयसम्बन्धो वा न मे मनोरथविषयः। किञ्च शिरोमणिमहाशयकृतो यस्तिरस्कारो निःशब्दं मया सहनीयः न तं हड्डीकादिभिः क्रियमाणं सोढुमिच्छामि। सुतरां तिष्ठतु मे जातिः। यथेच्छं क्रियताम् अभिलाषवता विधवाविवाहः, तिष्ठन्तु च युवानः चिर-कौमार्य्यव्रतधारिणः, एकपत्नीव्रतयन्त्रणामनुभवन्तु कौलीन्यवन्तः। न तत्र मे कापि विप्रतिपत्तिः।

किन्तु एषां पोषकतायां क्रियमाणायामपि किमिदं लोकहितं भविष्यतीति न मे प्रतीतिविषयः। अतो न मे वङ्गसमाजे किञ्चित् कृत्यम्। नात्र वा कस्यचित् कश्चिदस्मि। न वा कुत्रापि कस्यापि कश्चिदस्मि। अहं केवलम् अहमेवेति। नान्यत् किञ्चित्। इदमेव मे दुःखम्। विस्मृतप्राया लवङ्गलताया हस्तलिपिः।

यदा त्वेवमेव मानसदशा-विशेष-विपर्य्यस्तश्चञ्चलचित्त आसम्, तदैव वाराणस्यां गोविन्ददत्तेन वर्णितो मे पुरतो रजनीप्रसङ्गः। चिन्तितञ्च मया, मन्ये महेश्वरेण समर्पितो मय्येको गुरुतरः कार्य्यभारः। संसारेऽस्मिन् लब्धं मया किञ्चित् कर्म्म। शक्यते च कर्तुमनन्यसाधारणो रजन्या अयमुपकारः। निष्कर्म्मणा च मया कथमिदमेव नानुष्ठीयते कर्म्म, किमेतन्नाम योग्यं कर्म्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र तु प्रसङ्गतः कीर्त्यते शचीन्द्रनाथस्य पूर्वपुरुषाणां परिचयः। आसीद् भवानीनगरग्रामवास्तव्यः केवलराममित्रो नाम कायस्थ-कुलोत्पन्नः कश्चित्। तदात्मजो वाञ्छारामो नाम, येन बुद्धिबलेन धनान्युपार्जयता परिवर्द्धयता च क्रमशः परिक्रीता निखिला तदन्व-वायजातैरधुनाप्युपभुज्यमाना महती भूमिसम्पत्। तेन च राम-सदयो नाम पुत्रो लब्धः। यदात्मजयोरवरजः शचीन्द्रनाथः।

आसीच्च मनोहरदासनामधेयः कश्चित् परममित्रं वाञ्छारामस्य। येन सहायभूतेन वाञ्छारामो विपुलमिदमैश्वर्य्यजातमाससाद। मनोहरदासेन च प्राणानप्यपरिगणय्य सम्पादितमासीत्तस्य कार्य्य-जातम्, स्वयन्तु कदापि न कृतो धनसञ्चयः। अनया च गुणपरम्परया तस्य वशीभूतो वाञ्छारामोऽपि तस्मिन् सहोदर इव स्नेहसन्ततिं बभार। प्राप च तस्मात् वयसा ज्येष्ठत्वेन ज्यायसीव भ्रातरि बहु-मानपरम्पराम्। नाभूच्च पितरि तस्य महती सम्प्रीतिः। मन्ये च तत्र नैकतरस्यैव दोष इति।

अथैकदा रामसदयेन सार्द्धं मनोहरदासस्य प्रावर्त्तत कश्चित् कर्कशः कलहः। ततो मनोहरदासो रामसदयकृतं सहनातीतम् अपमानमसहमानो वाञ्छाराममित्राय यथायथं सर्वं कथयित्वा तेन बहुधा पुनः पुनरनुनीयमानोऽपि तदनुरोधवचनमनाकर्ण्य परिवार-परिवृतो मित्रार्पितकार्य्यभारेण सहैव भवानीनगरं परित्यज्य निर्जगाम। स कुत्र गतः स्थितो वेति न केनापि विदितमासीत्।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोदूतम्

(पूर्वतोऽनुवृत्तम्)

श्रीचैतन्यदेवमातुल-कवीन्द्र-विष्णुदासविरचितम्

[श्रीचिन्ताहरणकाव्यतीर्थ-(एम्-ए) सम्पादितम्]

यत्र स्वयं वसति चन्द्रकिरीटमौलि-
रत्नांशुरञ्जितपदाम्बुरुहो मुरारिः ।
निर्णीयतेऽतिलघुकेन जगन्निवास-
वासस्य यस्य महिमा न हि मादृशेन ॥ २८ ॥

तेषाञ्च गोकुलनिवासकृतां जनानां
किं भागधेयमनुगेयमगेयमेव ।
यन्माधवं निगम-कानन-गूढमेते
पश्यन्ति चारु नटयन्ति परिष्वजन्ते ॥ २९ ॥

प्रातर्मुकुन्दकलवेणुनिनादभिन्नै-
र्गोकाशवारितदपत्यरवैर्जनानाम् (?)।
धेनुं वनं नयत रे व्रजतेति बाल-
कोलाहलैश्च बधिरा श्रुतिरिव यत्र ॥ ३० ॥

सायन्तनस्य च करीष-कपोतयोने-
र्धूमस्तरोरुपरि बद्धविचित्रमालः ।
यत्रान्तरोच्चचलितोऽचल-वाजि-कक्षां
यातो जनस्य हृदयं क्षणमावृणोति ॥ ३१ ॥

---

28. a चन्द्रकिरीट—D. दन्तिपतीश—I.
29. c -कानन—D. -कारण—I. d चारु—D. चार—I.
30. c -वन—D. कल—I. रे—D. वै—I. d -स्तु—D. -श्च—I.

३१। करीषोत्पन्नस्य कपोतयोनेरग्नेः। अचलस्य पर्वतस्य वाजिर्दीप्तिः कक्षां समताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोहारवः क्वचन कुत्र च वत्सरोधः
क्रीडानिमग्नसुतलालसमानसायाः ।
भाण्डस्य दाहविषये गृहिणा गृहिण्यः
कुत्रापि वृद्धकुलसंहसभं नियुक्ताः (?) ॥ ३२ ॥

श्रीमान् स्वधर्म्मकुशलः कुशलं जनानां
नित्यं दिशन्नधिपतिः पशुपालकानाम् ।
पत्रयात्मनः प्रतिमयेव यशोदयाऽऽस्ते
तत्रैव नन्द इति कश्चन वन्दनीयः ॥ ३३ ॥

तस्य व्रजे मकरकुण्डलिनं सवेणु-
वेत्रं दलत्कमलपत्रसवर्णनेत्रम् ।
बालं तमाल-तरु-कज्जलनीलिमान-
मानन्दमाकलय मानस माधवाख्यम् ॥ ३४ ॥

वक्त्रे दृशि श्रवसि गण्डतलेऽधरोष्ठे
कण्ठे भुजेऽङ्गुलिदले हृदि पृष्ठतोऽस्य ।
मध्ये तथोरुयुगले चरणे नखेन्दा-
वस्मात्ततस्तत इतोऽपि चिरं निषीद ॥ ३५ ॥

तस्मिन् वसन्ति समवेशवयोविलासाः
श्यामाः कति व्रजसुतास्तमवैमि कस्मात् ।
एतत् किमङ्ग निखिलं निपुणं निरूप्य
न स्पन्दसेऽपि यत एव मनः स एषः ॥ ३६ ॥

---

32. a दोहारवः—D. देहोवर.,—I. वोतृस—I. वत्स—D. b विषये—I विधये—D. गृहिणा—D. ग्रहिणो—I.

34. a सवेणु—D. सवेत्र—I. b वेतं—D. वेहं—I.

36. c किमङ्गलिखितं विपुलं—I. d -रत एव मनस एव—I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं वर्ण्यमस्य चरणं श्रवणं शरीरं
नेत्रं मनोऽपि चरिताज्जगदेकचित्रात् ।
पङ्के निमग्नमिव जीर्णमनेकपं के
यत्नान्मनागपि समुद्धृतिमानयन्तु ॥ ३७ ॥

श्यामाः पुनः स्मरणिकुण्डलिनः शिखण्डि-
खण्डप्रबालमणिकाञ्चनकण्ठभूषाः ।
बालास्तथापि नितरां प्रतिभान्ति भानो-
र्दीपाङ्कुरा इव पुरो भुवि नन्दसूनोः ॥ ३८ ॥

तत्ताद्दृगङ्गतमहामहिमामृताब्धे-
रावर्त्तमण्डलमनन्तमिमं प्रतीहि ।
चेतस्तथाहि नयनञ्च मनश्च दैवाद्
यातं परिभ्रमति भूरि न कस्य तस्मिन् ॥ ३९ ॥

त्वं देववृन्द-मुनि-मानस-राजहंसं
गोपाल-बालक-विलासकृताभिलाषम् ।
गो-गोप-गोपसुत-गोपवधू-समेतं
चेतोऽवधेहि गतसंशयमेकमेव ॥ ४० ॥

कोऽप्येष नृत्यति दृशो नटयन् जनाना-
मुन्नायतीन्द्रियगणं जडयन् कुतोऽपि ।
आलोकनैकपरमान् विहगान् मृगांश्च
कुर्वन् गवां क्वचन चारयते कुलानि ॥ ४१ ॥

---

37. -अ वपसा—*D*. -ष चरणं—*I*.

39. a -मद्दिमा—*I*. -महिता—*D*.

40. a वृन्द—*D*. तेन्द्र—*I*. d गतमंशयमे—*D*. वतसंशत—*I*.

41. c -नैवपरतान्—*D*. -नैकपरमान्—*I*., d चारयते—*D*. वारयते—*I*,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गावश्च वत्सनिवहैस्तमुदीक्ष्य दूरा-
दुत्पूरकर्णपुटकं तरसाभिपत्य ।
आलोकयन्त्यनवलोकितवत् सदापि
जिघ्रन्त्यपूर्ववदलीढवदालिहन्ति ॥ ४२ ॥

अङ्के क्वचित् कुल-कुरङ्गविलोचनायाः
पङ्केऽक्वचिदपि पशुपाङ्गन-वेदिकायाः ।
सङ्केतवञ्जुलवने विजने कदाचि-
दङ्केतरत्र हृदि पुण्यवतः कुतोऽपि ॥ ४३ ॥

दूरेऽपि वाङ्मनसयोर्मुनिपुङ्गवानां
भू-रेणुचुम्बिततनुः पशुपाङ्गनेऽपि ।
यो मृग्यते श्रुतिवधूभिरपीक्षणेन
गोपाङ्गनाभिरभितः परिपीयते सः ॥ ४४ ॥

एवं व्रजे व्रजसुतैः सह यत्र यत्र
क्रीडत्यनेकजलसन्तरणैकहेतुः ।
चेतः प्रसादकलिकावधि तत्र तत्र
प्रेमोत्तरेण भवतापि विलोकनीयः ॥ ४५ ॥

तस्याग्रतः स्फुटसरोरुहमाकरन्द-
गन्धान्विताऽलि-निकुरम्ब-करम्बितेन ।
चित्राम्बुरम्बुरुहिणीगहनेन चेतः
श्यामास्ति कापि यमुनेति तरङ्गिणीयम् ॥ ४६ ॥

42. b -इतपुच्छ—D.

43. c—I. पुस्तके एषा पङ्क्तिरन्तराऽन्तरा त्रुटिताऽत्यन्तमशुद्धा च ।

45. b -त्यनन्तजन—D. त्यनेकजल—I. c -विधि—I. -वधि—D.

46. b चुम्बितेन—D. पत्रकोणे 'र' इत्यत्र 'चु' इति निर्दिष्टमास्ते ।

४६ तस्य व्रजस्य चित्राम्बुः रम्यसलिला । अम्बुरुहिणीगहनेन उपलक्षितेति यावत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यासां तरन्ति पुरुषाः पयसापि सद्यः
क्ष्मामण्डलैकमहिताः कति ता न नद्यः ।
अन्या पुनर्मिहिरजा यदिहोरुकीर्त्तेः
स्नानावगाहनविनोदनपानचर्य्याः ॥ ॥७ ॥

अम्भोधरद्युति विनिद्रविषप्रसून-
विश्लिष्टधूलिचयचम्पकमम्बु यस्याः ।
वक्षःस्थलं तरुणकुङ्कुमपङ्कगौरं
लक्ष्मीप्रियस्य हृदयानुचरीकरोति ॥ ४८ ॥

कृष्णं तमालतरुकज्जलभासि यस्याः
स्मेराम्बुजे पयसि संहृतमम्बुजाक्षम् ।
गोप्यश्चिरेण परितः परिलोभयन्त्यः
स्पर्शानुजातपुलकैरयमित्यवेयुः ॥ ४९ ॥

यस्यास्तटो त्रिजगतीजनमण्डनेन
श्रीपुण्डरीकनयनस्य पदद्वयेन ।
वज्र-ध्वजा-ङ्कुश-कुशेशयराजितेन
प्रायः पवित्रसिकतापरिचित्रितेव ॥ ५० ॥

---

48. b -चम्पक—I. -चुम्बित—D. d. करोति—D, I.
49. b सङ्गत—D. संहृत—I.

४७। अन्या अनन्यसाधारणी इत्यर्थः ।
४८। हे हृदय अनुचरीकरीति अनुकरीति ।
४९। परिलोभयन्त्यः अन्विष्यन्त्य इत्यर्थः । अवेयुः प्रतीयुः प्रत्यभिज्ञातवत्य इति यावत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्याः क्षणं क्वचन रोधसि धावमानं
श्यामाम्बुदाभमरुणेक्षणपाणिपादम् ।
स्मेरारविन्दकुलसङ्गतमङ्ग तस्या-
स्तुङ्गं तरङ्गमिव माधवमावधेहि ॥ ५१ ॥

तस्याः समीप-नव-नीप-वनालिकुञ्जे
स्मेर-प्रसूनचय-चञ्चल-चञ्चरीके ।
सन्धास्यसि प्रथमपल्लवकम्पिते न
तल्पे न चारुणि मनः सरसीरुहाक्षम् ॥ ५२ ॥

कह्लार-कोकनद-कैरव-पुण्डरीक-
मिन्दीवरञ्च मधुगन्धहृतालिवृन्दम् ।
कादम्बहंसवकसारसचक्रवाक-
दात्यूह-मद्-जलकुक्कुडमस्ति यत्र ॥ ५३ ॥

स्वच्छाम्भसां विकचवारिरुहाञ्च येषां
कच्छस्थलीञ्च घनकोमलशाद्वलाढ्याम् ।
निद्रान्ति मन्दमृदुचन्दनगन्धवाह-
स्पृष्टाः स्वपृष्ठविनिवेशितकण्ठमेणाः ॥ ५४ ॥

---

51. c -सङ्कुल—D. -सङ्गत—I. d तुङ्गम्' इति D. पुस्तके त्रुटितम् ।
53. b -हृता इति D. पुस्तक पत्रकोणे निर्दिष्टं पाठान्तरम् । I पुस्तके अनन्तरं पङ्क्तिद्वयं मसीलोपात् सुतरामविस्पष्टतामुपगतम् ।
54. c निद्राति—I, D. पुस्तकपत्रकोणे । विश्रन्ति—D.

---

५२ । सरसीरुहाक्षं क्षणं न सन्धास्यसि इति न इत्यन्वयः ।
५४ । कच्छस्थलीं गत्वा इति शेषः । एणाः मृगाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैस्तैरपङ्किलतटैस्तटचारुभूमि-
भूमीरुहप्रहततापमतापरम्यैः ।
तीर्थैरिव द्विजगणैः परितः परीतै-
रेवं सरोभिरभिशोभितसंविभागम् ॥ ५५ ॥

हिन्ताल-ताल-वट-शाल-रसाल-जाल-
ताली-तमाल-कृतमाल-पियाल-कोलैः ।
जम्बीर-वीरतरु-विल्वकदम्ब-जम्बू-
खर्जूर-निम्ब-हरिचन्दन-सिन्धुवारैः ॥ ५६ ॥

शेफालिका-स्थलसरोरुह-कर्णिकार-
वासन्तिका वकुल-चम्पक-वाण-कुन्दैः ।
कङ्केलि-किंशुक-मधूक-जवा-प्रियङ्गु-
मल्ली-लवङ्गलतिका-वनमालिकाभिः ॥ ५७ ॥

एतैर्दलानि कुसुमानि फलानि सम्यक्
श्रीजानिपाणिकमलग्रहमानितानि ।
रम्याणि सर्वसमयेऽपि शमन्दधानै-
र्नीरन्ध्रमावृतमनावृतपुण्यपुञ्जैः ॥ ५८ ॥

---

55. a -रुपल—I. -रपङ्किल—D. भूमिः—I. भूमि—D. b. भूमि—I. भूमी—D. -रम्ये—I. i -रम्यैः—D.

56. d -रैः—D. -रि—I

57. c किन्नि—I. कङ्केलि—D.

५८। शमन्दधानैः शान्तैरित्यर्थः । अनावृतपुण्यपुञ्जैरक्षुण्णपुण्यसमूहैर्मुनिभिरित्यर्थः आवृतमध्युषितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यागाङ्गनस्थलमिवोज्ज्वलकृष्णवर्त्म
शाखाश्रितैर्द्विजगणैर्महितं सुघोषैः ।
तस्यैव नातिशयदूरतरं व्रजस्य
वृन्दावनं रसमयं वनमस्ति चेतः ॥५८

तस्मिन् चणं शिखिशिखण्डकृतावतंसं
वंशं मनागधरसीमनि सन्दधानम् ।
गोरोचनापटुपटीरकृताङ्गरागं
तं सानुरागमनिशं हृदयावधेहि ॥ ६० ॥

तस्मिन्नयं मुरलिकां मुखरीकरोति
तत्राश्मनस्तत इतः सरिदाविरासीत् ।
अर्द्धावलीढगलितैः प्रथमैर्मृगाणां
क्षौणीतलञ्च कवलैरपिधीयते स्म ॥ ६१ ॥

तत्र प्रयातमनु नादितवेणुदण्डं
पीताम्बरं विदलदञ्जनपुञ्जकान्तिम् ।
आरब्धताण्डवरसैः परिवृत्तकण्ठ-
कान्तैः शिखण्डिभिरनुव्रज वीक्ष्यमाणम् ॥ ६२ ॥

---

59. b -घोषैः—D. -घोरैः—I. d -वनमनुत्तमस्ति—D. -रसमयं वनमस्ति—I.

61. c -लाश्मनः—D. -ल स्वनैः—D पुस्तकपत्रकोणे । -लाश्मनः—I.

62. b -कान्तं—D. -कान्तिं—I.

---

५८ । उज्ज्वलकृष्णवर्त्म, यागाङ्गनपक्षे उज्ज्वलः कृष्णवर्त्मा अग्निर्यत्र। वृन्दावनपक्षे उज्ज्वलं कृष्णवर्त्म कृष्णवर्णः पन्था यत्र ।

६२ । प्रयातमनु गमनमनु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोपदेवकृता मुग्धबोधटीका

[निबन्धकः—श्रीचिन्ताहरण-चक्रवर्त्ती काव्यतीर्थः एम्-ए]

सुविदितमेव सुमनसां यन्मुग्धबोधादयो बहव एव विविधशास्त्रमधिकृत्य विरचिता ग्रन्था विबुध-धौरेयेण अशेषशास्त्रपारीणेन बाल्ये मूढ़रूपेण प्रथितिं गतेन श्रीमता बोपदेवेन। तेषु च भूयस्तमां प्रसिद्धिं गाहमानं विराजते तदीयं मुग्धबोधमिति व्याकरणम्—यन्नामेदानीमपि गौडदेशस्य पश्चिमभागेषु अधीयमानवैयाकरणग्रन्थेषु प्राधान्यमधिगच्छदास्ते इति केषां वाऽपरोक्षमभिज्ञानम्। सुविशदस्याप्येतद्ग्रन्थस्य भूयो वैशद्यसम्पादनाय गौडदेशोद्भवैर्बहुभिरेव विरचिता अनर्वाचीना अनेके व्याख्यानग्रन्था अपि ग्रन्थस्यास्य प्राचीनादेव कालात् साधारणेषु प्रचारबाहुल्यम् एव सूचयतीति को वा संशयीत। यत् सत्यं साकल्येनानुपलभ्यमाना अपि कतिचनैतेषु अर्वाक्तनग्रन्थेषूल्लिख्यमाना अन्तरा अन्तरा स्वमस्तित्वं प्रमापयन्ति।

परमुपलभ्यमानेषु श्रुतिपथमुपागतेषु वा मुग्धबोधव्याख्यानग्रन्थेषु नैकोऽपि बोपदेवकृतित्वेनाद्य यावत् निरधारि। न च स्वग्रन्थव्याख्यातृरूपेणास्यस्य क्वापि प्रसिद्धिर्वैयाकरणगोष्ठीषु। एवं सति च वस्तुस्वरूपे नितरां विस्मयमुपागता वयं पण्डितगोष्ठीभूयिष्ठतो नवद्वीपतः स्वर्गत-वैयाकरणकेशरिणः शिवनारायण-शिरोमणेर्गृहात् साम्प्रतमेव समुपनतेषु परःशतेषु व्याकरणग्रन्थेषु यदा बोपदेवकृतित्वमात्मनः प्रख्यापयन्निव कश्चिन्मुग्धबोधव्याख्यानग्रन्थो दृग्गोचरं गतः। सुतरां संशयितेऽप्यस्य बोपदेवकृतित्वे परिषत्सदस्यानां मनीषिमहत्तमानामालोचनकृते समासतः समुपस्थाप्यते कश्चित् परिचयोऽस्माभिरत्रैतद्ग्रन्थस्य। परमिदं दुःखकारणं नो यद्, ग्रन्थोऽयमतितरां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खण्डितः, केवलं पत्रपञ्चकमेवास्याधिगतम्। तथा च प्रकरणस्य कस्यापि इतोऽन्तराऽसम्पूर्णतया पुष्पिकाया अनुपलम्भात् ग्रन्थसमाप्तेश्च असद्भावाद् ग्रन्थकृद्‌विषयकं न किमप्यस्माभिः समासादितम्। केवलं ग्रन्थारम्भीयात् कस्मादपि श्लोकाद् बोपदेवकृतित्वमस्य स्फुटीभवति। परं तत्रापि न नामतो निर्दिष्टो ग्रन्थकारः। तथा च—

"एतेषां मतमालोक्य मुग्धबोधं मया कृतम्।
क्रियते तस्य व्याख्याऽसौ सर्वशास्त्रप्रबोधिनी॥" इति

एतेन च नामनिर्देशाभावेऽपि मुग्धबोधकर्त्तुरेव एतद्‌ग्रन्थकर्तृत्वं स्पष्टमेवाभिहितम्। ग्रन्थस्यास्य च नाम सर्वशास्त्रप्रबोधिनीति निर्दिष्टम्। परं नाम्नोऽस्य अन्वर्थतां न कामप्युत्पश्यामो वयम्।

ग्रन्थादौ प्राथम्येन कृतं यथानियमं मङ्गलाचरणम्—

"त्रैलोक्यपितरौ वन्दे गङ्गाधर-गदाधरौ।
प्रलयस्थितिकर्त्तारौ भर्त्तारौ जगतां करौ॥" इति।

एतदनन्तरञ्च मुग्धबोधनिर्म्माणार्थं ये नामालोचिता ग्रन्थास्तेषां तत्तद्-ग्रन्थकाराणां वा समुपन्यस्तानि नामानि। यथा—

"पाणिनिर्वृत्ति को भाष्य-महाभाष्यन्ततः फणी।
प्रक्रियारत्नकारश्च काशिकावृत्तिरेव च॥
इन्द्रश्चन्द्रो महेन्द्रोऽपि चान्द्रः कान्द्रः कपालिनी।
कैयटो हरदत्तश्च कज्जटो दीक्षितः शुभः॥
शाकटायनजैनेन्द्रो(न्द्रौ) सारस्वतसरोरुहौ।
जुमरामरभट्टाश्च मेदिन्याद्या वसाभुजाः॥
वृद्धिपादकलापौ च रत्नमाला च मालिका।
नैयासिकमहाशङ्कः सुपद्मः कमलाशनः॥"

लिपिकारस्यानभिज्ञतया वर्णाशुद्ध्यादयः प्रमादा बाहुल्येनात्र विलसन्ति,—न च ते केवलं कल्पनामालम्ब्य मया शुद्धिं नीताः। प्रमाद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाहुल्याद् वा अस्मदज्ञानस्य सङ्कीर्णतया वा अवोल्लिखिता अनेके एव ग्रन्था ग्रन्थकर्त्तारश्च नास्माभिः परिचीयन्ते ।

कपालिनी-कज्जट-बुद्धिपाद-कमलाशनादयोऽज्ञातचरा इव प्रतिभान्ति। ग्रन्थपार्श्वे (margin) द्वयोस्तावत् कोऽपि सूचितः परिचयः केनापि वाचकेनाध्यापकेन वा *। तथा चोक्तं तत्र—

"महेन्द्रो मिथिलाभाषाप्रसिद्धः। कान्द्र इति पश्चिमस्यान्दिशि प्रसिद्धः शाकटायनस्य व्याख्याता।"

न चास्मिन्नामनिर्देशे ग्रन्थकालादिरूपः कश्चिदपि नियमोऽनुसृतः स्यात्, जुमरादपि परतः कलापस्य निर्देशात्। न चाधुनोपलभ्यमानप्रमाणनिचयाद्दच निर्दिष्टानां सर्वेषामेव बोपदेवात् प्राचीनत्वम् उररीकुर्वन्ति प्रत्नतत्त्वानुशीलनपराः प्रेक्षावन्तः। तथा च जुमर-सुपद्मयोः बोपदेवात् प्राचीनत्वे सुतरां निश्चयस्य अनुपलब्धत्वेऽपि केचन केचन तत्प्राचीनत्वं सर्वथैवोद्घोषयन्ति †। परं दीक्षितस्तु बोपदेवात् अतितरामर्वाक्तनो वर्षाणां द्वित्रैः शतैरित्यामनन्ति सुधियः ‡ न च दीक्षित इति सिद्धान्तकौमुदीकारोऽन्यो वा इति विद्यते संशयावकाशो लेशतोऽपि, 'पाणिनिवृत्तौ भट्टोजिदीक्षितेन' इत्यादिग्रन्थे तृतीयपत्रे स्पष्टमेव भट्टोजिनामोल्लेखात्। एवञ्च ग्रन्थस्यास्य बोपदेवकृतित्वं सुतरामेव संशयकोटिमारोहति। परं भूयसां वैयाकरणानामुल्लेखात् कथमप्यनुशीलनीय एव एष इति अयं प्रबन्धारम्भः। एतदप्यालोच्य

* प्रसङ्गतश्चैतदपि वाच्यं यदस्माभिरालोच्यमानप्रतिलिप्याधारभूतो ग्रन्थः केनचिद्वाचितपूर्व इति प्रतिभाति, एतद् व्याख्यानस्य अन्यत्र चैतादृशीनां पंक्तीनां दर्शनात्। न चैतत्प्रतिलिपिरालोचिता केनापि—अत्र प्रमादानां बाहुल्यदर्शनात्।

† Systems of Sanskrit grammar S. K. Belvalkar—पं० १०९, १११।

‡ तत्रैव ४७श पत्रे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् बोपदेवस्यालम्बनभूतानाम् ईदृशानां ग्रन्थ-ग्रन्थकाराणामुल्लेख-स्तेनैव कृतो ग्रन्थान्तरेऽपि। तथा च तदीयकविकल्पद्रुमे—

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥" * इति

इतोऽधिकानां नामानि निर्दिष्टानि सर्वशास्त्रप्रबोधिन्यामस्म-दालोचनविषयीभूतायाम्। कविकल्पद्रुमे प्रसङ्गतः प्रधानानां निर्देशः कृतः। मुग्धबोधव्याख्यानग्रन्थे तु साकल्येनावलम्बितग्रन्थादीनां सूचनं कृतमित्यनुमानं न सर्वथाऽसम्भवं भवितुमर्हति।

ग्रन्थमध्ये च अन्तराऽन्तरा अपरेषामपि केषाञ्चित् वैयाकरणानां नाम पंक्तयश्चोद्धृतानि। तथा च—ऌकारदीर्घत्वालोचनावसरे—(३य पत्रे)—

"अत्र ऌकारस्य दीर्घत्वन्नास्तीति शाकटायनः। अस्तीति प्रक्रिया-रत्नकारकज्जटौ। पाणिनिवृत्तौ भट्टोजिदीक्षितेनापि ऌवर्णस्य द्वादश तस्य दीर्घाभावादित्युक्तम्। यथा ह्रस्वऌकारोऽस्ति तथा दीर्घ-ॡकारोऽपि अस्तीति दुर्गसिंहः। वस्तुतः ऌकारस्य दीर्घत्वमप्यस्तीति अस्माकं सम्मतम्। अत एव महाभाष्येणापि धातोरुपसर्गादृतीति-सूत्रे तपरत्वात् ॡकारमिच्छति ॡकारयति। ततः प्रल्कारीयति इत्येवोदाहृतम्। पुरुषोत्तमदेवेनापि ऌकारो देवोमतो (?) स्यात् ॡकारो दनुजप्रसूरित्युक्तम्।" एवं च चतुर्थपत्रे—

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा॥

इति विस्तरवृत्तिः।

---

* S. K. Belvalkar महोदयेन तु श्लोक एष मुग्धबोधीय इति निर्देशः कृतः (१०म पृष्ठे तृतीयपादटीकायाम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चम-पत्रे च—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रिया त्वभिधीयते ॥

इति वैयाकरणभूषणादौ दृष्टम् ।

परिषत्सन्देशः

मासिकसभा—सौराषाढस्य पञ्चमदिवसे बुधवासरे सायं सार्द्धसप्तम-घटिकायां परिषदो मासिकाधिवेशनं सुनिष्पन्नमभूत् । तत्र स्थिरसभापतयो महामहोपाध्याय-श्रीयुक्त-दुर्गाचरण-साङ्ख्यवेदान्ततीर्थ-महोदयाः सभापतिपदमलमकार्षुः । पूर्वसभाविवरणानि पठितानि गृहीतानि च । नूतन-सभ्यानां नामान्यप्युत्कीर्त्तितानि । समनन्तरञ्च कविराज-श्रीयुक्त-वसन्तकुमार-राय-विद्यारत्नमहोदयेन "प्राचीनप्रसाधनोपकरणानी"ति शीर्षकः प्रबन्धो वाचितः । सुचिन्तितस्य सुलिखितस्य चास्य प्रबन्धस्य तत्रोपस्थिता अनेक एव धीरधौरेयाः समालोचनामनुकूलामुपालालयन् । सभापतेरभिभाषणात् परं रात्रेर्नवम-घटिकायां सभाभङ्गो जातः ।

विगत-सौरश्रावणस्य सप्तविंशदिवसे सोमवासरे रात्रेः सार्द्धसप्तम-घटिकायां श्रीयुक्तोपेन्द्रचन्द्रस्मृतितीर्थमहोदयस्य सभापतित्वेन परिषदो मासिकमधिवेशनमेकं निरपद्यत । पूर्वसभाविवरणपाठानुमोदनादिरूप-पूर्वाह्णकर्त्तव्येऽवसिते श्रीयुक्त-दक्षिणारञ्जन-शास्त्रिभिः एम् ए महोदयैः "लोकायतमते परलोकः" इतिशीर्षकः कश्चित् निबन्धो वाचितः । पण्डितप्रकाण्डैस्तत्रभवद्भिः श्रीयुक्तेश्वरचन्द्रशास्त्रि-महोदयैः सुगभीरार्थस्य सुवाचितस्यास्य प्रबन्धस्य समालोचनावसरे निखिलमेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकायतमतमुट्टङ्कितमभूत्। परिषदाचार्य्यैस्तत्रभवद्भिस्तर्काचार्य्यपादैश्च न्यायसमयमवलम्ब्य सद्धेतुत्वासद्धेतुत्वप्रदर्शनमुखेन निखिलैव व्याप्तिस्तद्ग्रहोपायादिश्च तथा प्रतिपादितौ, यथा अचिरारब्धन्यायशास्त्रानुशीलना अपि च्छात्रा अनायासेनैव तत्सर्वमधिगन्तुं शक्नुयुः, तथा निबन्धकारोपचित्तिा युक्ति-प्रधानतर्कशास्त्रीय-हेत्वादिदोषाश्च नावसरं लभेरन्। रात्रेर्दशम-घटिकायां सभाभङ्गो जातः।

विशेषाधिवेशनम्—विगतसौरश्रावणस्य षड्विंशदिवसे सायं सार्द्धषष्ठहोरायां महामहोपाध्याय-श्रीयुक्त-भागवतकुमारशास्त्रिभिः एम्. ए पि. एच् डि महोदयैः कलिकाताविश्वविद्यालये सम्प्रत्येव व्यवस्थापितस्य आशुतोषासनस्य लाभेन हर्षप्रकाशनार्थं परिषदो विशेषाधिवेशनमेकमजनि। तत्र च कलिकाता-महाविद्यालयाध्यक्षाः श्रीमन्तः डक्टर आदित्यनाथमुखोपाध्याय-महोदयाः सम्पं सभापति-पदमलमकार्षुः। तत्रोपस्थितेषु च सभ्येषु म. म. श्रीयुक्त-दुर्गाचरणसाङ्ख्यवेदान्ततीर्थाः, म. म. श्रीयुक्त-फणिभूषण-तर्कवागीशाः, म. म. श्रीयुक्त-शितिकण्ठ-वाचस्पतयः, म. म. श्रीयुक्त-कृष्णचरण-तर्कालङ्काराः, श्रीयुक्त-हरिदास-सिद्धान्तवागीशाः, श्रीयुक्त-सकलनारायणशास्त्रिणः, श्रीयुक्त-देवेन्द्रनाथ-राय, एम्. ए, श्रीयुक्त-प्रभातचन्द्र-चक्रवर्त्तिनः, एम्. ए, पि-एइच्. डि, श्रीयुक्त-अमूल्यचरण-विद्याभूषणाः, श्रीयुक्त-चितीशचन्द्रचट्टोपाध्यायाः, एम्. ए, श्रीयुक्त-रसमय-विद्याभूषणाः, एम्. ए, प्रभृतयो विशेषेणोल्लेखयोग्याः। सर्वे एवोपस्थिताः सभ्याः तत्रभवतां शास्त्रिमहोदयानामेतदाशुतोषासनलाभेन परां प्रीतिमात्मनोनामाविरकार्षुः। परिषत्पक्षतः श्रीयुक्त-भुवनमोहनसाङ्ख्यतीर्थमहोदयेन विरचिताः केचिदभिनन्दनश्लोकाः श्रीयुक्त-चिन्ताहरण-चक्रवर्त्तिना एम्, ए, महोदयेन वाचिताः। परिषत्सम्पादकैश्च श्रीयुक्त-अमरेश्वरठाकुर एम्, ए, वेदान्तशास्त्रिभिरभिनन्दनीयाय तत्रभवते शास्त्रिणे कानिचिद्द्राक्षाफलान्युपहृत्य भालतटे च चन्दनागुरुभिस्तिलकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरचितम्। सभापतेर्धन्यवादानन्तरं परिषच्छात्रसमित्या "दूतघटोत्कचा"भिधानस्य भासकृत-व्यायोगस्य प्रयोगेण समनुरञ्जिताः समागताः सर्वे एव सदस्याः।

रामायणसमितिः—परं प्रमोदनिदानमद्य निवेद्यते पुरतः पाठकमहाभागानां, यदियं सपारिषदा संस्कृत-साहित्यपरिषत् वङ्गदेशोचितपाठसमलङ्कृतमेकं वाल्मीकीय-रामायणं मुद्रापयितुं व्यवसन्ती शाखासमितिं काञ्चिदुदबोधयत्। तया च समित्या रामायणमुद्रणव्यापारस्य सम्पादने म. म. श्रीयुक्त-दुर्गाचरणसांख्यवेदान्ततीर्थाः म. म. श्रीयुक्त-भागवतकुमार-शास्त्रिणः पि, एच्, डि महोदयाश्च प्रधानसम्पादका निरधार्य्यन्त। परं वङ्गदेशोचित-पाठभूषितस्यास्य रामायणस्य वङ्गान् प्रत्युपयोगविशेषमापादयितुं वङ्गभाषयानुवादोऽपि कश्चिद् भविष्यतीति निर्द्धारितमास्ते शाखासमितिसदस्यैः। तत्र चानुवादकर्म्मणि कुशलधियः संस्कृतभाषाविशेषविदः श्रीमन्तो नगेन्द्रनाथठाकुर-सिद्धान्तरत्न-नामानो न्ययोजिषत। तैश्च सहज-नैपुण्येन एतदन्तरैव बालकाण्डं मुद्रणागारप्रेरणोपयोगितया लिखितमास्ते। टीका च प्राधान्येन लोकनाथचक्रवर्त्तिकृता समवलम्बिता भवेत्, अन्यासाञ्च टीकानां सारांशा एव सङ्कलिता भवेयुः। परं वङ्गदेशलिखितपुस्तकेषु देशान्तरसम्मतं पाठान्तरं लभ्येत चेत्तदपि बन्धनचिह्नाङ्केन वा, मुद्राचरेण वा मूल एव निवेशितं भविष्यति। तन्निबन्धना समालोचना च पाद-टीकायां स्थानं लप्स्यते। एवं कृत-परिकरेयं परिषत् पारमवश्यमेवासादयिष्यति भगवत्कृपारूपोडुपेन रामायणमहोदधेरिति सर्वथा वयमाशास्महे।

महदिदमनुष्ठानं सफलयितुं महान्तो व्यवसायाः, महान्तो मानवाः, महान्तश्च द्रविणव्ययाः समपेक्ष्यन्त इति विदितवृत्तान्तापि परिषन्न पश्चात्पदमाधातुमीहते, यतस्तेषां तेषामुपकरणानां पर्य्याप्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरहेऽपि नैव दुरासाद्यता प्रतिपाद्यते समुदयुञ्जानैः परिषत्-सदस्यैरिति शम् ।

चित्रपरिचयः

अस्यां पत्रिकायामस्मिन्नङ्के मुखभाग एव येयं मूर्त्तिरालेख्यगता परितर्पयत्यक्षीणि प्रेक्षकाणामोक्षणमात्रेण, सा हि "मुर्शिदावाद" मण्डलवर्त्तिनस्तत्रभवतो विद्याविभव विद्योतित-वैद्यान्ववायस्य स्वर्गत-कविराज-गङ्गाधरकविरत्नस्येति विदितमस्तु वाचकमहोदयानाम् । धरणीधन्वन्तरिरयमन्तरा तुरीय-युगस्याविर्भूयास्मिन् भूमिभागे प्राप्तावधीरणाखेदमायुर्वेदमुदयभूधरशृङ्गे भूयः पर्य्यवास्थापयदिति न तावत्तिरोहितमितरेष्वपि वङ्गविषयवास्तव्येभ्यो विपश्चित्प्रवरेभ्यः । काले चास्य निदान नैपुण्यमगण्यप्राणिवृन्दं नैरुज्यमुपलम्भयच्चरकावतरत्वमपरिपन्थि प्राख्यापयद् रोगक्षुब्धेषु मानवसमाजेषु ।

वारान्तरे चास्य जीवनवृत्तान्तः सन्तोषयिष्यति ग्राहकमहोदयानित्यत्रैवाद्य विरामः समासाद्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्था: *

		मूल्यम्	
		साधारणानाम्	सदस्यानाम्
२।	कालीतत्त्वम्—सटीकानुवादम्	॥/०)	॥०)
३।	श्रृङ्गारीसङ्गीतम्	,, ।/०)	,, ।/०)
४।	मुक्तिवाद:—गदाधर-भट्टाचार्य्यविरचित:, सटीकाद्वय-भाष्यानुवादसहित:	,, २)	,, १॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,, ३।०	,, ३
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा	१।०)	,, १)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,, ।०)	,, ।/०
८।	कारकोल्लास:—भरत-मल्लिककृत:, सोदाहरण-कारकनिर्णयरूप:	/०)	,, /०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गल-भाषाटिप्पणसमेता	॥०)	,, ॥/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	,, ।/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थ:	,, १।०)	,, १)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	, ।/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्	,, ॥०)	,, ॥/०)
		साधारणानाम्	सदस्यानाम्
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्) श्रीकालीपद-तर्काचार्य्यकृतम्	,, १।०)	,, १)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	,, १॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विष्णो रथयात्रादि द्वादशयात्रापद्धति-रूपम्	।)	,, ।/०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्	२।०	,, २)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थ:	१।०	,, १)

* देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा वङ्गाक्षरमुद्रितनामानि वङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कृष्णनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समञ्जसा—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। रामायणम्—वाल्मीकि-विरचितम्।

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
38, *Vidyasagar Street, Calcutta.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

१८५१ शकीये भाद्रे
September, 1929.]

१२श-वर्षस्य ५म-संख्या
[Vol. XII, No. 5.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—

श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जनशास्त्री एम्. ए.

श्रीउपेन्द्र-मोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7 s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটা চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

September, 1929.	१८५१ शकीये भाद्रे १२श-वर्षस्य ५म-संख्या	Vol. XII. No 5.

सनातनाचारः

[निबन्धकः—श्रीघनश्याम-वेदान्ततीर्थः]

कुलशीलगतानुरूपता वत यस्यां विचलन्त्यनादृता।
असवर्णसतां विलोक्य तां परिणीतिं परितप्यते न कः॥ १
अपि पूर्वतनी गृहस्थता सुतमुत्पादयितुं व्यवस्थिता।
नवशिक्षितसभ्यतागता विपरीता प्रतिभाति सर्वतः॥ २
इह पूज्य-कुलाङ्गनाकुलं मृतमालिङ्ग्य पतिं त्वनाकुलम्।
गतवत् किल निर्म्मलं पदं वपुराधाय हिरण्यरेतसि॥ ३
किमतः परमस्ति दुःखदं परधर्म्मप्रबलेऽत्र भारते।
विधवा पतिमाशुमीहते नवशिक्षा च पथः प्रदर्शिनी॥ ४
गुरुभिः परिपक्वबुद्धिभिः पितृरोगादिविचारणक्षमैः।
समदृश्यत कन्यका पुरा सुतपाणिग्रहणाय सादरम्॥ ५
स्वयमेव नवो युवाधुना विजने पश्यति कन्यकामहो।
अवरोधविधिः क्व वा त्रपा मुहुरालापपराङ्मुखी न सा॥ ६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊचुः परिणयमार्य्या गौर्य्यास्तथैव पुरातनाचार्य्याः ।
रोहिण्याः कन्याया विपरीतमनार्य्यवर्य्याणाम् ॥ ७
बाल्ये वयसि विवाहः प्रभुतामापादयेद् यथा कान्ते ।
न तथा यौवनकाले क्रीडापाञ्चालिका स्वामो ॥ ८
मृदुले चेतसि लग्नः संस्कारो न यात्यन्यथाभावम् ।
नारीणामुपयामः संस्कृतिरिति शास्त्रनिर्देशः ॥ ९
वदनपिधानं स्त्रीणां मन्यन्ते ये विगर्हितं कर्म्म ।
बहुमूल्यं रुचिरं वा तैः किं नाच्छाद्यते वस्तु ॥ १०
इत्थं प्राप्तविकारान् विलोक्य विविधान् सनातनाचारान् ॥
रोदिति संस्कृतिकामो भगवच्चरणे घनश्यामः ॥ ११

लोकायतमते परलोकः *

[निबन्धकः—श्रीदक्षिणारञ्जनशास्त्री एम्. ए.]

नास्ति परलोकः। न च वक्तव्यं किं परलोकबाधकं प्रमाणम्। यतो न लौकायतिकैस्तद्बाधकप्रामाणात् तदभावः प्रतिपाद्यते। किन्तु परोपन्यस्त-प्रमाण-दूषणमात्रमेव क्रियते। अत एव तेषां सूत्रम्—"सर्वत्र पर्य्यनुयोगपराण्येव सूत्राणि बृहस्पतेः।" तच्च परोपन्यस्त-प्रमाणदूषणं पराभ्युपगमस्य प्रश्नादिद्वारेण विचारणा। न पुनः स्वसिद्धप्रमाणोपन्यासः। येन अतीन्द्रियार्थबाधकत्वेन प्रवर्त्तमानं प्रमाणमाश्रयासिद्धत्वादिदोषदुष्टत्वेन कथं प्रवर्त्तते इति तान् प्रति परेणापि पर्य्यनुयोगः क्रियेत। अत एव परलोकप्रसाधकप्रमाणाभ्युपगमं परेण ग्राहयित्वा तदभ्युपगमस्य विचारः क्रियते।

---

* परिषदो मासिकाधिवेशने वाचितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परलोकसद्भावावेदकं प्रमाणं प्रत्यक्षम्, अनुमानम्, उपमानम्, आगमः, अर्थापत्तिः, अभावः, सम्भवः, ऐतिह्यं वापरेण लोकार्य्यम्।

तत्र न तावत् परलोकप्रतिपादकत्वेन चक्षुरादिकरणव्यापारसमासादितात्मलाभं सन्निहितप्रतिनियतविषयत्वात् प्रत्यक्षं प्रवर्त्तते। नापि अतीन्द्रियं योगिप्रत्यक्षं तत्र प्रवर्त्तत इति वक्तुं शक्यम्, परलोकादिवत् तस्यापि असिद्धेः। नाप्यनुमानम्—"अनुमानमप्रमाणमिति" च तेषां सूत्रम्। अनेन च सूत्रेण तैः प्रतिज्ञाप्रतिपादनमात्रमेव कृतम्। अनिश्चितार्थप्रतिपादकत्वादसिद्धप्रमाणाभासवदिति हेतु-दृष्टान्तावपि ऊह्यौ। अनुमानं व्याप्तिज्ञानसापेक्षं, व्याप्तिश्च व्यभिचाररहितः सम्बन्धः। स च अविनाभाव इत्यप्युच्यते। स सकलसपक्ष विपक्षाप्रत्यक्षीकरणे दुर्विज्ञानोऽसर्वविदा। न चात्र भूयोदर्शनं शरणम् सहस्रशोऽपि दृष्टसाहचर्य्यस्य व्यभिचारात्। महानसादौ वह्निधूमयोर्भूयोदर्शनसाहस्रेऽपि यथा तप्ते लोहपिण्डे केवलाग्निवत् गोपालघुटिकादौ केवलधूमस्यापि प्रत्यक्षदर्शनेन व्यभिचारनिरासासम्भवः। एवं भूयः सहचरितयोरपि मित्रयोर्मिथो व्यभिचारः स्त्रीसङ्गादौ दृश्यत एव। तथा च अविनाभावसम्बन्धस्य ग्रहीतुमशक्यत्वात् अनुमानं न प्रमाणम्। अत्र चाह भर्तृहरिः—अवस्थादेशकालभेदेन पदार्थानां शक्तयो भिन्नाः। अतो न शक्यतेऽनुमानात् तद्भावनिश्चयः कर्त्तुम्। न ह्येवं शक्यते अनुमानात् प्रत्येतुं—देवदत्तो भारोद्वहनसमर्थो न भवति देवदत्तत्वाद् बालावस्थदेवदत्तवदिति। अत्र हि अवस्थाभेदेन शक्तिभेदसम्भवाद् व्यभिचारः। तथा देशभेदेन आमलकीखर्ज्जूरादीनां रसवीर्य्यविपाकभेदो दृश्यते। तत्र नैवं शक्यते वक्तुम्—सर्वा आमलकी कषायफला अनुभूयमानामलकीवदिति। तथा कालभेदेन कूपोदकादीनां शीतोष्णादिभेदः सम्भवति। तत्र सर्वा आपः शीता इति न शक्यते निश्चयः कर्त्तुम्। तथा तृणादिषु निश्चितदहनसामर्थ्यस्याग्नेरभ्रपटले तत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामर्थ्यं प्रतिहन्यते। न च तच्चैवमनुमातुं शक्यते अभ्रपटलमग्निना दह्यते पार्थिवत्वात्तृणादिवदिति। तथा अन्येनान्यथा प्रतिपादितोऽर्थः पुनरभियुक्ततरेण अन्येन अन्यथा प्रतिपाद्यते।

यच्च सामान्यस्य तद्विषयस्याभावात्, स्वार्थपरार्थभेदासम्भवात्, विरुद्धानुमान-विरोधयोः सर्वत्र सम्भवात् क्वचिच्च विरुद्धाव्यभिचारिणः इत्यादिदूषणजालं, तदनुद्घोषणीयमेव ; यतोऽनिश्चितार्थप्रतिपादकत्वादनुमानमप्रमाणमित्यनुमानाप्रमाणताप्रतिपादने कृते शेषदूषणजालस्य मृतमारणकल्पत्वात्।

ये चानुमानादिप्रामाण्यमनुमन्वानास्तान् प्रति दृष्टान्तमाह—कश्चित् पुरुषो नास्तिक-मतवासना वासितान्तःकरणो निजां जायाम् आस्तिकमतनिबद्धमतिं स्वशास्त्रोक्तयुक्तिभिरभियुक्तः प्रत्यहं प्रतिबोधयति। सा तु यदा न प्रतिबुध्यते, तदा स इयमनेनोपायेन प्रतिभोत्स्यत इति स्वचेतसि विचिन्त्य, निशायाः पश्चिमे यामे तया सह नगरान्निर्गत्य तां प्रत्यवादीत्—प्रिये य इमे नगरवासिनो नराः परोक्षविषयेऽनुमानादिप्रामाण्यमाचक्षाणा लोकेन च बहुश्रुततया व्यवह्रियमाणा विद्यन्ते, पश्य तेषां चारुविचारणायां चातुर्य्यमिति। ततः स नगरद्वारादारभ्य चतुष्पथं यावन्मन्थरतर-प्रसृमर-समीरणसमीभूत-पांशुप्रकरे राजमार्गे द्वयोरपि स्वकरयोरङ्गुष्ठप्रदेशिनी मध्यमाङ्गुलित्रयं मीलयित्वा स्वशरीरस्योभयोः पक्षयोः पांशुषु न्यासेन वृकपदानि प्रचक्रे, ततः प्रातस्तानि पदानि निरीक्ष्यास्तिको लोको राजमार्गेऽमिलत्। बहुश्रुता अपि तत्रागता जनान् प्रत्यवोचन्,—भो भो वृकपदानामन्यथानुपपत्त्या नूनं निशि वृकः कश्चन वनतोऽत्रागच्छत्। ततः स तांस्तथा भाषमाणान्निरीक्ष्य निजां भार्य्यां जजल्प,—एते वृकपदविषये सम्यगविदितपरमार्था बहवोऽप्येकसदृशमेव भाषमाणा अपि बहु मुग्धजनध्यान्ध्यमुत्पादयन्तोऽपि च ज्ञाततत्त्वानामादेयवचना न भवन्ति। तथा बहवोऽप्यमी वादिनो धार्म्मिकछद्मधूर्त्ताः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परवञ्चनैकप्रवणा यत्किञ्चिदनुमानादिभिर्मुधैव सतामवधीरणीयवचना भवन्तीति।

अप्रत्यक्षमपि अस्तितया अभ्युपगम्यते चेत्, जगदनपह्नुतमेव स्यात्। दरिद्रो हि स्वर्णराशिर्मेऽस्तीति अनुध्याय हेलयैव दौःस्थ्यं दलयेत्—दासोऽपि स्वचेतसि स्वामितामवलम्ब्य किङ्करतां निराकुर्य्यादिति न कोऽपि स्वानभिमतमालिन्यमश्नुवीत। एवं न कश्चित् सेव्यसेवकभावो दरिद्र-धनिभावो वा स्यात्। तथा च जगद्व्यवस्थाविलोपप्रसङ्ग इति।

अत्र केचन एवमाहुः—अस्ति च प्रामाण्यमनुमानादेः। कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत ? नदीतीरे फलानि सन्ति इति निश्चित्य फलप्राप्त्यर्थं प्रेक्षावतां फलार्थिनां नदीतीरे प्रवृत्तिश्चेति ? अनुमानाप्रामाण्ये—"स्वगृहान्निर्गतो भूयो न तदागन्तुमर्हति"।

भवादृशि दूरविदेशमागते चरन्तु वैधव्यविधानमङ्गनाः।
अदर्शनेनैव यतः शरीरिणो विदेशयातस्य मृतस्य तुल्यता॥

अत्र लौकायतिकैरुच्यते,—न तावदस्माभिरनुमानमात्रप्रतिषेधः क्रियते, किन्तु त्रिलक्षणं यदनुमानवादिभिर्लिङ्गमभ्युपगतं तन्न लक्षणभाग् भवतीति प्रतिपाद्यते। अनुमानमात्रप्रतिषेधे तु लोकव्यवहारोच्छेदप्रसङ्गः। अत एवाह पुरन्दरः—लोकप्रसिद्धमनुमानमस्माभिरपीष्यत एव ; यत्तु कैश्चिल्लौकिकं मार्गमतिक्रम्यानुमानमुच्यते तन्निषिध्यत इति। लोकप्रसिद्धमनुमानमिन्द्रियग्राह्यं पूर्ववत् शेषवच्च। तच्च लौकायतिकमते प्रत्यक्ष एवान्तर्भूतम्। अलौकिकमतीन्द्रियं सामान्यतो दृष्टम्—अलौकिकं त्रिलक्षणं यदनुमानं लोकायतमते तदप्रमाणम्। लोकप्रसिद्धं यदन्येषामनुमानं तत्तु लौकायतिकानां प्रत्यक्षमेवातः प्रमाणम्। अत एव गोपालाद्यज्ञ-लोकव्यवहाररचनाचतुरस्य, धूम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनमात्राविर्भूतानलप्रतिपत्तिरूपस्य नाप्रामाण्यम्। अत एव सर्व-मतसंग्रहे—"इदमन्नं क्षुन्निवर्त्तकमन्नत्वात्, ह्यस्तनान्नवदि"त्याद्यनुमानञ्च तत्रैवान्तर्भवति, प्रत्यक्षमूलत्वाविशेषात्। अत एव लोकप्रसिद्ध-मनुमानं लोकायतमतेऽपि प्रमाणमेव। परं नानुमानतया अपि तु प्रत्यक्षतयैव। प्रत्यक्षमूलत्वात् तन्मते प्रत्यक्ष एवान्तर्भूतम्। तदप-रेषामनुमानं लोकायतिकानां प्रत्यक्षमपि परलोकप्रतिपादकं न भवति प्रत्यक्षत्वाविशेषात्। अलौकिकमतीन्द्रियं सामान्यतो दृष्टं यदनुमानं तदप्रमाणमेव। अत एव तन्न परलोकप्रतिपादकम्। स्वयमसिद्धं कथं परान् साधयेत्।

अथ इदमेव जन्म पूर्वजन्मान्तरमन्तरेण न युक्तमिति जन्मान्तर-लक्षणस्य परलोकस्य सिद्धिरिष्यते, तत् किमियमर्थापत्तिः, अथानुमानं वा ? न तावदर्थापत्तिः तल्लक्षणाभावात्। "दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते" इति हि तस्या लक्षणं विचक्षणैरिष्यते। न तु जन्मान्तर-मन्तरेण नोपपत्तिमदिदं जन्म इति सिद्धम्। मातापितृसामग्रीमात्र-केण तस्योपपत्तेः। अथ कथम् पूर्वोपात्तादृष्टमन्तरेण मातापितृ-विलक्षणं शरीरम् ? न हि सर्वदा कारणानुरूपमेव कार्य्यम्। अथा-नाद्यनन्त आत्मा अस्ति, तमाश्रित्य परलोकः साध्यते। न ह्येकानु-भवितृव्यतिरेकेणानुसन्धानं सम्भवति, भिन्नानुभवितर्य्यनुसन्धानादृष्टेः— तदयुक्तम् "परलोकिनोऽभावात् परलोकाभावः।" न हि अनाद्यनन्त आत्मा प्रत्यक्षप्रमाणसिद्धः। अनुमानेन च इतरेतराश्रयदोषप्रसङ्गः। न चासिद्धमसिद्धेन साध्यते।

न चागमादिनाऽपि परलोकसिद्धिः। तेषां प्रामाण्यासिद्धेः। न चाप्रमाणसिद्धं परलोकादिकमभ्युपगन्तुं युक्तं तदभावस्यापि तथा अभ्युपगमप्रसङ्गात्। अत एव तेषां वचनं—

आत्मास्ति देहाद् व्यतिरिक्तमूर्त्तिर्भोक्ता स लोकान्तरितः फलानाम्।
आशेयमाकाशतरोः प्रसूनात् प्रथीयसः स्वादुफलप्रसूतौ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि गच्छेत् परं लोकं देहादेष विनिर्गतः।
कस्माद् भूयो न चायाति बन्धुस्नेहसमाकुलः॥ इत्यादि
लोकायतमञ्च खण्डितं विविधैर्युक्तिजालैरास्तिकवादिभिः, परं तेषामवतारणात्र न सङ्गच्छते। केवलं यत्किञ्चनात्रनिबद्धं, परलोकविषये लौकायतिकानां तदेवाभिमतं नवेति विचारयन्तु बहुश्रुता महाभागा इति सानुनयं निवेद्य विरमामि।

सर्वप्रत्ययमाला *

[श्रीशङ्करार्य्यविरचिता]

शिवात्मजमविघ्नाय सुरासुरसुपूजितम्।
सर्वक्रियादौ त्वभ्यर्च्यं वन्दे गणपतिं प्रभुम्॥ १
गोविन्दं गोपगोपीनां नन्दनं नन्द-नन्दनम्।
वन्दे वृन्दारकैर्वन्द्यमिन्दिरानन्दकारिणम्॥ २
प्रत्ययग्रथितैः शब्दैः पर्य्यायैः सर्वधातुजैः।
शङ्करार्य्यानुजो मालां शङ्करार्य्यः करोम्यहम्॥ ३
क्रियाक्रमोक्तशब्दानां पर्य्यायपदविस्तृता।
सर्वप्रत्ययमालेयं बालशिक्षार्थमुद्धृता॥ ४
दशाध्यायस्थ-भूवादि सर्वधातुक्रियाक्रमम्।
श्लोकाष्टकेन वक्ष्यामि शतात् प्राक् सकलाः क्रियाः॥ ५
क्रियापदप्रपञ्चेऽच क्रमयुक्ते कृते सति।
सर्वस्येष्टपदं द्रष्टुमप्रयत्नेन शक्यते॥ ६
उत्पत्तीहा-क्रियावृद्धि-शिक्षाध्ययनसंशयाः।
चिन्ताचोद्योक्त्युपस्थानस्मृतिबुद्धिविनिश्चयाः॥ ७

---

* प्रकाश्यते—श्रीरामलिङ्गशास्त्रिणा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानपालनसेवार्चा नमस्कारः स्तुतिस्तथा ।
इच्छार्थनार्पणादानचौर्य्यालङ्कारदोषयः ॥ ८
वीजनं ज्वलनं होमो दाहः परिणयः क्रमः ।
पाको भुक्तिर्भक्षणं च लेहनं पानपूरणे ॥ ९
वीक्षणं चुम्बनाश्लेषलज्जारतिसुखानि च ।
सुप्तिजागरणोन्मेषाः प्रेषणं नोदवर्जने ॥ १०
अन्वेषणञ्च सन्नाहो बन्धनारोहनिर्गमाः ।
गमनं धावनं प्राप्तिः स्रवणञ्चावगाहनम् ॥ ११
स्नानोक्षणे शुद्धिसृजो लङ्घनाह्वाननिस्वनाः ।
निन्दाधिक्षेपकोपाश्च युद्धमावरणं भयम् ॥ १२
कम्पच्छेदभिदाचूर्णनिग्रहः पतनं पुनः ।
लुठनं वमनं मूत्रं ग्लानिर्मूर्च्छामृतिस्तथा ॥ १३
शोकाक्रन्दजयावृत्तिप्रवेशाश्चोच्छ्रयः स्थितिः ।
आसनं वसनिष्कर्षक्षमाजीवनमित्यसौ ॥ १४
क्रियाक्रमोऽनुसन्धेयो मालापाठपरैस्तदा ।
क्रियाक्रमेण चैतेन कस्यचिच्चरितेन च ॥ १५
उक्तोऽर्थः सर्वमालानां मालाः सर्वास्त्रयोदश ।
सुबन्ते कृत्पदैर्मालाश्चतस्रः स्युः क्रियाक्रमात् ॥ १६
तिङन्ते नव मालाः स्युर्लकारनवकस्य वै ।
तत्तन्मालासु सुव्यक्ताः प्रत्ययार्थाः समीरिताः ॥ १७
प्रकृतिप्रत्ययार्थज्ञो भवेद् बालोऽपि पण्डितः ।
प्रक्रियां परिभाषाञ्च प्रत्याहाराद्युपद्रवम् ॥ १८
धातुपाठक्रमं माला विस्पष्टार्था न चेच्छति ।
यस्तु व्याकरणाब्धिस्थः शब्दलक्षणतत्परः ॥ १९
तस्यैव परिभाषादिसङ्केतः प्रत्ययार्थिनः ।
आप्तप्रयोगसन्दृष्टैः पदैर्माला मया कृता ॥ २०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदान्यत: प्रयोक्तार: सुविश्वस्ता: प्रयुञ्जताम् ।
मालामार्गगता बाला: सिद्धरूपप्रपाठका: ॥ २१
भविष्यन्त्यल्पकालेन शाब्दिकानां पुर:सरा: ।
सर्वे शब्दा विभक्त्यन्ता इति पूर्वं विभक्तय: ॥ २२
विभक्त्यर्थाश्च कथ्यन्ते मालायेषा मयाऽधुना ।
विभक्त्यन्ता: पदाख्या: स्यु: शब्दास्तेऽपि पुनर्द्विधा ।२३
सुबन्ताश्च तिङन्ताश्च सुप: सप्त विभक्तय: ।
प्रथमा च द्वितीया च तृतीया तिथिनामिका: ॥ २४
चतुर्थी पञ्चमी षष्ठी सप्तमीति समीरिता: ।
प्रथमादिविभक्तीनामेकैकस्या अपि क्रमात् ॥ २५
एकद्विबहुपूर्वाणि त्रीणि स्युर्वचनान्यथ ।
एकत्वे त्वेकवचनं द्वित्वे द्विवचनं तथा ॥ २६
त्रित्वाद्यर्थविवक्षायां वचनं बहुपूर्वकम् ।
कारकं स्याद्विभक्त्यर्थो लिङ्गं संख्या च गम्यते ॥ २७
क्रियानिमित्तभूतं यत् तत्सर्वं कारकं भवेत् ।
यागावघातपाकादिव्यापारोऽत्र क्रियामतम् ॥२८
कर्त्ता च कर्म करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणे कारकाणीति षड् विदु: ॥ २९
क्रियाहेतुषु षट्स्वत्र स्वतन्त्रो यो विवक्षित: ।
स स्यात् कर्त्ताऽत्र कर्मादि-कारकाणामधीश्वर: ॥ ३०
यदीप्सिततमं कर्त्तुस्तत्तु स्यात् कर्मकारकम् ।
कर्त्तुर्यत् साधकतमं क्रियायां करणं भवेत् ॥ ३१
ग्रहीता सम्प्रदानं स्याद्यस्मै कर्त्ता ददात्यसौ ।
यतो वियोग: कस्यापि तदपादानकारकम् ॥ ३२
क्रियाश्रयस्य कर्त्तुर्वा धारणात् कर्मणोऽथवा ।
आधारभूतं यद्वस्तु तच्चाधिकरणं भवेत् ॥ ३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियापदान्वयवशात् कारकेषु विभक्तयः ।
क्रियापदं त्रिधैव स्यात् कर्त्तृकर्मक्रियार्थतः ॥ ३४

कर्त्तरि प्रथमैव स्यात् क्रियापदसमोरिते ।
सम्बोधने च प्रथमा तच्चाह्वानं स्वनामभिः ॥ ३५

कर्मणि स्याद्द्वितीयाख्या तृतीया करणे भवेत् ।
चतुर्थी सम्प्रदाने स्यादपादाने च पञ्चमी ॥ ३६

षष्ठी तु कारकं मुक्त्वा सम्बन्धार्थे व्यवस्थिता ।
सप्तम्यत्राधिकरणे तदुदाहरणं यथा ॥ ३७

ददौ कर्णो महाराजः कुण्डले द्वे स्वपाणिना ।
इन्द्रायादाय कर्णाभ्यां सतां मार्गे व्यवस्थितः ॥ ३८

अर्थवन्तस्तु ये शब्दा धातुप्रत्ययवर्जिताः ।
ते प्रातिपदिकाख्याः स्युस्ते सुबन्ता इतीरिताः ॥ ३९

शब्दशब्दवदेवात्र स्वार्थमाने विवक्षिते ।
विज्ञेयाः प्रातिपदिका धातवः प्रत्यया अपि ॥ ४०

कल्पितार्थवत्त्वेन शशशृङ्गादयोऽपि ये ।
ज्ञेयाः सप्तविभक्त्यन्तास्तिङन्तव्यतिरेकिणः ॥ ४१

एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ।
मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ॥ ४२

रूढाश्च यौगिकाः शब्दा योगरूढा इति त्रिधा ।
रूढ्यैवार्थं वदन्तोऽत्र रूढा घटपटादयः ॥ ४३

तिङन्ता यौगिकाः सर्वे कृदन्तेष्वपि केचन ।
यौगिकेष्वपि ये केचिद्विशेषे यत्र कुत्रचित् ॥ ४४

योगरूढा इति ज्ञेया धृतराष्ट्राम्बुजादयः ।
उणादिपक्षे वृक्षादिशब्दानामपि भाषते ॥ ४५

धातुजत्वं कृदन्तत्वं तन्नेच्छति पाणिनिः ।
सूत्रितो यो विभक्त्यर्थो विस्तरेणाथ कथ्यते ॥ ४६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा साऽर्थमात्रे स्यात् सलिङ्गे वचनाधिके।
परिमाणे द्विधाभूते साध्यसाधनभेदिते॥ ४७
अर्थमात्रविवक्षायामुच्चैर्नीचैः शनैरिति।
वृक्षो घटः पटश्चेति वस्तुमात्रेऽप्युदाहृताः॥ ४८
वृक्षः स्त्री कुण्डमित्यादि लिङ्गमात्रे विवक्षिते।
एको द्वौ बहवश्चेति वचने तु विवक्षिते॥ ४९
द्रव्ये परिमिते प्रस्थास्तिलाः प्रस्थाश्च तण्डुलाः।
आढकं कुडवं प्रस्थं अरत्निश्चेति साधने॥ ५०
कृत्तद्धितसमासैश्च तथा तिङ्प्रत्ययैरपि।
प्रथमाऽभिहितेषु स्यात् सा चान्यत्रैव वक्ष्यते॥ ५१
सम्बोधने च प्रथमा तत्राह्वानं स्वनामभिः।
तदभिव्यक्तये क्वापि हे-शब्दः प्राक् प्रयुज्यते॥ ५२
हे शिशो! शीघ्रमागच्छ, वटो! वेदमधीष्व भोः।
चोर! तिष्ठ, रिपो! मागा, रथं वाहय सारथे!॥ ५३
प्रथमार्थो भवत्येवं द्वितीयार्थोऽथ कथ्यते।
द्वितीया कर्मणि प्रोक्ता कर्मेप्सिततमं नृणाम्॥ ५४
निर्वर्त्त्यञ्च विकार्य्यञ्च प्राप्यमीप्सितमेव च।
अनीप्सितं चाकथितमिति कर्मात्र षड्विधम्॥ ५५
प्रकृतेरविनाशोत्थं कार्य्यं निर्वर्त्यमिष्यते।
घटान् करोतीत्युक्ते स्यात् तेषां निर्वर्त्य-कर्मता॥ ५६
प्रकृत्युच्छेदसम्भूतं विकार्य्यं कर्म कथ्यते।
काष्ठं भस्मीकरोतीति विकार्य्यं कर्म तद् भवेत्॥ ५७
इन्द्रियैः प्राप्यते यत्तु तत् प्राप्यं कर्म कथ्यते।
स्वदेशान् गच्छतीत्युक्ते देशानां प्राप्य-कर्मता॥ ५८
भुङ्क्तेऽन्नं मृष्टमित्यत्र त्वन्नस्येप्सित-कर्मता।
प्रसिद्धमीप्सितं कर्म व्याप्तत्वादन्यकर्मसु॥ ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्त्तुस्त्वनीप्सितं क्वापि कर्म स्यात्तदुदीर्य्यते।
विषं भुङ्क्ते वने चोरान् व्याघ्रान् पश्यत्यरीनिति॥ ६०
ईप्सितार्थ-निमित्तं यदनुक्तं कारकान्तरैः।
तत्कर्माकथितं ज्ञेयमेतच्चाहुर्द्विकर्मकम्॥ ६१
दुहि-याचि-चिञः शासि-रुधि-भिक्षि-ब्रुवस्तथा।
कर्माण्यकथितानि स्युः पृच्छतिर्नयतिस्तथा॥ ६२
गां दोग्धि दुग्धं गोपालो धनिनं याचते धनम्।
पुष्पाण्यपचिनोत्येष वृक्षान् सर्वान् सुपुष्पितान्॥ ६३
शास्ति माणवकं धर्मं गां रुणद्धि व्रजं भटः।
धनिनं भिक्षते द्रव्यं शिष्यान् वाक्यं ब्रवीति च॥ ६४
शूद्रं पृच्छत्यसौ मार्गम् अजां ग्रामं नयत्यपि।
गतिबुद्ध्यशनार्थेषु शब्दकर्मक-धातुषु॥ ६५
अणिजन्तेषु यः कर्त्ता स्वतन्त्रोऽकर्मकेषु च।
स कर्त्ता कर्मसंज्ञः स्यात् तेष्वेव णिचि भाषिते॥ ६६
भृत्यान् गमयति ग्रामं बोधयेत् स शिशून् हितम्।
ओदनं भोजयत्यार्य्यान् वेदान् पाठयति द्विजान्॥ ६७
पाययत्यबलां मद्यं पार्श्वे शाययति प्रियाम्।
शीङ्स्थासामधिपूर्वाणामाधारे वसतेस्तथा॥ ६८
आङ्ध्यनूपपूर्वस्य द्वितीया तद्यथा क्रमात्।
अधिशेते भुवं भिक्षुरधितिष्ठत्यसौ मठम्॥ ६९
अध्यास्ते नृपतिः पीठमावसत्यवनिं जनः।
गृहानधिवसन्त्यन्ये सेनामुपवसेदिति॥ ७०
अभुक्त्यर्थोपवासश्चेत् चैत्रेषूपवसेदिति।
कालस्य चाध्वनो वापि द्रव्येण क्रियया गुणैः॥ ७१
द्वितीयाऽत्यन्तसंयोगे त्वध्वशब्दविवर्जिते।
त्रीन्मासान् सततं भाष्यमधीते वत्सरान् धनी॥ ७२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षण्मासान् गौस्य कल्याणीत्येवं कालेऽवगम्यताम् ।
योजनं शर्करामार्गे क्रोशं गायन्ति गायका: ॥ ७३
योजनं कुटिला गङ्गेत्येवं स्यादध्ववाचिषु ।
अन्तरेणान्तराधोऽधो निकषा परितोऽभित: ।
अध्यध्युभयतो हा धिगुपर्य्युपरि सर्वत: ॥ ७४
अन्तरेण घृतं भुङ्क्ते त्वां च मां चान्तरा स्थित: ।
सेनामधोऽध: पतति पर्वतं निकषा नदी ॥ ७५
राजानं परितो भृत्या अयोध्यामभितो द्रुमा: ।
वृक्षमध्यधि शाखाश्च नदीमुभयतो द्रुमा: ॥ ७६
हा देवदत्तं धिग् दुष्टान् उपर्य्युपरि वारिदान् ।
द्वितीयार्थो भवेदेवं तृतीयार्थोऽथ कथ्यते ॥ ७७
तृतीया करणेऽत्र स्यात् कर्तृत्वे चापि कथ्यते ।
करणं द्विविधं प्रोक्तं बाह्याभ्यन्तरभेदत: ॥ ७८
शरीरावयवादन्यद् बाह्यनेत्रादि चान्तरम् ।
वृक्षं छिनत्ति खड्गेन सूर्य्यं नेत्रेण पश्यति ॥ ७९
मनसा निश्चिनोत्येष हस्ताभ्यां ताडयत्यरीन् ।
यदा क्रियापदं वक्ति कर्म वा केवलां क्रियाम् ॥ ८०
कर्त्तर्य्यपि तृतीया स्यात्प्रथमा तत्र कर्मणि ।
ओदनो भुज्यते विप्रै: कुलालै: क्रियते घट: ॥ ८१
एषा तृतीया कर्त्रर्था कर्मार्थैस्तिङ्पदैर्युता ।
ब्राह्मणैरोदनो भुक्त: कुलालेन कृतो घट: ॥ ८२
एषा तृतीया कर्त्रर्था कर्मार्थै: क्तप्रत्ययैर्युता ।
वृक्षेण क्षीयते वृद्धै: म्रियते भ्राम्यतेऽम्बुदै: ॥ ८३
एषा तृतीया कर्त्रर्था भावार्थैस्तिङ्पदैर्युता ।
गत्यर्थधातुजैर्योगे तृतीयाऽऽधारगोचरा ॥ ८४
सेतुना गच्छति 'पथा याति' धावति वाजिना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रधाने तृतीया स्यात् सहार्थपदयोगतः ॥ ८५

यस्य साक्षात् क्रियायोगः प्रधानोऽन्यः सहागतः ।
पुत्रेण साकमायाति पिता पुत्रैः सहागतः ॥ ८६
पुत्रेण सार्द्धं धनवान् पिता स्थूलः सहानुजैः ॥ ८७

साकं स्तनाभ्यां जघनं महत्ते कान्ते कराभ्यां नयने च दीर्घे ।
श्लक्ष्णैश्च दन्तैरलकैश्च सार्द्धं मध्येन तन्वी नवरोमराजिः ॥ ८८

प्रकृत्यादिगणेभ्यः स्यात्तृतीया तदुदाहृतिः ।
प्रकृत्या दर्शनीयोऽयं प्रकृत्या सुभगो ह्ययम् ॥ ८९
प्रायेण याजिको ह्येष गार्ग्यो गोत्रेण मे गुरुः ।
लक्षणेन तृतीया स्यात्तदित्थम्भूतलक्षणम् ॥ ९०
अनिश्चितोऽपि येनार्थः स्पष्टं निश्चीयते यथा ।
श्वेतच्छत्रेण राजानं बटुं कृष्णाजिनेन च ॥ ९१
तथा शास्त्रैरुपाध्यायमद्राक्षोदित्युदाहृतिः ॥ ९२
तृतीयार्थो मया प्रोक्तश्चतुर्थ्यर्थोऽथ कथ्यते ।
सम्प्रदाने चतुर्थी स्यात् कार्य्यार्थं यत्र कारणम् ॥ ९३
हिरण्यं कुण्डलायेदं दारु यूपाय कल्पितम् ।
तुमुन्नर्थसमानार्थाः शब्दा ये भाववाचिनः ॥ ९४
तेषु योगे चतुर्थी स्यात्तदुदाहरणं यथा ।
गम्यतामर्थलाभाय क्षेमाय विजयाय च ॥ ९५
शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ।
संयमाय श्रुतं धत्ते धनं दानाय भुक्तये ॥
यज्ञाय पशवो नीता जाता विप्राः स्वकर्मणे ॥ ९६
नमः-स्वस्ति-स्वधा-स्वाहाऽलं-वषट् शब्दसंयुते ।
पदार्थेऽपि चतुर्थी स्यात् तदुदाहरणं यथा ॥ ९७
नमः शिवाय देवाय स्वस्ति गोभ्यो जनाय च ।
स्वधा पितृभ्यो देवेभ्यः स्वाहा स्वाहाऽग्नये तथा ॥ ९८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलं मल्लाय मल्लोऽयं वादो शक्तोऽन्यवादिने ।
पर्य्याप्तः सारमेयाय सारमेयस्तथैव च ॥ ९९
शक्तो हृषो हृषायासौ शिखायै वषडित्यपि ।
इन्द्राय वौषडेवं स्यात् कवचाय हुमित्यपि ॥ १००
क्रुधद्रुहेर्ष्यासूयार्थ-धातुयोगेऽपि यं प्रति ।
कोपस्तत्र चतुर्थी स्यात् स्पृहेर्धातोरपीष्यते ॥ १०१
मित्राय क्रुध्यति द्रुह्यत्यमित्रायेर्ष्यति द्विषे ।
धनिभ्योऽसूयते रिक्तः पुष्पेभ्यः स्पृहयत्यपि ॥ १०२
द्वितीयैव विभक्तिः स्यादभिपूर्व-क्रुधद्रुहोः ।
अभिक्रुध्यत्यसौ शत्रूनभिद्रुह्यत्युपागतान् ॥ १०३
रुच्यर्थानां प्रीयमाणे चतुर्थी विहिता यथा ।
मधुरं रोचते मह्यमम्लमस्मै तु रोचते ॥ १०४
श्लाघ-ह्नुङ्-स्था-शपामर्थं यस्मै ज्ञापयितुं श्रमः ।
चतुर्थी विहिता तत्र तदुदाहरणं यथा ॥ २०५
स्वामिने श्लाघते भृत्यः प्रत्यमित्राय निह्नुते ।
कामिने तिष्ठते वेश्या चोराय शपते द्विजः ॥ १०६
विकल्पेन चतुर्थी स्यात् गत्यर्थानां तु कर्मणि ।
चेष्टायां गम्यमानायाम् अध्वशब्दविवर्जिते ॥ १०७
ग्रामाय गच्छति जनो ग्रामं गच्छन्ति वाजिनः ।
अध्वानं याति मनसा गङ्गां यात्यत्र नेष्यते ॥ १०८
अप्राणिषु चतुर्थी स्यान्मन्यकर्मण्यनादरे ।
तृणाय मन्यते शत्रून् तृणं वा मन्यते नृपः ॥ १०९
उत्पातैर्ज्ञाप्यमानेऽपि चतुर्थी तदुदाहृतिः ।
वाताय कपिला विद्युदातपायातिलोहिनी ॥ ११०
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ।
चतुर्थ्यर्थो मया प्रोक्तः पञ्चम्यर्थोऽथ कथ्यते ॥ १११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमी स्यादपादाने वृक्षात् पर्णं पतत्यधः ।
यतो वियोगः कस्यापि तदपादानकारकम् ॥ ११२
यतो यत् किञ्चिदादत्ते यतोऽपैति यतो भयम् ।
यतः पाति यतोऽनिष्टादिष्टाद्वा प्रतिषेधते ॥ ११३
यतः पराजयोऽसह्यादन्तर्धत्ते च जायते ।
अधीते वा प्रभवति प्रमाद्यति जुगुप्सते ॥ ११४
यतो विरामो भीत्रार्थं पर्य्यायेष्वपि दृश्यते ।
निषङ्गाच्छरमादत्ते प्रयाति स्वगृहाद्बहिः ॥ ११५
वटुर्बिभेत्युपाध्यायाद् बौद्धेभ्यो रक्षति श्रुतिम् ।
गां वारयति सर्पेभ्यः पङ्कादश्वं निषेधति ॥ ११६
पराजयते धूमादन्तर्धत्ते वधूर्जनात् ।
शरीराज्जायते रक्तम् अधीते स्वगुरोः श्रुतिम् ॥ ११७
पर्वतात्प्रवहत्यम्बु प्रमाद्यति जलौकसः ।
वाताज्जुगुप्सतेऽत्यन्तमधर्माद्विरमत्यसौ ॥ ११८
पञ्चम्येव भवत्यत्र ल्यब्लोपे तस्य कर्मणि ।
मञ्चाद्वीक्षत इत्यत्र मञ्चमारुह्य वीक्षते ॥ ११९
आडम्बरान्नृपोऽभ्येति बालो बाष्पात्प्ररोदिति ।
अन्येतराराद्‌राजाद्विकालदिग्देशवाचिभिः ॥ १२०
अञ्चूत्तरपदैर्योगे पञ्चमी स्यादृते-युते ।
अन्यः पिशाचाद्वेतालो राक्षसादितरोऽसुरः ॥ १२१
नृपाद्विलक्षणो मन्त्री भिन्नः कुम्भाद्घटस्तथा ॥ १२२
गृहाद्‌दाराज्जलं पूर्णम् आराद्दूरान्तिकार्थकम् ।
दक्षिणा पर्वती ग्रामादुत्तराहि महानदी ॥ १२३
ग्रीष्मात्पूर्वो वसन्तः स्यात् वत्सरात् प्राङ्मरिष्यति ।
पूर्वा दिशः प्रतीचीयं पूर्वदेशादसौ परः ॥ १२४

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-

परिषदस्त्रयोदशवर्षीय-कार्य्यविवरणम्

[निबन्धकः—परिषत्-सम्पादकः डक्टर श्रीअमरेश्वरठाकुर-
वेदान्तशास्त्री एम्. ए. पि. एइच् डि]

"तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे।
यत्प्रसादात् प्रलीयन्ते मोहान्धतमसच्छटाः॥"

निखिलचराचरस्थितिर्यस्य खलु सर्वशक्तिमतो महिमानमुद्घोषयति, तं परमात्मानं परदेवं भूयोभूयः संस्मरन् कृपयात्रोपस्थितान् सभाजनान् यथायोग्यं प्रणाम-नमस्कार-सादरसम्भाषणादिभिः सम्भावयन् परिषत्प्राणभूतयोः स्वर्गतयोः सम्पादकचरयोर्वियोगेन नितरां व्यथितायां वत्सराधिककालं मयि न्यस्तभारायां अस्यास्त्रयोदशवार्षिककार्य्यविवरणं माननीय-सभापतिमहोदयस्य तथा भवतामाज्ञया समासतो वाचयिष्यामि।

मान्याः सामाजिकाः, अद्य तावत् प्रथममेवायाति मनसि संहारलीलैकरसिकस्य दक्षिणाशाधिपतेरदक्षिणस्य गोष्पति-पशुपति-ग्रहणेनापि तृप्तिमनापन्नस्य दुरन्तकृतान्तस्य क्रूरहस्तन्यासः परिषदि। ये खलु वदान्यप्रवराः सत्कार्य्यैदीक्षितैकजीवना उत्तरकलिकातावासिनां परमवलम्बनमासंस्तेऽपि उदारधियो विद्वद्वर्य्या ललितकुमारमित्रमहोदयाः परिषत्परिपोषकाणामग्रेसराः पशुपतिप्रीतिमनुस्मरन्त इव पशुपतिमेवानुससुः। तेषां महाप्रयाणेन वयं परं सन्तापमधिगताः, परिषदपि नितरां हानिग्रस्ता इत्यत्र किमधिकं ब्रवीमि। तथापि जगतो दुरतिक्रमां नियतिमनुचिन्तयन्नेव शोकभारं लघूकृत्य कथञ्चिदिव कृत्यपदेषु मनो नियोजयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

विगतवर्षीयेषु परिषत्कार्य्येषु आदावेव समुल्लेखमर्हन्ति वार्षिक-सभाकृत्यजातानि । द्वादशवार्षिकमहोत्सवः खलु विगते वर्षे सौर-भाद्रस्य तृतीयदिवसे अत्रैव भवने सुसम्पन्नः सञ्जातः, तत्र कल्याण-मूर्त्तीनां विद्वत्सु प्रथितयशसां संस्कृतशास्त्रेषु श्रद्धासम्पन्नानां प्राड्-विवाकपदवीमारूढानां श्रीमतां द्वारिकानाथमित्र एम्. ए. डि. एल्. महोदयानामाध्यक्ष्यमासीत् । गीर्वाणवाणीसेवापरायणानाम् अन्येषाञ्च बहूनामेव गुणमानसम्पन्नानां प्रधानपुरुषाणां समागमेन सभा किमपि सौष्ठवं गौरवं वैशिष्ट्यञ्च समाधत्त । सभापतेर्वरणादूर्द्ध्वमेव सङ्गीत-कला-पारङ्गमः श्रीमान् विष्णुपददत्तमहोदयः संस्कृतोपनिबद्धोद्बोधन-सङ्गीतेन सामाजिक-वृन्दानां मनोरञ्जनं चकार । ततो वर्त्तमानसम्पा-दकेन वार्षिकविवरणे पठिते परिषत्सर्वस्वभूतानां परिषदोऽन्यतर-सम्पादकानां पशुपतिप्रतिमानां डाक्तार-पशुपतिनाथशास्त्रिमहोदयानां तैलचित्रं सभापतिमहोदयेन प्रतिष्ठापितमासीत् । ततो नूतनवर्षीय-कार्य्यकारकाणां नामानि श्रीमच्चिन्ताहरणकाव्यतीर्थेन वाचितानि । ततः परिषत्सदस्यानां कलिकाता-राजकीय-संस्कृत-महाविद्यालयस्य धर्मशास्त्राध्यापकानां सुपरिशीलितनिगमागमानां श्रीमतां शितिकण्ठ-वाचस्पतिपादानां महामहोपाध्यायेत्युपाधिप्राप्तिं निमित्तीकृत्य तथा सुधीप्रवराणां देशहितेषु प्रयत्नपराणां श्रीमतां बद्रिदासगोयेन्का-महाभागानां सि. आइ. इ. इत्युपाधिप्राप्तिं निमित्तीकृत्य अभि-नन्दने सञ्जाते । ततः सभापतिमहोदयैः सुललित-भाषयाऽभिभाषणं कृतम् । प्रसङ्गतस्ते म्याट्रिकुलेशनपरीक्षायां संस्कृतस्य नियत-परीक्ष-णीयत्वमवश्यमेव शिक्षाधिकृतैरङ्गीकर्त्तव्यमिति मतं सुदृढं प्राची-कशन् । संस्कृतस्यावश्य-पाठ्यत्वं निराकृत्य यदि ऐच्छिक-पाठ्यत्वं व्यवस्थाप्येत, तदा शिक्षायाः सम्पूर्णता न स्यात्, धर्मस्यापि नितरां हानिरेव सञ्जायेत इत्यपि तैः सभापतिमहाभागैः सयुक्त्युपन्यासमुक्तम् । अतः परं परिषत्सदस्यैर्महाकवि-भवभूतिविरचितमुत्तररामचरितं

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम नाटकं बोधायन-कृतञ्च भगवदज्जुकीयं नाम प्रहसनम् अभिनीतं । सुविहित-प्रयोगतया अभिनयस्तावत् सर्वथा सामाजिकानां मनो जहार । अत्र प्रतिपात्रं यत्नाधानं कृतवन्तो नाट्यसम्पादकाः श्रीमन्तो जगन्मोहन-ज्योतिर्विनोद-महोदयाः श्रीमन्तो वामापद-विद्यारत्न-महोदयाश्चास्माकं हार्दिक-साधुवादभाजो भवन्ति ।

सभ्यमहोदयाः ! परिषदियं सुरभारतीप्रणयिनां तथा अन्येषामपि प्राच्यतत्त्वानुसन्धान-तत्पराणां विदुषां कृपादृष्टिलाभे समर्थास्ति इत्यस्माकं महत्प्रमोदस्थानम् । विगतवर्षस्य प्रारम्भ एवासीदेकदा परिषद्-गृहे दिगन्तविश्रुत-प्रकर्षाणां पण्डितप्रकाण्डानामपूर्वः समवायः । तत्र कृपया समागता आसन् महामहोपाध्यायपदभाजः श्रीमन्तः पञ्चाननतर्करत्नाः, द्राविडाः श्रीमन्तो लक्ष्मणशास्त्रिणः, श्रीमन्तो वामाचरणन्यायाचार्य्याः, श्रीमन्तः पार्वतीचरणतर्कतीर्थाः, श्रीमन्तः कृष्णचरणतर्कालङ्काराः, श्रीमन्तस्सखण्डीचरणस्मृतिभूषणाः, श्रीमन्तो दुर्गाचरणसांख्यवेदान्ततीर्थाः, श्रीमन्त आशुतोषशास्त्रिणः, श्रीमन्तो भागवतकुमारशास्त्रिणस्तथा अन्ये शास्त्रानुशीलनतत्पराः संस्कृत-रसज्ञाः पण्डितवर्य्याः । सर्वतन्त्रस्वतन्त्राणां श्रीमतां पञ्चानन-तर्करत्नपादानां 'महामहोपाध्याय' विरुदप्राप्तिं समुद्दिश्य परि-षत्पक्षतस्तेषामभिनन्दनं कृतमासीत् । सर्व एव ते विद्वांसः परि-षत्कार्य्यजातानि संवीक्ष्य नितरां हर्षमेव प्रकटयामासुः ।

'दीघापतिया' राजवंशप्रदीपो वरेन्द्रानुसन्धानसमितेः प्रतिष्ठापकः कुमारनिभः श्रीमान् शरत्कुमाररायः एम्. ए. महोदयः परिषदि शुभागमनं कृत्वा दृष्ट्वा चास्याः कार्य्यपद्धतिं परामिव मुदं प्रकाशयामास ।

प्रत्नतत्त्वाविष्कार-पटवः 'फ्रान्स'देशीय-पण्डितप्रवराः श्रीमन्तः 'सिलभाँ-लेभि'-महोदयाः सपत्नीकाः कृपया परिषदि समागत्य, अस्या उद्देश्यजातानि परिज्ञाय दृष्ट्वा च ग्रन्थागारं विशेषतोऽस्य हस्तलिखित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकानि परां प्रीतिमन्वभवन्। महाकवि-भासविरचितं मध्यम-व्यायोगाख्यं नाटकं परिषत्सदस्यैरभिनीतं दृष्ट्वा परिषदा कृताभिनन्दनास्ते परिषत्कार्य्याणां भूयसीं प्रशंसां कृतवन्तः।

राजकीयशिक्षासचिवाः 'ब्राश'महोदयाः वारद्वयं परिषदि शुभागमनं विधाय परिषत्प्रीतिं सम्यक् प्रकटयामासुः। द्वितीये वारे तद्भगिनी तत्पत्नी च तैः साकं समागते।

'आसियाटिकसोसाइटी' इत्याख्य-सभायाः सम्पादका 'ब्यानर्ज्यानेन'-महोदयास्तथा संस्कृतकाव्यानुशीलनरसिकाः काव्यलेखनचतुराः 'विभार'महोदयाश्च कृपया समागतवन्तः। परिषत्सदस्यैरभिनीतं रूपकं सन्दृश्य सर्व एव ते संहृष्टमानसाः सञ्जाताः।

विगतवर्षे सौरपौषस्य प्रथमे भागे महामान्यानाम् अनन्तशयना-धीश्वरीणां तथा मान्द्राजप्रदेशवास्तव्यानां व्यवहाराजीवप्रकाण्डानां सार सि. पि. रामस्वामी-आयार-महोदयानां तथाऽन्येषाञ्च केषाञ्चन प्रधानपुरुषाणां परिषदि शुभागमनं सञ्जातम्। सर्वे एव ते अभिनन्दिताः सन्तः परिषत्कृत्यजातानि तथाऽभिनयञ्च प्रत्यक्षीकृत्य तुष्टमानसा अस्याः पुष्टिमेवाशशंसिरे।

विगते वर्षे कार्य्यकारिण्याः समितेर्द्वादशसंख्याकान्यधिवेशनानि सञ्जातानि। अस्यां समितौ ये तावत् कार्य्यपटवः स्वातन्त्र्यशालिनः सदस्या वर्त्तन्ते तेषामनेक एव समागत्य सुमन्त्रणादिभिः कार्य्यजातं सम्पादयामासुरिति तेषामहमान्तरिकान् साधुवादान् विज्ञापयामि।

समागताः सुधियः! परिषद उद्देश्यं खलु ज्ञातमेव भवद्भिः। वर्त्तमानयुगे नवभावदीक्षिताः केचन सन्ति, येषां मते पुरातनस्य स्थानमाधुनिकनये नास्त्येव। सर्वं यत् पुरातनं तन्निराकर्त्तव्यं, नवीनमेव साधु तदेव सर्वथा प्रवर्त्तयितव्यमित्येव तेषां मतनिष्कर्षः। 'पुराणमित्येव न साधु सर्वं'मिति वाक्यस्य सत्यत्वे वयं न सन्दिहानाः, किन्तु पुराणमित्येव वर्जनीयमित्यत्राप्यस्त्यस्माकं महती विप्रतिपत्तिः। कीदृशं पुराणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्जनीयं, कीदृशं वा रक्षणीयं, कार्त्स्न्येनैव पुराणं वर्जनीयं न वा इत्येतेषां विषयाणां विचारणात् प्राक् पुराणन्तावत् किं-स्वरूपं तदेव परीक्षणीयम्। एतत् पुनः पुरातनशास्त्रनिबद्धवस्तुप्रकाशनेनैव सम्भवेत्। तदपि संस्कृतशिक्षां तद्विस्तारञ्चापेक्षते। अस्य कार्य्यस्य भारः संस्कृतसाहित्यपरिषदा परिगृहीतः। अतः परिषदुद्देश्यं खलु संस्कृतशिक्षाप्रभावविस्तार एव। स च तथ्यपूर्णानां निबन्धानां रचनेन, तद्बहुल-पत्रिका-प्रकाशनेन, लुप्तप्रायाणां संस्कृतग्रन्थानां रक्षणेन, पूर्वं कदापि प्रकाशमनापद्यमानानां प्रकाशनेन, मुद्रितानां ग्रन्थानां संग्रहेण, संस्कृतविद्यालयस्थापनेन, आहार-वासस्थान-पुरस्कारादिना संस्कृतशिक्षार्थिनामानुकूल्यं विधाय तेषामध्यापनेन, संस्कृतरूपकाभिनयेन च सम्भवतीति एतान्येव कार्य्यजातानि परिषदः कर्त्तव्यतया निर्धारितानि वर्त्तन्ते।

आलोच्ये वर्षे अनेक एव शास्त्रानुसन्धानचतुराः संस्कृतरसज्ञाः परिषत्प्रणोदिताः सन्तो निबन्धान् रचयामासुः। तेषां तेषां निबन्धानामनेक एव परिषदः साधारणाधिवेशनेषु पठिताः परिषत्प्रकाशितपत्रिकायाञ्च निवेशिताः। साधारणसभाश्च एकादशसंख्याः सञ्जाताः। अधोलिखित-निबन्धाः पार्श्वलिखितनामभिः पण्डितवर्य्यैर्निबद्धाः पठिताश्चासन्।—

	निबन्धः	रचयिता
१। प्रथमाधिवेशने	पूर्वोत्तरमीमांसायाः सम्बन्धः	श्रीमदशोकनाथभट्टाचार्य्यः एम्. ए.
२। द्वितीयाधिवेशने	योगमार्गः	श्रीयुक्त-जानकीनाथसाहित्य-शास्त्री
३। तृतीयाधिवेशने	भाषारत्नम्	„ कालीपद-तर्काचार्य्यः
४। चतुर्थाधिवेशने	स्वत्वसमुत्पादः	„ अमरेश्वरठाकुरः
५। पञ्चमाधिवेशने	संस्कृतवर्णलेखविमर्शः	„ वसन्तकुमारराय-विद्यारत्नः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६। षष्ठाधिवेशने	यमपुरीपर्य्यटनम्	,,	वेणुधर-तर्कतीर्थः
७।८। सप्तमाष्टमाधिवेशनयोः	हर्षचरितम्	,,	विष्णुपदभट्टाचार्य्यः बि.ए.
९। नवमाधिवेशने	संहितायां ब्रह्मचर्य्यम्	,,	शिवशास्त्री
१०। दशमाधिवेशने	सरस्वतीमूर्त्तितत्त्वम्	,,	अमूल्यचरणघोष-विद्याभूषणः
११। एकादशाधिवेशने	बोपदेवकृता मुग्धबोधटीका	,,	चिन्ताहरणचक्रवर्त्ती काव्यतीर्थः एम्. ए.

परिषदो हस्तलिखितपुस्तकविभागे सार्धद्विसहस्राधिका ग्रन्थाः संगृहीता वर्त्तन्ते। गतेऽपि वर्षे साकल्येन किञ्चिदून-सार्धद्विशत-ग्रन्थानां संग्रहो जातः। नवद्वीपवास्तव्यानां वैयाकरणकेशरिणां स्वर्गतानां शिवनारायणशिरोमणि-महोदयानां यानि पुस्तकान्यासन् तानि सर्वाण्येव तस्य सुयोग्य-पौत्रेण बि. ए. इत्युपाधिधारिणा श्रीमदनादिनाथ-भट्टाचार्य्येण परिषदे समुपहृतानि। 'रङ्गपुर'ख्यस्थानात् श्रीयुक्त-कालीचरणभट्टाचार्य्य-महोदयस्य साहाय्येन पञ्चाशदधिकानि पुस्तकानि प्राप्तानि। श्रीयुक्त-वैकुण्ठकुमार-व्याकरणतीर्थ-महोदयस्य प्रयत्नेन 'फरिदपुर' सामन्तसाराख्यस्थानात् श्रीमतां रामप्रसादसमाजदार-महोदयात् पञ्चाशदधिका ग्रन्था लब्धाः। सर्वेभ्य एव एतेभ्यो महानुभवेभ्यो भूयोभूयो धन्यवादान् कृतज्ञताञ्च विज्ञापयामः। प्रसङ्गत एतद्वक्तव्यं यत्, कानिचित् परिषत्संगृहीत-हस्तलिखितानि पुस्तकानि अवलम्ब्य केचन निबन्धा रचिता वर्त्तन्ते। तेषु 'बोपदेवकृता मुग्धबोधटीका' इतिशीर्षको यो निबन्धः श्रीमच्चिन्ताहरणकाव्यतीर्थेन निर्मितो वाचितश्च परिषत्-साधारणसभायां, तस्यालम्बनं खलु तन्नामक-परिषद्ग्रन्थ एव। परिषद्ग्रन्थालय-रक्षित-चित्रचम्पूनामानं ग्रन्थमवलम्ब्य 'वाङ्गलाय वर्गीर हाङ्गामार प्राचीनतम विवरण' इतिशीर्षको निबन्धस्तथा 'कालिकामङ्गलाख्य" वङ्गभाषामयं ग्रन्थमवलम्ब्य 'विद्यासुन्दरेर उपन्यास ओ कविशेखरेर कालिकामङ्गल' इतिशीर्षको निब-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यस्य वङ्गभाषया तेनैव रचितौ। प्रबन्धद्वयं वङ्गीयसाहित्यपरिषत्पत्रिकायां प्रकाशितं वर्त्तते।

मुद्रितपुस्तकविभागेऽपि वयं न शिथिलप्रयत्ना वर्त्तामहे। तत्रास्माभिर्विगते वर्षे सहस्राधिकमुद्रा व्ययिताः। संस्कृतमहामण्डलाख्यं यत् प्रतिष्ठापत्रं प्रतिष्ठानं वर्त्तते स्म, तस्य द्विशत-संख्यका बहुमूल्या ग्रन्थास्तत्कर्त्तृपक्षीयैः संस्कृतसाहित्यपरिषदे समुपहृताः। एतेन परिषदो मुद्रितपुस्तकविभागस्य महत्येव वृद्धिर्जाता। अस्या वृद्धेर्निदानं खलु पण्डितवर्य्याणां श्रीमतां कृष्णचन्द्रस्मृतितीर्थ-महाभागानाम् अकपटप्रयत्न एव। श्रीमन्तो वसन्तकुमाररायविद्यारत्न-महोदया अपि चत्वारिंशत्संख्यकानमूल्यग्रन्थान् कृपया परिषदे अर्पितवन्तः। सर्व एव ते परिषत्परिपुष्टिप्रयत्नपरा महात्मानोऽस्माकं हार्दिकान् धन्यवादानर्हन्ति।

मुद्राप्यमाणेषु ग्रन्थेषु छान्दोग्यभाष्यं नाम कर्म्मकाण्डग्रन्थः 'स्कटिशचार्च'कलेजाध्यापक-श्रीमद्दुर्गामोहनसांख्यतीर्थ एम्. ए. महोदयेन सम्पाद्यमानः सम्पूर्णप्रायो वर्त्तते। नव्यन्यायग्रन्थस्य 'भाषारत्नस्य' च समधिकांशस्य सम्पन्नं मुद्रापणम्। 'आनन्दलतिकाया' अपि अर्धपरिमितांशो मुद्रितः। आशास्महे सर्व एव ग्रन्था वर्त्तमानवर्षाभ्यन्तर एव सम्पूर्णतां यास्यन्तीति। परिषत्प्रकाशितानां ग्रन्थसमूहानां देशीयेषु विदेशीयेषु च पत्रिकानिवहेषु प्रशंसामतिमात्रां पश्यामः। पवनदूतग्रन्थस्य विविधतत्त्वपूर्णस्य मुखबन्धस्य सारांशः हिन्दीभाषया परिणम्य श्रीमता बलदेवोपाध्यायेन "कोशोत्सवस्मारकसंग्रह" नाम्नि ग्रन्थे प्रकाशितः। मुद्रापणार्थमस्माभिः साम्प्रतं सप्तसंख्यका ग्रन्था गृहीता वर्त्तन्ते। तेषु रामायणाख्यो ग्रन्थः प्राधान्येन समुल्लेखमर्हति। जानन्त्येव भवन्तो यत् वङ्गदेशीयपाठमुपजीव्य मुद्रितं रामायणमधुना दुष्प्रापमेव। बहोः कालात् पूर्वं 'गोरेसियो' नामा कश्चित् इटालीदेशीयपण्डितस्तद्देशीयभाषोपनिबद्धभूमिकासहितं रामायणं मुद्राप्य प्राका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शयत्। तत् खलु वङ्गदेशीय-पाठावलम्बनेन सम्पादितमासीत्। ततः परं पुण्यक्षेत्रे वाराणस्यां वङ्गदेशीय-पाठसमन्वित-रामायणप्रणयने केषाञ्चन पण्डितानां चेष्टा प्रावर्त्तत। सा खलु चेष्टा न सफलतां गता। वङ्गीयानामस्माकं वङ्गदेशीयं रामायणं नास्तीति नास्माकं गौरवायेति मन्यमानैरस्माभिः रामायण मुद्रापण-कार्य्यं समारब्धम्। सम्पादनभारस्तु श्रीमदक्षय कुमारशास्त्रि- श्रीमत् कालीपदतर्काचार्य्य-श्रीमत् कृष्णचन्द्र-स्मृतितीर्थ-श्रीमद्-वागीश्वरकाव्यतीर्थ-श्रीमच्चिन्ताहरणकाव्यतीर्थ एम्. ए. श्रीमज्ज्ञानकीनाथसाहित्य-शास्त्रिषु तथा प्राधान्येन महामहोपाध्याय-श्रीयुक्त-दुर्गाचरण-सांख्य-वेदान्ततीर्थेषु महामहोपाध्याय-श्रीयुक्त-भागवतकुमार-शास्त्रिमहोदयेषु च न्यस्तः। एतत्तु महान्तमर्थव्ययमपेक्षते। ब्राह्मणपण्डितबहुलाया दरिद्रभूयिष्ठायाः परिषदः स न सम्भवेदतो भवन्तोऽत्र दत्तदृष्टयो भवन्त्विति सानुनयं प्रार्थयामहे।

बहुषु शास्त्रेषु सुकृतपरिश्रमाणां धीरमतीनां पूतचरितानां श्रीमतां कालीपद-तर्काचार्य्य-महाभागानामाध्यक्ष्येण परिषद्विद्यालयः सुष्ठु प्रचलति। संस्कृतविद्यालयस्योन्नतिविधानं यादृशमर्थमपेक्षते तादृगस्माकं नास्ति। अवस्थाप्रातिकूल्येऽपि अस्माभिर्विद्यालयविभागेषु सार्धत्रिशताधिका मुद्रा व्ययिताः। अष्टाविंशतिसंख्यकाश्छात्राः परिषद्विद्यालये अध्यापितास्तेषु सप्तसंख्याका विभिन्नशास्त्रेषु परीक्षां दत्तवन्तः, षट्संख्यकाः समुत्तीर्णाः। स्थानाभावात्तथाऽर्थाभावाच्छात्राणाम् आहारवासस्थानादि-दानविधौ समीचीनव्यवस्थाकरणेऽसामर्थ्यमेव विद्यालयोन्नतिप्रतिबन्धहेतुभूतमित्यस्माकं महद्दुःखकारणं संस्कृतशिक्षापक्षपातिनाम्।

पूर्वेष्विव वर्षेषु विगतेऽपि वर्षे संस्कृतभाषामयी परिषत्पत्रिका यथाकालं प्रकाशमापद्यमाना सहृदयानामानन्दवर्धने समर्थासीदिति परिषत्पक्षपातिनां गौरवाय एव। आशास्महे यत् श्रीमतां कालीपद-तर्काचार्य्यप्रवराणां सम्पादकत्वेनास्याः क्रमोन्नतिर्भविष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतन्मया सानन्दं विज्ञाप्यते यत् परिषत्पत्रिकायां प्रकाशितः श्रीमच्चिन्ताहरणकाव्यतीर्थ एम्. ए. महोदयेन लिखितो 'दूतकाव्य'-मितिशीर्षको निबन्धः तैलेगुभाषयानूदितः तैलेगुपरिषत्पत्रिकायां प्रकाशं नीतः, एतच्च संस्कृतसाहित्यपरिषत्पत्रिकाया विशेषतो निबन्धकर्त्तुर्गौरवमेवोद्घोषयति।

समवेताः सभ्यमहोदयाः! विदितमेव भवतां राजकीयं साहाय्य-मेव परिषदः प्रधानमालम्बनमिति। अधिकारवन्तो राजपुरुषाः परिषद उपयोगितामङ्गीकुर्वन्तः प्रतिवर्षमेव साहाय्यानि दत्त्वा अस्माकं कृतज्ञताभाजनं वर्त्तन्ते। अस्माकं दौर्भाग्यं यदालोच्ये वर्षे साहाय्यस्य न्यूनत्वं सञ्जातम्। पूर्वेषु वत्सरेषु साहाय्यस्य परिमाणं त्रिसहस्रमुद्रा-पर्य्यन्तमासीत्। आलोच्ये वर्षे सहस्रमुद्रात्मकं साहाय्यमस्माभि-र्लब्धम्। अस्माभिः सबहुमानमशेषकृतज्ञताप्रकाशपुरःसरञ्चैतद् गृहीतम्।

एतत्तु राजकोषाधिकृतानां प्रधानपुरुषाणां सविधे निवेद्यते, साहाय्यस्य न्यूनीकरणेनास्माकं महती भीतिश्चिन्ता च सञ्जातेति। न्यूनीभूतेन साहाय्येन कथं वयं कार्य्यजातं साधयितुं शक्नुम इति वयं प्रार्थयामहे यत् सानुग्रहास्ते पूर्वानुरूपसाहाय्यं दत्त्वा परिषत्-पुष्टिं विदधत्विति।

ग्रन्थागारोन्नतिविधये सार्धषट्शतपरिमिता मुद्रास्तथा विद्यालय-रक्षणविधये सार्धद्विशतमुद्राः "कलिकाता-कर्पोरेशना" ख्यच्चैः साहाय्य-रूपेण परिषदे प्रदत्ताः। तेभ्यो वयम् अशेषान् धन्यवादान् आन्तर-कृतज्ञताञ्च ज्ञापयामः।

विगते वर्षे 'दीघापतिया' राजवंशावतंस-श्रीयुक्त-शरत्कुमारराय एम्. ए. महोदयात् मुद्राणां शतं, मल्लिक-कुलालङ्कार-श्रीमज्जितेन्द्रनाथ-मल्लिकमहोदयात् शतम्, अन्येषाञ्च कतिपयोदारचरितानां महात्मनां सकाशात् समष्ट्या प्रायो मुद्राणां द्वे शते एककालीन-वृत्तिरूपेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदा लब्धानि। तेभ्यो वदान्यवरेभ्योऽशेषान् धन्यवादान् विज्ञाप्य प्रार्थ्यते यत् एतादृशी अनुरक्तिः परिषदं प्रति रक्षणीयेति।

सभ्यमहाभागाः! परिषदवस्था भवत्सविधे मया समासतः समालोचिता। परिषदि कार्य्यकारका बहवः सन्ति, अर्थाभाव एवास्या बहूनि कार्य्याणि व्याहन्ति। भवन्तश्चेत् सानुग्रहास्तर्हि सर्व एव विघ्ना दूरीभविष्यन्ति, परिषदप्युन्नतिमार्गमधिगमिष्यति। भवतामानुकूल्ये नैवास्माकं शक्तिवृद्धिर्भविष्यति। अन्ते च पुनरपि कृपया समागतानत्रभवतः सभाजनान् सादरं सम्भाष्य यथायोग्यं नमस्कृत्य प्रणम्य च विरमामः। इति शम्।

रजनी

(पूर्वतोऽनुवृत्ता)

[निबन्धिका—श्रीमती रेणुदेवी]

वाञ्छारामस्यापि तस्मिन् स्नेहातिशयः सर्वातिशायिनम् अपत्यस्नेहमप्यतीत्य वर्त्तमान आसीत्। निर्गते च तस्मिन् तनयं प्रति तस्य रोषातिशयः सुतरां प्रावर्द्धत। तेन च सीमानमपत्यस्नेहस्यातीत्य वर्द्धमानेन रोषातिशयेनाक्रान्तः समुद्गीर्णवान् बहूनि कर्णकटूनि तिरस्कारवचनानि। न च पुत्रोऽपि पितरि भक्तिप्रकर्षेण तानि निःशब्दं सेहे। एवञ्च पितापुत्रयोः प्रवर्द्धमानस्य कलहस्य फलमेतावदेव बभूव, यत् पित्रा गृहान्निष्कासितस्तनयो "न भूयः पितृभवने मुखं दर्शयिष्यामो"ति दृढ़प्रतिज्ञो निर्जगाम। कोपातिशयविकृतचित्तवृत्तिः पितापि प्रणिनाय चरमाभिलाषपत्रमेकम्। तत्रैवमासीत् समयः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाञ्छारामभित्रे मृते तदात्मजो रामसदयः कदापि न पितृरिक्थं लप्स्यते। किन्तु मनोहरदास एव तत्राधिकारी। तदभावे च तस्य दायादा एव दायमेतं निर्हरेयुः। तेषामभावे च रामसदयस्य पुत्रादय एव धनाधिकारिणः, किन्तु कदापि न रामसदय" इति।

रामसदयोऽपि पितृभवनमपहाय प्रथमां स्त्रियमादाय कलिकाता-नगरीमाससाद। आसीच्च तस्याः पितृप्रदत्तं धनं किञ्चित्। तदेव सारभूतमवलम्बमानः कस्यचित् सुजनताभृतो वैदेशिकस्य वणिज आनुकूल्येन वाणिज्ये प्रावर्त्तत। प्राप च प्रसादपात्रतां पद्मालयायाः। नान्वभूच्च दुःखलवमपि धनाभावनिदानम्।

पितुरपि स्वबुद्धिनैपुण्यविहितधनसञ्चयं सुखेनैवावस्थितं तनय-माकर्णयतो नोपशशाम कोपदहनः। प्रत्युत योपि स्नेहलवावशेष आसीत् सोऽपि शनैः शनैर्विशुष्कतामयासीत्। तातेन सस्नेहमाहूत एव गमिष्यामि, नान्यथेत्यभिमानवता तनयेन पितुः कश्चिदपि सन्देशो न संगृहीतः। भक्तिहीनतया मामवज्ञायैव पुत्र एवं व्यवहरतीति मन्यमानो वाञ्छारामोऽपि तं भूयो नाजुहाव, एवं द्वयोरनुपशान्त एव रोषपारुष्ये न परिवर्त्तिते च चरमाभिलाषपत्रे सहसा पुरन्दर पुरा-तिथित्वमवाप वाञ्छारामः। शोकजालाकुलितचित्तो रामसदयोऽपि कथं मया तातस्य देहवियोगात् प्रागेव न कृतः साक्षात्कारः, कथं वा प्रयत्नेन नापनीतस्तस्य रोषसञ्चयः, न वा सम्पादितः कर्त्तव्यनिवह इति सुतरां खिन्नेन मानसेन चिराय रुरोद। कलिकातायामेव च निष्पा-दयामास पितुः पारलौकिकं कर्म्म। न च भूयो भवानीनगरं प्रत्या-जगाम। सर्वञ्च तत्रत्यमिदानीं मनोहरदासगामि बभूव।

मनोहरदासस्य स्थिति-पदमपि तदापि न केनापि विदितमासीत्। न च जीवतापि वाञ्छारामेण प्रयत्नेनापि लब्धा तस्य कापि प्रवृत्तिः। तेन भवानीनगरात् यद्गतं तद् गतमेव। वाञ्छारामो बहु समन्विष्यापि यदा न प्राप तस्य काञ्चन वार्त्तां तदा चरमपत्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रोड़पत्रमेकम् प्रास्तौषीत्। तत्र च कलिकातावास्तव्यं विष्णुरामं नाम कञ्चन सम्बन्धिनं कार्य्यसम्पादकं विधाय कृतवान् एवं समयम्— विष्णुराम एव सप्रयत्नं मनोहरदासम् अन्विष्य तदन्वेषणफलानुसारेण यथादायादं सम्पदं विनियोजयिष्यतीति। मृते च वाञ्छारामे सोऽतिशयेन विचक्षणो निरपेक्षः कर्म्मकुशलश्च विष्णुरामो महता परिश्रमेण धनव्ययेन च मनोहरदासमनुसन्धाय वाञ्छारामेण प्रयत्नेनाप्यनाविष्कृतपूर्वं निगूढ़ं तथ्यमिदमाविश्चकार, यथा मनोहरदासो भवानीनगरादपसृत्य सपरिवारः कञ्चन कालं पूर्ववङ्गमध्युवास। तत्र च धनाभावात् क्लिश्यन् प्रजीवनाय जलवर्त्मना कलिकातां प्रत्यावर्त्तमानो वात्याहत-क्षुभित-नदीनिमग्ननौकः सपरिवार एव जीवनं तत्याज। न च तस्य कश्चिदुत्तराधिकारी क्वचिदस्तीति केनापि ज्ञायते। विष्णुरामेण सर्वमिदम् अखण्ड्यप्रमाणप्रमाणीकृतं रामसदयाय प्रदर्शितम्। ततः शचीन्द्रनाथो भ्राता च तस्य धनाधिकारिणौ जातौ। विष्णुरामोऽपि वाञ्छारामनिर्द्धारितं समयमनुसरन् तयोर्हस्तगतां सम्पदमकरोदिति। अथेदानीं यदि जीवति रजनी, येयमधुना सम्पदुपभुज्यते रामसदयेन, तयैव तदधिकारिण्या भूयते। क्लिश्नाति च सा दारिद्र्येण, अतो युज्यते मे तदनुसन्धानम्। न चान्यदस्ति मे किञ्चिदपि कर्म्म।

अथ वङ्गविषयमुपेतः कदाचिदेकेन ग्राम्यसम्बन्धवता निमन्त्रितस्तत्र गत आसम्। प्रातश्च तस्मिन्नितस्ततः परिभ्रमन् क्वचिदेकं निभृतमरण्यमपश्यम्। मधुरं कूजन्तो वनविहङ्गमाः समस्वरसंयोगेन विचित्रमैक्यतानमिव कर्त्तुं प्रवृत्ताः। समन्ताच्च घनविन्यस्तैः कोमलश्यामलस्निग्धपल्लवदलैः समाच्छन्नाः पादपाः। पत्राणां निरन्तरता संमिश्रणञ्च। श्यामलता प्रियश्चानन्तता। क्वचित् कलिकानां प्राचुर्य्यं, क्वापि विकाशवतां कुसुमानां सम्भारः। क्वचिदपाकानि क्वचन च परिपाकामोदवन्ति फलानि। अथाकस्मादन्तर्वनमत्युग्रमार्त्तनादमाकर्ण्य

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन् वनाभ्यन्तरमवगाहमानः कमपि विकटमूर्त्तिं पुरुषापसदं बलेन कामपि युवतीमाक्रामन्तमपश्यम्। दर्शनमात्रेणैव च तं नीचकुलोत्-पन्नं पाषण्डभावभीषणं डोम्बं वा चाण्डालं वा जात्या, कटितटबद्ध-कर्त्तरिकम् आकृत्या महदन्तर्बलं सूचयन्तमवेदिषम्।

शनैश्च तस्य पृष्ठदेशमुपागतः कटीबन्धात् कर्त्तरिकामपनीय दूरं न्यक्षिपम्। तदा सोऽपि दुष्टो युवतीं तामपहाय मां प्रत्यभिमुखीभूय नीचजनोचितया वाचा निर्भर्त्सयामास। तस्य दृष्टिपातेनैव जाता-शङ्को विलम्बो न विधेय इति मन्यमानः करेण तस्य गलदेशमगृह्णाम्। सोऽपि तदाक्षिप्य मामाक्रामत्। अहमपि तत्र प्रतिक्रियायां प्रवर्त्त-मानः समधिकं बलं बिभ्रतोऽपि तस्माद् भीतिं नाविन्दम्, न वा स्थैर्य-मजहाम्। लब्धावसरश्च भद्रे द्रुतमपसर, अहमेनं समुचितेन दण्डेन संयोजयामीति तां तरुणीमभिहितवानस्मि। सा प्रत्युवाच कथमेवं सम्भाव्यते नयनहीनाहं, न च परिज्ञातः पन्था इति।

नयनहीनेति प्रहृष्टं मे बलेन। अहं हि रजनीं नाम काञ्चिदन्ध-कन्यकामन्विष्यामि।

अथ स बलवत्तरः पुरुषो बलेन मां प्रहर्त्तुमशक्नुवन्नपि यत्र कर्त्त-रिका तिष्ठति तं देशं प्रत्याचकर्ष। विदिततदभिप्रायेण च मया तमपहाय पूर्वमेव संगृहीता सा कर्त्तरिका। तेन च तरुशाखामेका-मवभज्य तामुद्यम्य च करे मे तथा प्रहृतं यथा ततो विगलिताभूत् सा कर्त्तरिका। स तामादाय त्रिचतुरेषु शरीरप्रदेशेषु मां दृढं प्रहृत्य द्रुतमपससार। अहञ्च—बलवदाहतः कथमपि कुटुम्बभवनं प्रति प्रचलितः। सा च नयनहीना युवती मम पदशब्दमनुसृतवती। ततश्च गन्तुमसमर्थं मां पथिका एव तद्भवनं प्रापयामासुः। तत्र शय्या-शरणः कञ्चन कालमतिष्ठम्। आश्रयान्तराभावेन मम परिणाम-मविदन्त्या गमनमशक्यमिति च हेतोस्तस्या अप्यन्धयुवत्याः तदेव भवनं स्थितिपदं बभूव। एवं बहुषु दिवसेष्वतिक्रामत्सु क्रमेण कृच्छ्रेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोगविनिर्मुक्तोऽहमभवम्। प्रथमत एव तामन्धकन्यकामवलोकयतः सन्देहो मे हृदये पदं निदधे। अतो रोगशयनपार्श्वमुपेतां प्रथममेव तामपृच्छं "किमङ्ग ते नामधेय"मिति। तस्यां च 'रजनी'ति व्याहृतवत्यां चकितोऽहं "किमङ्ग त्वमेव राजचन्द्रदासस्य दुहितासी"ति कृतवान् पुनरपि प्रश्नान्तरम्। विस्मिता सा प्रत्युवाच "किं भवाननवगच्छति मे पितरम्।" अहन्तु स्पष्टतया किमपि प्रत्युत्तरं नाकरवम्।

अथ कलिकातां प्रत्यावर्त्तमानेन मया तस्याः सन्तोषाय न केवलमेकाकिनीं तामेव किन्तु कुटुम्बभवनादेकां प्राचीनां परिचारिकामपि गृह्णता गन्तुमुपक्रान्तेन पथि जिज्ञासितुं प्रक्रान्तम्। "ननु रजनि, कलिकातायामेव निवसन्त्या भवत्याः कथमिह समागमो जातः।" तया प्रत्यभिहितं "किं सर्वं वक्तव्यमेव मये"ति ? मया पुनरपि व्याहृतं, "मैवं, स्वतन्त्रासि प्रत्युत्तरं प्रति" इति तथ्यमेवैतद् यदहमस्या अन्धयोषितः सरलतया बुद्धिप्राखर्य्येण विवेकप्रकर्षेण च विशेषेण प्रीतो न तां क्लेशयितुमलमासं सा तु वक्तुं प्रवृत्ता। "यद्यनुमन्यते भवान् तदाहमंशतो निगूहमाना बाहुल्येन प्रकाशयामि—गोपालो नाम ममैकः प्रतिवासी वर्त्तते। तस्य पत्नी चम्पा नाम। तया सह सहसा मम सञ्जातः परिचयः। ततः कदाचित् तस्याः पितृभवनं प्रति गमने नितरामनुरुद्धाहं तयैव सह तस्या भर्त्तृभवनमुपेतवती। समागतायाश्च गमनवेलायां स्वयं गन्तुमप्रवर्त्तमानया च चम्पया सम्प्रेषितो मया सह तस्या भ्राता हीरालालः। तेन च तरणीयोगेन हुगलीनगरमानीतास्मि इति अत्र चेयं हीरालालसम्बद्धं कञ्चन वृत्तान्तविशेषं निगूहतीति विदिततदभिप्रायेणापि मया पृष्टम्, "अपि तेन सह गमनमनुमतं त्वये"ति ? सा प्रत्यवादीत् "मैवम्। अनिच्छन्त्या अपि मे तेन सह गमनमप्रतिबन्धम् आसीत्। न च तत्र कारणमभिधातुं समर्थास्मि। अथ पथि साधुजनविगर्हितमाचारमारभमाणे माञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र विरोधवतीं मन्यमानो जीवनं मे वियोजयितुं कृतसंकल्पः क्वचन जलवेष्टितायां भूमौ मामवतार्थ्य तयैव तरण्या स प्रतिनिवृत्तः।" इति विरतायाञ्च तस्यां नरच्छद्मना राक्षसोऽयमिति धिया तस्य रूपं परिकल्पयितुं प्रवृत्ते च मयि पुनरपि व्याजहार रजनी। "गते च तस्मिन् उदकप्रवेशेन प्राणान् परित्यजामीति कृतनिश्चया न्यमज्जमुदकेषु"। इति अविरतायामिव तस्याम् अहं प्रावोचम्, "कथमेवं नाम ? किं जनेऽस्मिन्नेतावाननुरागो भवत्याः सम्भूतः" इति। सा सभ्रूभङ्गमभाषत "नहि नहि पृथिव्यामस्यामेकस्मिन्नपि न मे तथा विरागो यथा तस्मिन्" इति। "कथं तर्हि प्रवृत्तासि मर्त्तु"मिति व्याहृतवति मयि "न मे दुःखं भवते कथयितुं शक्यत" इति सा प्रत्युवाच। "वाढ़ं ततः कथये"ति मया साग्रहमभिहिता सा भूयो वक्तुं प्रावर्त्तत। "ततः पयसि निमग्नाहमुन्मग्ना च नावमेकामारुह्य गन्तुं प्रवृत्तैः कैश्चिदवलोकिता समारोपिता च तामेव तरणीम्। यत्र च ग्रामे मया भवदनुग्रहो लब्धः तत्रैवावतरन् कश्चिदारोही कुत्र त्वमवतरिष्यसीति मां पप्रच्छ। यत्रैते मामवतारयिष्यन्ति तत्रैवेति कथयन्तीं मां क्व ते वास इति भूयः समपृच्छत। कलिकातायामिति विदिततत्त्वः स पुरुषः श्वस्तावदहं भूयस्तत्र गमिष्यामि एहि त्वं मयैव सह। तिष्ठ च दिनमिदं ममैव गृहेषु। श्वस्त्वां स्वभवनं प्रापयिष्यामीति प्रोवाच। आनन्देन तमनुसरन्तीं मामादाय स प्रचलितः। तदनन्तरं च प्रवृत्तिजातं भवानेव सर्वं जानाती"ति उक्त्वा सा विरराम। "किं यतो मया परिमोचितासि स एवैष" इति जिज्ञासमाने मयि सा "तथैवे"ति निरदिशत्। अथाहं कलिकातामुपेतस्तया कृतनिर्देशं राजचन्द्रदाससदनमासाद्य रजनीमनयम्। राजचन्द्रोऽपि तनयासन्दर्शनेन सुतरामानन्दितो बभूव। तस्य पत्नी तु क्रन्दितुमारेभे। मत्तश्च तस्याः सविशेषं विदितोदन्तौ मयि विशेषेण कृतवेदितां निवेदितवन्तौ च। ततोऽहं रहसि रामसदयमपृच्छम्, "अपि नाम जानासि ते दुहितुर्गृहपरित्यागनिदान"मिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स प्रत्युवाच "नहि नहि निरन्तरं निपुणं चिन्तयन्नपि नालमस्मि निदाननिर्णये।" मया भूयः पृष्टम्, "अपि जानासि कथं सा पयःप्रवेशेनात्मानं व्यापादयितुं यतमाना बभूवे"ति। तेनापि सविस्मयं प्रत्यभिहितं, "किं तदस्या दुःखं तदपि नावधारयामि। महतो दुःखस्य निदानमपि नयनहीनत्वं कथमेतावतः कालादनन्तरमिमां तथाविधे कर्म्मणि नियोजयतीति न शक्यते सम्भावयितुम्। एतावता वयसापि परिणयो न जात इत्ययमपरोऽपि दुःखहेतुर्नात्र प्रयोजकतामुपयाति, यतः समवधारितपरिणयदिवसात् पूर्वस्यामेव रजन्यां सा गृहादपगते"ति। अश्रुतपूर्वोऽयं वृत्तान्तः। तमहं पुनरपृच्छम्। "भद्र, सत्यमिदं सा गृहात् पलायितेति। किमविदित एवायं वृत्तान्तो युष्माभिः? केन वा सह तस्य परिणयकथा स्थिरीकृता?" मयैवमभिहितः स "सत्यमेव सा पलायितेति, न चेदं मया वा तस्या जनन्या वा पूर्वं विदितमासीत्। गोपालेन सह परिणयकथा संवृत्तेति" मां व्यजिज्ञपत्। "कोऽयं गोपालो नाम? किमयं चम्पायाः स्वामी"ति मयानुयुक्तो राजचन्द्रः क्रमेण, "सर्वमेव भवान् जानाति स एवाय"मिति भूयः प्रकाशयामास। लब्धो मया कश्चिदालोकः। मन्ये चम्पा सपत्नीयन्त्रणाभयेन रजनीं वञ्चयित्वा सह सहोदरेण तां देशान्तरगतामकरोत्। मन्ये तस्या एव मतमनुवर्त्तमानेन हीरालालेनापि रजन्या जीवनापनयनाय प्रयत्नो विहितः। किन्तु सर्वमिदम् अहं मनसि गोपायन् राजचन्द्रं प्रत्यवादिषम्, "भद्र, सर्वमेवेदं जानामि किञ्चिदन्यदपि। तदहमिदानीं भवते कथयामि। किन्तु न त्वया किमपि निगूहनीयम्।" 'नन्वाज्ञापय' इति तेन विज्ञापितो "न रजनी भवतः कन्यके"ति व्यजिज्ञपम्। "किमिदं न चेदियं मम दुहिता कस्य तर्ही"ति सविस्मयं प्रवदन्तं तमहं ननु "हरेकृष्णदासस्ये"ति प्रावोचम्। तेन तु चणं तूष्णीं तिष्ठता समभिहितं, "को भवानिति नावगच्छामि किन्तु शिरसा भवन्तं प्रसाद्य समभ्यर्थये यदिदमस्मै न कथयितव्य"मिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मया प्रत्यभिहितम्. "नेदमिदानीमस्मै प्रकाशनीयं, किन्तु प्रकाशयितव्यमेव। तिष्ठतु तावदिदं यदहमिदानीं पृच्छामि दीयतां तत्र यथार्थमुत्तरम्। यदा तु मृतोऽस्या जनकः किं तदास्या आसन् कानिचिदाभरणानि ?" स भीतः प्रत्युवाच "न मया ज्ञायते काचिदपि तस्या भूषणकथा, न वा लब्धानि कानिचिदपि भूषणानि" इति। "किं मृते तस्मिन् तेन त्यक्तां सम्पदमनुसन्धातुं न त्वं तत्र गतवानासीः ? गतश्चेत् किं ज्ञातवानि"ति भूयो मया पर्य्यनुयुक्तः पर्य्यवोचत राजचन्द्रः—"बाढमेवं, गतं मया तत्र, गत्वा च समाकर्णितं यत् सर्वमेव तस्य वस्तुजातं राजपुरुषैः परिगृहीतं, बिभेमि च राजपुरुषेभ्यः, तस्या एव रजन्या वलये तस्करेणापहृते, प्रवृत्ते च विचारे तैरहं नितरां निपीडित आसम् अतश्च तेषां नाम समाकर्णयतो मे न कियदप्यवशिष्टमासीत् कर्त्तव्य"मिति। "किमिदं वलयापहरणं नाम ? कीदृशो वा तत्र प्रावर्त्तत विचार" इति जिज्ञासमानं मां स भूयो विज्ञापयामास। रजन्या श्मशानसमये तस्करः कश्चिदस्या वलययुगलमपहरन् तत्रत्यैः परिगृहीत आसीत्। वर्द्धमाननगरे च तस्य विचारः समारब्धः। साक्ष्यसम्पादनायाहमित आहूतस्तत्र गतः। प्राप्तश्च महान्तं दुर्भोग"मिति स विरराम। दृष्टश्च मया पन्थाः।

(वक्ता शचीन्द्रनाथः)

मयि न्यस्तोऽयं भारो यथा, विचित्रमिदं रजनीचरित्रमंशतो मया चित्रयितव्यमतः सम्पादयामि कर्त्तव्यम्।

अथाहमस्या विवाहायोद्युञ्जानो विवाहवासरे प्रातरेव तां पलायितामश्रौषम्। विशेषेण बहुशस्तामनुसन्दधानोऽपि तस्या नोपयातः कामपि प्रवृत्तिम्। सा भ्रष्टेति कथयत्स्वपि केषुचिज्जनेषु न तत्र मे समुपजातो विश्वासः। बहुशस्तामवलोकितवता मया सशपथमिदं शक्यते वक्तुं यदियं न भ्रष्टा भवितुमर्हतीति। इदन्तूपयुज्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा कुमारीयं कौमारे वयसि वर्त्तमाना क्वापि प्रणयातिशयं बिभ्राणा विवाहभयेन विजहौ भवनम्। किन्तु कथमस्याया: प्रणयप्रसरः।

—— (क्रमशः)

संस्कृतसाहित्यपरिषदः

त्रयोदशवार्षिक-महोत्सवविवरणम्

[निबन्धकः—श्रीदक्षिणारञ्जन-शास्त्री एम्. ए.]

विगत-सौरभाद्रस्य नवमदिवसे रविवासरे सायं षड्वादनतः परम् "युनिभार्सिटि इन्ष्टिट्ट भवने" परिषदस्त्रयोदशवार्षिकमधिवेशनं सुसम्पन्नम्। माननीया अध्यापकाः श्रीमन्तः डक्टर् एस्. राधाकृष्णन् महोदयाः सभापतिपदमलमकुर्वन्। समवेतानां महात्मनां विपश्चिद्-वर्य्याणां मध्ये महामहोपाध्यायाः श्रीमन्तः शितिकण्ठवाचस्पतिमहोदयाः म.म. श्रीमन्तः अनन्तकृष्णशास्त्रिणः म.म. श्रीमन्तः कमलकृष्ण-स्मृतितीर्थाः म.म. श्रीमन्तो भागवतकुमारशास्त्रिणः म.म. श्रीमन्तो दुर्गाचरणसांख्यवेदान्ततीर्थाः म.म. श्रीमन्तः फणिभूषणतर्कवागीशाः कलिकाता-राजकीय-संस्कृतमहाविद्यालयाध्यक्षाः श्रीमन्त आदित्य-नाथ-मुखोपाध्यायाः मूलाजोडसंस्कृतमहाविद्यालयाध्यक्षाः श्रीमन्तो निशिकान्ततर्कतीर्थाः संस्कृतमहाविद्यालयाध्यापकाः श्रीमन्तः कुञ्ज-विहारितर्कसिद्धान्ताः श्रीमन्तः सुरेन्द्रनाथविद्यारत्नमहोदयास्तथा विश्वविद्यालयाध्यापकाः श्रीमन्तः पञ्चाननतर्कवागीशाः श्रीमन्तः प्रबोधचन्द्रवाकचिमहोदयाः श्रीमन्तः क्षितीशचन्द्रचट्टोपाध्यायाः पण्डित-प्रकाण्डाश्चान्ये बहवः श्रीमन्तो हरिदाससिद्धान्तवागीशप्रमुखा-स्तथा श्रीमन्तो जहरलालनेहेरुमहोदयाः श्रीमन्तो द्वारकानाथमित्र-महोदयाश्च सविशेषमुल्लेख्याः।

सभायामादौ श्रीमान् विष्णुपददत्त उद्बोधनसङ्गीतस्यताललय-मिश्र-सुमधुरालापेन समवेतसामाजिकानां मनांसि युगपदेवाकृष्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वान् सभ्यान् चित्रगतान् इवाकरोत्। ततश्च कलिकाता-राजकीय-संस्कृतमहाविद्यालयाध्यक्षाणां परिषदो विशिष्टसहायभूतानां तत्रभवतां श्रीमतामादित्यनाथमुखोपाध्याय एम्.ए.पि.एइच्.डि, दर्शनसागराणां प्रस्तावेन कलिकाता-विश्वविद्यालयाशुतोषासनाधिकारिणां परिषदः सहकारिसभापतीनां महामहोपाध्यायानां तत्रभवतां श्रीमतां भागवतकुमारशास्त्रिमहोदयानां समर्थनेन च सभापतिवरणं समनुष्ठितम्। ततः परिषन्मन्त्रिणा श्रीमता अमरेश्वरठाकुर-वेदान्तशास्त्रिणा त्रयोदशवार्षिकं कार्य्यविवरणं वाचितमभूत्—तच्चास्यामेव पत्रिकायामन्यत्र संयोजितमास्ते। पठिते च कार्य्यविवरणे परिषदोऽन्यतमेनोपमन्त्रिणा श्रीमता दीनबन्धुसाहित्यशास्त्रिणा आगामिवर्षीयकार्य्यपरिचालकानां नामानि वाचितानि। सम्पन्ने च तस्मिन् श्रीमता अक्षयकुमारशास्त्रिणा परिषदाचार्य्येण श्रीमता कालीपदतर्काचार्य्येण तथा परिषदोऽन्यतमेनोपसभापतिना महामहोपाध्यायेन श्रीमता अनन्तकृष्णशास्त्रिणा परिषदो भूतपूर्वान्यतरसम्पादकस्यान्यतम-प्रतिष्ठापकस्य च गोष्पतिरायचतुर्धुरीणकाव्यतीर्थमहोदयस्य गुणव्याख्यानादिकं प्राञ्जलया सोच्छ्वासया च भाषया कृतमासीत्। ततः सभापतिमहोदयैस्तस्यैव परिषद्गतप्राणस्य काव्यतीर्थमहोदयस्य तैलचित्रस्यावरणोन्मोचनं विहितम्। समनुष्ठिते च तैलचित्रावरणोन्मोचनकार्य्ये महामहोपाध्यायेन श्रीमता भागवतकुमारशास्त्रिणा तथा कलिकाता-विश्वविद्यालयाध्यापकेन श्रीमता प्रबोधकुमारवाक्‌चि-महोदयेन परिषत्पत्रिकाया भूतपूर्वसहकारिसम्पादकस्य सुरेन्द्रनाथमजुमदारशास्त्रिणः एम्. ए. पि. आर. एस्, महोदयस्याकालपरलोकप्रयाणे शोकः प्रकाशितः।

शोकप्रकाशानन्तरञ्च सभापतिपादानां दशगुणसमलङ्कृतमाङ्गलभाषामयमभिभाषणम्। प्रसङ्गक्रमेण च सभापतिपादैः सङ्केतितं यदस्माकं भारतीयानां साम्प्रदायिकधारासंरक्षणमेव मुख्यमुद्देश्यं, स्वाराज्यादीनि तु केवलं साधनमात्राण्येव भवितुमर्हन्तीति। समाप्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गते च सभापतिमहोदयानामभिभाषणे परिषन्नाट्यसमिति-सभ्यै-रनुष्ठित-पूर्वे स्यमन्तकोद्धाराभिनये जाम्बवतांश-ग्राहिणे श्रीमते मधुसूदनचक्रवर्त्तिने अभिनयदर्शनसम्प्रीतेन श्रीमता अमरेश्वरठाकुरेण प्रदत्तं रौप्यपदकं सभापतिना उपायनीकृतम्। ततः सम्पन्ने निखिले सभाकार्य्यजाते परिषद उपमन्त्रिणा श्रीमता चिन्ताहरणचक्रवर्त्तिना जर्जरपूजाया इतिहासः संक्षेपेण अभिनीयमानानां नाटकानां तत्-कर्त्तृणां परिचयश्च समुल्लिखितौ।

ततश्चाभिनये दत्तमानसैः परिषत्सभ्यैः प्रथममेव भरत प्रणीत-नाट्यशास्त्रसरणीमनुसृत्य जर्जरपूजा विहिता। अभिनवेयं जर्जरपूजा सर्वेषामेव सामाजिकानां मनांस्यन्वरञ्जयदिति परम-प्रमोदस्थान-मस्माकम्। परिसमाप्तिं गतायां जर्जरपूजायां चण्डकौशिके केवलं श्मशानदृश्यमतिक्रम्य यथायथमभिनीतमासीत्। ततः शाकुन्तले पञ्चमाङ्कावतारोऽभिनीतः सम्यक्। धीवरांशस्याभिनयपाटवं सर्वैरेव सामाजिकैरुच्चैरुद्घोषितम्। तदनन्तरं महाकवि-भास-विरचितस्य पञ्चरात्रस्याभिनयः। यद्यपि परिषत्सभ्यैरभिनीतपूर्वमिदं नाटकं तथापि वर्षेऽस्मिन्नस्याभिनयः प्रायेणाभिनयकौशलस्य परां काष्ठा-मधिरूढ इति सर्वेषामेव साध्वसाधुविचारणानिपुणानां दोष-ज्ञानामभिमतम्। बालोऽभिमन्युरभिनयकौशलेन मधुरया चाकृत्या विशेषेणारञ्जयत् सामाजिकमनांसीति सर्वैरेवोद्घोष्यते। बृहन्नलापि न विस्मर्य्यते। शकुनि-गुणाश्च स्मर्य्यन्ते प्रतिमुहुम्। समासतश्च न केषामप्यभिनयः सामाजिकानां विरागमुदपादयदिति विदितमस्माभि-र्विश्वस्तसूत्रेण।

परमुपरते च गोष्पति-प्रतिमे गोष्पतिकाव्यतीर्थे परिषन्नाट्याचार्य्ये यत्किञ्चन साफल्यं वर्षेऽस्मिन् लब्धमभिनयविषये परिषत्सभ्यैस्तत्तु नाट्यकलानिपुणानां परिषदो वर्त्तमाननाट्यसम्पादकानां श्रीमतां जगन्मोहनज्योतिर्विनोद-महोदयानां तथा श्रीमतां वामापदविद्यारत्न-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयानां प्रयत्नगौरवादेवेत्यत्र नास्ति केषाञ्चन विप्रतिपत्तिरिति विदाङ्कुर्वन्तु प्रियपाठकाः। आशास्महे यदितःपरमपि ते तथैव प्रयत्न-विशेषमातिष्ठन्तः प्रयोगप्रबन्धे संस्कृतभारतोञ्च परिषदञ्च प्राचोननाट्य-कलाञ्च परमुपकरिष्यन्ति। रात्रेर्द्वादशघटिकायामभिनयभङ्गो जातः। एतदस्मार्क गौरवकारणम् अभिनयस्य च साफल्यसूचकं यदापरिसमाप्ते रभिनयस्य रङ्गगृहं पूर्णप्रायमेवासीत्। पश्चिमे वयसि वर्त्तमानाः शिक्षासंस्कारादि-गम्भीरविषये दत्तसमयाः परमदार्शनिका अपि अभि-नयकलाकौशलदर्शनेन तथा मुग्धा आसन् यथा आसनपरित्याग विषये तेषां मतिरपि नाजायत इति सहृदयान् सामाजिकान् संक्षेपतो विज्ञाप्य विरमामः।

पुस्तकपरिचयः

चाणक्यसूत्रम्—श्रीमत्कौटिल्य-प्रणीतम्। पञ्चतीर्थोपनाम-श्रीईश्वरचन्द्रशर्मशास्त्रि-वेदान्तभूषण-विरचित सारार्थबोधिनीसमाख्य-टीका-वङ्गानुवाद-टिप्पणीप्रभृतिभिश्च समलङ्कृतम्। ग्रन्थादौ सप्त-दशपत्रव्यापिनी गवेषणाविलसिता संस्कृतभाषामयी एका अवतरणिका, परिचयपत्रञ्च 'एसियाटिकसोसाइटि' साधारणमन्त्रिणामिकं तथा संस्कृतपरीक्षासमिति-सभापतीनामपरं संयोजितं। पत्रसंख्या ५४८। मौल्यमस्य २) रौप्यकम्। प्राप्तिस्थानं—संस्कृतयन्त्रपुस्तकालयः, कलिकाता,—अन्यत्र च।

अवतरणिकायां टीकाकारेण शास्त्रिपादेन चाणक्यस्य समयं तत्प्रणीतान् ग्रन्थांश्चावलम्ब्य सम्यक् समालोचनं कृतं सिद्धान्तश्चोप-निबद्धः।

भारतीय-मनीषिणः परलोकेश्वरात्मतत्त्वादौ काव्यालापादौ वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा दत्तमानसा आसंस्तथा ऐहिकविषयेऽपि परमनभिज्ञा नासन्नित्यत्र चाणक्यसूत्रादीन्येव प्रमाणकोटीमारोहन्ति। टीकाकाराश्च शास्त्रिपादा यद्यपि वेदान्तविद्यापारीणास्तथापि तेषामत्र चाणक्यसूत्रविवृतौ प्रवृत्तिः साफल्यञ्च तदेव रहस्यं प्रकटयतः।

वङ्गेषु संस्कृतभाषाविशेषज्ञा वङ्गभाषायां हतादरा इति तु प्रायो वाद इत्यत्र यथा विद्यासागर-न्यायरत्न-तर्कालङ्कार-तर्करत्न-तर्कभूषण-शास्त्रिप्रमुखा आचार्यवर्याः प्रमाणं तथा ; एतेऽपि टीकाकारा इति तु स्वीकर्त्तव्यमेव। कथमन्यथा वङ्गाक्षरेणास्य मुद्रणं, वङ्गभाषया वानुवादः ? एतेनास्य वङ्गविषयाद् बहिः प्रचारबाहुल्यं प्रतिहतमित्यत्र कस्यास्ति विप्रतिपत्तिः ?

ग्रन्थस्यास्य गौरवं यथा अप्रतिहतं स्यात्तदर्थं शास्त्रिपादेन आदर्शपुस्तकचतुष्टयं संगृहीतम्। चतुर्षु पुस्तकेषु सूत्राणां पाठानैक्यं च बहुधा विद्यते इत्यपि तेनैवोट्टङ्कितम्। परमस्माकं दौर्भाग्यादस्मिन् आवृत्तिके पाठभेदो न प्रदर्शितः। यत्तु मुद्रायन्त्रस्याक्षरयोजकानां त्रुटिप्राचुर्य्यात् कुत्रचन कुत्रचन भ्रमादिकं विद्यते तत्तु विषयगौरवादुपेक्षणीयमेव।

सर्वथा, येषां कृते प्रयत्नोऽयं तेषां मध्ये ग्रन्थस्यास्य प्रचारबाहुल्यमभिलषामः। संस्कृतसमितिपरीक्षायां साहित्यविषये विषयान्तरे वा पाठ्यरूपेण यद्ययं निर्दिष्टो भवेत्तर्हि पाठार्थिनां नितरामुपकारो भवेदिति पाठ्यनिर्वाचनाधिकारिणामवधानमत्राभ्यर्थयामहे।

सत्यनारायण-व्रतकथा—(मूल ओ पद्यानुवाद) वङ्गाक्षरमुद्रितमिदं पुस्तकं श्रीयुक्त-नृत्यगोपाल-मुखोपाध्यायेन सम्पाद्य श्रीयुक्त-विश्वनाथमुखोपाध्यायेन प्रकाशं नीतम्।

भारतवर्षे सर्वत्र सुप्रचारितस्य सत्यदेवार्चनस्याङ्गीभूता व्रतकथा अन्यत्र रेवाखण्डीयापि वङ्गेषु कालवशाद्वा कारणान्तरवशाद्वा अपशब्दबहुला अपभ्रंशभाषामयी चेति न केषामप्यप्रत्यक्षं नाम। अत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च कारणत्वेनोपकल्पितं विषयकदम्बं मुखबन्धे ग्रन्थकृता निबद्धञ्चेति रमन्तां तत्रैव कुतुकिनो हेतुवादमुदितमानसा अस्मत्पत्रिकापाठकाः। परमेतद्दुर्णयापनिनीषयैव विषयिणोऽपि तत्रभवतो ग्रन्थकारस्य ग्रन्थमिममुपसम्पादयितुमयमुपक्रमः।

ग्रन्थेऽस्मिन् रेवाखण्डीय-व्रतकथा मूलमात्रेण वामभागे सन्निवेशिता, दक्षिणतश्च तस्यानुपदमनुवादः सहजबोध्योऽपि मूलार्थमजहद्देव विजयते। अनेन च सुघटितसन्निवेशविशेषेण अनुवादस्य मूलानुगत्य-प्रत्ययं प्रति महान् सुयोगः सम्पद्यते स्वल्पविद्यानामपि।

अस्ति ह्यत्र मुखबन्धे नानाविषयिणीष्वालोचनासु सत्यनारायणवर्णविमर्शनविधौ विचारवैदुष्यमुद्घोषितं ग्रन्थकारेण; अस्ति च अर्वाक्तनगर्वितानां हेतुवादमात्रपराणामशास्त्रजुष्टेषु स्वकपोलकल्पितेषु च सत्यदेवार्चनस्याधुनिकत्ववादेष्वपवाधमप्रवादोऽपि तदुद्भावितः, तथा चास्ति पूजायाः कालकरणाद्यूहापोहेन प्रकृतमतनिर्णायिका साधारणोपयोगिनी सुविस्तृता समालोचनेति। मूलानुवादकर्म्मणि च ग्रन्थकर्त्तुरैकान्तिकता परिश्रमविशेषः पाण्डित्यप्रतिभा चास्माभिर्निःशेषमुद्घोष्यन्ते। परमस्य मुद्रणकार्य्यं कागदं ग्रन्थपुटकञ्च मनोरमाणि क्रेतारमनिच्छन्तमपि बलादाकारयिष्यन्तीवेत्यपि न कथामात्रमस्माकम्। अस्ति च वर्णत्रयसङ्कलनेनाङ्कितानि त्रीणि चित्राण्यत्रैव—एकं सत्यनारायणस्य, द्वितीयं ग्रन्थकृन्मातुस्तृतीयञ्च नैमिषारण्यस्येति मोदन्तां कोमलकलानुशीलनपरायणाः सत्यनारायणसेवाधिकृताः। वयमस्य ग्रन्थस्य प्रचारबाहुल्यं सुतरां कामयामहे। ग्रन्थकृत्सङ्केतितेषु संख्यातीतेष्विव ग्रन्थासादनपदेषु स्थानसंक्षेपादेकमेव तावदधो निर्दिश्यते प्रकाशकगोचरं—पोः सुगकल्याण, चन्द्रभाग, साधनापुस्तकालय, जिला हवडा।

मूल्यमस्योत्तमकर्पटकबद्धस्य १) एका राजतो मुद्रा, मध्यमबद्धस्य ॥० द्वादशाणकम्, साधारणबद्धस्य ॥० अर्द्धचन्द्रमात्रम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषत्सन्देशः

परलोके सुरेन्द्रनाथः—पाठकमहत्तमाः, परिषदं प्रति सदातनीं निर्दयतामव्ययावत्तत्तत्-कर्मसु प्रदर्शयतो विधेः किन्नाकारुण्यं दुःखदुःखेन विक्षुब्धहृदया वयं वक्तुमुद्युक्ताः स्मः। परिषत्पत्रिकाया भूतपूर्व-सहसम्पादकस्तत्रभवान् सुरेन्द्रनाथ मजुमदार-शास्त्री एम्. ए., पि. आर्. एस्, महोदयः अकाले एव कालग्रासमनुभूतवान्। विदुषोऽस्य सौजन्य गरिमा सौन्दर्य्यमधुरिमा, अध्ययन-द्राघिमा, शास्त्राभ्यास-पटिमा चास्मांस्तदानीमेवमावर्जयन्त येन चिर-प्रोषितस्य तस्य दुःखव्यपोहिकामपि प्रसृतिं नैवाद्याप्यासादयामो मन्दभाग्याः।

महानुभावोऽयं पूर्वं पाटलिपुत्रस्थे कस्मिंश्चिद् विद्यालये अध्यापक-पदमारूढः परया योग्यतया शिष्यानध्यापयन् सद्गुरुगोचरस्य यशसो भाजनमभूतपूर्वमिवाभूत्। काले च विदितविद्याप्रकर्षः "विहार-ओडिष्या"प्रदेशीय-शिक्षाप्रेक्षकपदे समुन्नीयमानो देहत्यागावसानं यावत् तत्कर्मजातं सप्रशंसं निरवाहयत्। विद्यावत्ता चास्य सुघटितयोपाधि-मालया सूच्यमाना प्रमाणाधिकतामात्मनो दर्शकवृन्देषु व्यञ्जयति।

दैवाधीना वयं तत्कृते सञ्जातज्ञताकं शोकाश्रुजातं, तत्परिजने-भ्यश्च ससान्त्ववादमीश्वराशीर्वादं प्रयुञ्जानाः प्राणानेव केवलं धार-याम इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्थाः *

		मूल्यम्			
२।	कालीतन्त्रम्—सटीकानुवादम्	साधारणानाम्	।/०)	सदस्यानाम्	।०)
३।	शङ्करीसङ्गीतम्	,,	।/०)	,,	।/०)
४।	मुक्तिवादः—गदाधर-भट्टाचार्य्यविरचितः, सटीकाद्वय-भाष्यानुवादसहितः	,,	२)	,,	१॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,,	१।०	,,	१
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा		१।०)	,,	१)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,,	।०)	,,	।/०
८।	कारकोल्लासः—भरत-मल्लिककृतः, सोदाहरण-कारकनिर्णयरूपः		/०)	,,	/०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गल-भाषाटिप्पणसमेता		॥०)	,,	।/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,,	/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थः	,,	१।०)	,,	१)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,,	।/०	,	/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्	,,	॥०)	,,	।/०)
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्)	साधारणानाम्		सदस्यानाम्	
	श्रीकालीपद-तर्काचार्य्यकृतम्	,,	१।०)	,,	१)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्		२)	,,	१॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विक्रो रथयात्रादि द्वादशयात्रापद्धति-रूपम्		।)	,,	/०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्		२।०	,,	२)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थः		१।०	,,	१)

* देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा वङ्गाक्षरमुद्रितनामानि वङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-प्रमथनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समञ्जसा—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। रामायणम्—वाल्मीकि-विरचितम्।

———

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
38, Vidyasagar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

[१८५१ शकीये आश्विने
October, 1929]

१२श-वर्षस्य ६ष्ठ-संख्या
[Vol. XII, No. 6.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती मातु भारती

सम्पादकः—

श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাজিকে সুস্নিগ্ধ ও কোমল করিবার জন্যই

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটা চিত্ত প্রফুল্ল থাকে ; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে,অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত.

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮-১, ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

October, 1929.	१८५१ शकीये आश्विने १२श-वर्षस्य षष्ठ-संख्या	Vol. XII. No 6.

मतिमञ्जरी

यत्किञ्चित् प्राप्तकालम्—निष्ठां गतः प्रौष्ठपदस्य नवमाहे महोत्सवः परिषदस्त्रयोदशवर्षावसानसम्भूत इति यत् सत्यं समुच्छ्वसितमिव नश्चेतोभिः । परिषन्नियमानुगत्या चेतः परत एव ऐषमीयाः पारिषद्याः कर्म्मपरिचालकाः स्वं स्वं नियोगमशून्यं करिष्यन्तीति शास्त्रलोकबहिर्भूतापि वस्तुगत्या भाद्रपदादेवास्मिन् वर्षे वर्षप्रवृत्तिः परिलक्ष्यते परिषदः । परिषत्कार्य्याणामुत्सवानाञ्च कथन्ताजिज्ञासुभिर्विप्रकृष्टैः सदस्यैरेतत्पूर्वाङ्कसङ्कलिते "परिषदस्त्रयोदशवार्षिककार्य्यविवरणञ्च" "परिषदस्त्रयोदशवार्षिकमहोत्सवविवरणञ्च" सदयमुदीक्षणीये ।

चतुर्दशवर्षदेशीया चेयं परिषन्न केवलमस्माकं विशेषसंसृष्टानां बान्धवानां, परं दूरस्थितानामपि गुणमात्रवशीभूतानां विदुषां हृदयमावर्जयति समुपस्नेहयति च । एतच्चास्याः एव स्थानान्तरे विनिवेशितस्य मद्रदेशीयेन केनचित् पण्डितप्रकाण्डेन निबद्धस्य परिषत्प्रशस्त्यात्मकस्य लेखस्यावलोकनेनापरोक्षतां गमिष्यत्येव वाचकसुहृदाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रिका चेयं जनन्या वर्षद्वयादूना द्वादशे वर्षे पदं निदधती मातुर्गुणैनैश्वर्य्येणान्येन च सौभाग्यवत्त्वादिना समुपेता कं न सम्मोहयते। विदेशीयैर्देशीयैश्च विद्वत्समाजैरस्या निबन्धशैलीं प्रचारबाहुल्यादिकञ्चावलोकयद्भिरर्थगरिष्ठैर्भाषामधुरैश्च निबन्धैरियमशेषेणोपाकारि। परं सन्ति केचनास्मदात्मपच्चाश्च क्षतविद्याश्च विदितलेखप्रकर्षाश्च महात्मानो ये भाषान्तरमधिकृत्य निबन्धलेखनेन ख्यातिविशेषमुत्प्रेच्चमाणा न तावत् संस्कृतनिबन्धादिविरचनेन गैर्वाणीं वाणीमिमां परिपोषयितुं प्रसीदन्ति; केचन च केवलं स्वल्पायाससाध्यं समालोचक-पदमधिकुर्वते, अधिकृत्य च पदमिदं मच्चिकासम्प्रदायसुलभेन मनोभावेन दोषमेव केवलमुत्प्रेच्चमाणाः खेदयन्ति, निबन्धलेखकान् पत्रिकासम्पादकसङ्घांश्च। नोपकुर्वते संस्कृतभाषां नानुसन्दधते निबन्धलेखनिबन्धनं परिश्रमविशेषं, न च जानते सम्पादकानां सङ्कटप्रचुरां पत्रीपरिचालनपद्धतिम्। किमिव हि तेषां यशोमूल्येन विद्याविक्रयिणामयशःख्यापनार्थं बद्धपरिकराणां पुरोभागिणाञ्च साम्प्रतमिति जिज्ञासवो वयं सुधीसमाजेषु।

परमियं संस्कृतभाषा स्वेन महिम्ना स्वेन दिव्यभावेन स्वेन च प्राचीनत्वेनोपचीयमाना मच्चिकासाम्प्रदायिनः प्रतिपच्चानाच्छिद्य प्रख्यातिमभिसन्धित्सूंश्च अवधूयानुविधास्यति स्वं प्रचारमिति मन्वाना दुन्दुभिघोषेणाघोषयामो वयं महाकवेः सूक्तार्द्धम्—

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः॥" इति। शम्॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीदुर्गा-प्रशस्तिः

[निबन्धकः—आयुर्वेदाचार्य्य-श्रीहेमेन्द्रचन्द्रव्याकरणतीर्थः]

अयि चिरसुखकरि ! शारद-सुन्दरि !
जागृहि, वर्षाक्लेशम् ।
अपनय तूर्णं धर रुचिपूर्णं
भुवनमनोहर-वेशम् ॥

मधुमद-लोला मधुकर-माला !
गुञ्जत कुसुमितकुञ्जे ।
गायत चपलाः कोकिल-बाला !
अभिनव-किशलय-पुञ्जे ॥

लतिका ! विहसत, कुसुमं वितरत,
विकिरत सुमधुर-गन्धम् ।
परिमल-लुण्ठन- सुरभि-समीरण !
वह ननु दिशि दिशि मन्दम् ॥

अपसर जलधर ! लस विमलाम्बर !
वितर सुधाकर ! हास्यम् ।
नवकरहारा विहरत ताराः !
खञ्जन ! कुरु सुखलास्यम् ॥

हस हस शतदल ! विमलीभव जल !
गायत विहगा ! गानम् ।
ललित-तरङ्गे ! तटिनि ! सुभङ्गे !
कुरु सागरमभि यानम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाग्रत लोका ! व्यपगत-शोका !
दृशमुन्मीलयतान्धाम् ।
पश्यत तरुणं प्रोद्यतमरुणं
विजह्वित जाड्यविभ्रमम् ॥
चिनुध्वममलं विकसितकमलं
कुसुमं बहुलाकारम् ।
धूपय धूपं दीपय दीपं
भूषय सकलागारम् ॥
वादय वाद्यं जनगण ! हृद्यं
गाय च गीतमपूर्वम् ।
उलुलु-ध्वनिभि- मंगल-ध्वनिभि-
र्ललनाः ! पूरयताम्बरम् ॥
व्रजत सुदीना ! रिपवो हीनाः !
प्रशमं भुवने तूर्णम् ।
प्रसीद मानस ? नितान्त-तामस !
सत्त्वं श्रय सुखपूर्णम् ॥
लोकय लोकय मुहुरवलोकय
केयमुपेता शान्ता ?
सिंहतनुस्था शशि-सित-मस्ता
कोटिसुधाकरकान्ता ?
भारतसन्तति- दुःखनुदती
शङ्करदयिता दुर्गा ।
सेयमपर्णा चम्पकवर्णा
भवनमुपैति सवर्गा ! ॥
तामनुगच्छति लघु लघु गणपति-
रपास्य विघ्नवितानम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रिया लसन्ती श्रियं दिशन्ती
श्रीरपि यात्यनुयानम् ॥

सुललितवीणा वादन-निपुणा
शुचिरन्वेति च वाणी।
शक्तिविधाता वैरि-विजेता-
ऽनुगतः सुरसेनानीः ॥

ब्रह्म-विष्णु-हर प्रमुख-सुरेश्वर-
निवहैरियमनुयाता।
त्रातु भारत- वर्षं दुर्गत-
मिति त्रिजगन्माता ॥

एहि सुरेश्वरि ! भगवति शङ्करि !
मान्ये हिमगिरि-कन्ये !
विश्व-कृति-स्थिति- लयकरि ! शाश्वति !
देवि महेश्वरि ! धन्ये ! ॥

प्रहरण-धारिणि ! दशभुजशालिनि !
दैत्यनिसूदनि ! दुर्गे !
प्रसीद तारिणि ! विप्लव-वारिणि !
भारत-सन्ततिवर्गे ! ॥

स्वधर्महीनाः स्व-भावदीनाः
स्वदेशभक्तम्मन्याः।
नेष्ट-पदस्था अहो व्यवस्था
परिषदि ते शर्मण्याः ॥

आयाहि जननि ! मृतसञ्जीवनि !
तव पदधूल्यवकीर्णा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वदेशपण्यै- धनजनधान्यै-
वसुधा भवतु सपूर्णा ॥

नाशय रोगं प्रशमय शोकं
दूरीकुरु सति ! दैन्यम् ।
अपहर पापं दुःखं तापं
विश्वं कुरु सुखपूर्णम् ॥

मुक्ति-परिमले तव पदकमले
भवतु सभक्तिरशेषः ।
गन्ध-पुष्प-जल- पत-नयनजल-
संरचिताञ्जलिरेषः ॥

नमस्तुभ्यमयि सदानन्दमयि !
भातु मनसि तव कान्तिः ।
निखिले भुवने गगने पवने
विलसतु शाश्वत-शान्तिः ॥

अभिज्ञानशकुन्तले अभिनवतरो द्वापरः

[निबन्धकः—के. ए. रामलिङ्गशास्त्री]

रूपक-तल्लजस्य अभिज्ञानशकुन्तलस्य अन्तरङ्गबहिरङ्गसौन्दर्यं को हि नाम सहृदयोऽप्युच्चं नानुभवति ? गैर्वाणीलावण्यरसास्वाद-प्रवणाः सुधिय आमेरिकेयादयोऽपि रूपकम् एनत् अतितराम् आद्रियन्ते ; किं बहुना बह्वीभिर्भाषाभिर्नाटकम् इदमन्ववादि ; एतस्मादेव नाटकरत्नाकरात् श्रीमत्कुमारिलभट्टः—"सतां हि सन्देहपदेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।" इति सूक्तिलहरीमुद्धृत्य स्वकीय-ग्रन्थे उपोद्घलयति स्म ; प्रत्येकं प्रत्यङ्गं च विमृश्यमानमदो रूपकम् आदर्शभूतं, लौकिकवैदिकप्रमाणसर्वस्व-स्वर्णनिकषभूतं चेति को नु खलु अभिरूपो नाभ्युपैति ? रघुवंश-मेघसन्देश-शकुन्तलादौ श्रव्ये दृश्ये च काव्ये कविकुञ्जरोऽसौ 'अभिज्ञान' पदम् असकृदायोजयति स्मेति ज्ञायते ; तत्र मार्गदर्शी महात्मा कः ? इति चेत् अनुयुज्यते, तत्र भवान् आदिकविरेवेति विदितप्रायमेवैतत् विपश्चिताम् । अस्तु— प्रकृतमनुसरामः ;—आखेटाय अरण्यम् अनुप्रविष्टः प्रजारञ्जनलब्धवर्णः पृथिवीपालो महाराजदुष्यन्तः—आश्रमानोकहानाम् आलवाल-प्रपूरणार्थम् इतस्ततः पर्यटन्त्योः श्रुतिमधुरम् आलपन्त्योः, समवयो-रूपसौहार्दशालिनोः, शकुन्तला-प्रियंवदाऽनसूया अन्वर्थनामधेया अवलोक्य आश्रमान्तिके आह स्म आत्मगतं शकुन्तलालावण्यलालसः,— "अपि नाम कुलपतेरियम् असवर्णक्षेत्रसम्भवा स्यात् ? अथवा कृतं सन्देहेन ;—

असंशयं क्षत्रपरिग्रहक्षमा यदाऽऽर्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ १६ ॥

तथापि, तत्त्वत एनाम् उपलप्स्ये" इति । अनन्तरं च, "वयमपि तावद् भवत्योः सखीगतं किञ्चित् पृच्छामः,"—इति प्रस्तुत्य, पप्रच्छ ; —"स भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशम् ; इयं च वः सखी तदात्मजेति कथमेतत् ?" इति । अत्र—

'ऊर्ध्वरेता महाभागो भगवान्...... ।
... ...॥

इति श्रीमन्महाभारतवचनात् नैष्ठिकब्रह्मचर्ये इत्यर्थं 'शाश्वते ब्रह्मणि' इत्यस्य व्याचख्युः सर्वे व्याख्यातारः ।

'ब्राह्मणस्य चतस्रो भार्य्याः, क्षत्रियस्य तिस्रः, वैश्यस्य द्वे, शूद्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वैव भार्या' इति स्मृत्या ब्राह्मणादीनां चतुर्णां वर्णानां सजातीया जाया धर्माचरणार्थं, विजातीया तु भोगार्थम् इत्यवगमात् कुलपतिना भगवता काश्यपेन भोगार्थम् उदूढात् असवर्णक्षेत्रात् शकुन्तलाया उत्पत्तिरभ्यूह्यते,—'अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात् ?' इति भाषितेन दुष्यन्तेन; 'आजन्म ब्रह्मचारी भगवान् काश्यपः' इति-किंवदन्त्या विदितवृत्तान्तेनापि दुष्यन्तेन उत्तरत्र—'इयं च वः सखी तदात्मजेति कथमेतत् ?' इति असाङ्गत्यम् अनुयुज्यते, ऊहापोहकुशलेनापि सार्वभौमेण दुष्यन्तेन पूर्वोत्तरसन्दर्भाननुगुणमिदं भण्यत इति प्रथमोऽयं संशयावतारः (१)। वस्तुस्थितिमनुसृत्य काश्यपमहामुनिम् आजन्म ब्रह्मचारिणं वा, परब्रह्मनिष्ठं वा अङ्गीकुर्मः; तथा सति, शिष्यः—'वेलोपलक्षणार्थमादिष्टोऽस्मि प्रवासात् प्रतिनिवृत्तेन तत्रभवता काश्यपेन; तत् प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति; (परिक्रम्यावलोक्य च) हन्त! प्रभातम्, तथा हि—

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
... ...।
अन्तर्हिते शशिनि सैव कुमुद्वती मे
... ...
यावदुपस्थितां होमवेलां गुरवे निवेदयामि॥

काश्यपः—'वत्से! इतः सद्यो हुतान् अग्नीन् प्रदक्षिणीकुरुष्व। (सर्वे परिक्रामन्ति)

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु॥

(इति ऋक्छन्दसाऽऽशास्ते) इति ईदृशगुरुशिष्यवाक्यपर्यालोचनेन भगवान् काश्यपतापसः संज्ञायते 'नित्याग्निहोत्री' इति; शाश्वते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मणि स्थितस्य कुलपतेर्भार्याविहीनस्य अग्निहोत्रहोमः कथं प्रसज्यते ? यदि नाम साग्निकोऽयं काश्यपतपस्वी वानप्रस्थाश्रमी अभ्युपेयते, तर्हि नित्यब्रह्मचारित्वप्रथा भज्येत ; यदि निरग्निकः, कथम् उपपद्यते वैतानाग्निहोमः ? इति द्वितीयः संशयावतारः (२)

ध्वन्यध्वन्यध्वन्य-मूर्धन्य-धन्यस्य आदिकवेः सदन्तेवासिकल्पस्य महाकवेः कालिदासस्य अमृतस्यन्दिनि अभिज्ञानशकुन्तले ईदृशा पूर्वोत्तरसन्दर्भाननुगुणा वर्णनफक्किका निकामं साहित्यविद्यारसिकैः कथं वा आद्रियेत ? अतश्च ईदृशसंशय-नवावतारं कृपया संस्कृत-साहित्यपरिषदः पारिषद्याः पण्डिततल्लजा अविलम्बितमेव निवर्तयेयुरिति विश्वसिमि ; सति अवकाशे स्वीयमाशयं च प्रकटीचिकीर्षामि ; बहोः कालादारभ्य विषयोऽयं हृदयं मे आविलयति ; अतो मयाऽयं सुकुमारोऽभ्युपायः कृतः ; एतेे प्रश्नमुखेन जिज्ञास्यते स्वीय-धियः शुद्धेः इति शम् ।

मिथिलाधिप-राजश्री-

श्रीरमेश्वरसिंहबाहादुरमहोदयानां स्वःप्रयाणमुपलच्य

"शोकोच्छ्वासः"

[निबन्धकौ—श्रीसारदाचरणसेन-कविरत्नम् श्रीउपेन्द्रनाथ-झा-व्याकरणाचार्यश्च]

अस्तंगतो भारत-धर्मभानू
रमेश्वरः श्रीमिथिलाधिनाथः ।
ब्रह्मण्य-विद्या-विमलीकृतात्मा
धरामराणां शरणं द्विजेन्द्रः ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदीय-देहस्य विनाश-दुःखैः
सा भारती लोकललामभूता।
विलोलमाल्याम्बर-वीतकान्ति-
र्मुञ्चत्यजस्रं बहुशोकजास्रम् ॥ २ ॥

अस्तंगते भारत-धर्म्मभानौ
वधर्म्म-वात्याक्षुभिते धराब्धौ।
प्रवेपमाना बत ! धर्म्म-नौका
विना सुदक्षं नृप-कर्णधारम् ॥ ३ ॥

अस्तं गते भारत-धर्म्मभानौ
रमेश्वरे श्रीविदुषां वरेण्ये।
सनातनं धर्म्मधनं जनानां
ग्लानिं परां याति विनाश्रयेण ॥ ४ ॥

अस्तं गते भारत-धर्म्मभानौ
गीर्वाण-वाणी-विदुरे नरेन्द्रे।
विद्वत्प्रिये तत्त्वविदां वरिष्ठे
पायादपायात् सुरभारतीं कः ? ॥ ५ ॥

अस्तं गते भारत-धर्म्मभानौ
दिगन्त-विश्रान्त-यशः-प्रचारे।
शोकाग्नितप्ता जनतातिदीना
मोमुह्यते वज्रहता लतेव ॥ ६ ॥

आचार-पूतो महनीय-कीर्त्ति-
र्विद्वद्वरेण्यो गुणवत्सहायः।
उमेशभक्तः करुणानिधान-
मासीत् प्रजानां शरणं नरेन्द्रः ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तं गते भारत-धर्म्मभानौ
स्वाध्याययुक्ते मिथिलाधिनाथे ।
छन्नं जगच्छोक-घनान्धकारै-
र्हा हेति शब्दं कुरुते सदैव ॥ ८ ॥

श्रीमद्रमेश्वरनृपो हुतजातवेदा
वेदानुरक्तहृदयो बुधवृन्द-सख्यः ।
वेदादि-शिक्षणविधौ विदधे महात्मा
विद्यालयं सुकृतिनां प्रमुदे चिराय ॥ ९ ॥

यदीय-सामर्थ्यमुपेत्य गङ्गा-
नङ्गारिसङ्गानवरुद्धमार्गा ।
हन्तीह नोऽघानि समागता सा
हा राजतेऽसौ खलु दिव्यलोके ॥ १० ॥

स्वच्छाम्बु-पद्म-रुचिराणि सरोवराणि
चञ्चच्छशाङ्ककिरणोज्ज्वल-मन्दिराणि ।
निर्माप्य भूमिपतिना भुवि तेन लब्धं
पूर्णेन्दुकुन्दधवलं यशसः कदम्बम् ॥ ११ ॥

सन्ताप-हन्तुः शशिशेखरस्य
कृपाकटाक्षैर्मिथिलेश-सूनुः ।
कामेश्वरो नाम नवीनभूपो
जीयात् सुशीलः शरदां शतानि ॥ १२ ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अभिनयशैलीविमर्श"-समालोचनम्

[निबन्धकः—श्रीविभूतिभूषणभट्टाचार्य्यः]

साहित्यपरिषत्सम्पादकैरग्रहायणमासे यः खलु 'अभिनयशैलीविमर्श' इति निबन्धः प्राकाश्यं नीतः, निबन्धे तस्मिन् एकत्र लेखकेनोक्तं 'नाट्यप्रयोगस्य तथा तथा पद्धतयः पूर्वं स्थिता अपि अन्तरा भारतेऽस्मिन् वर्षे दर्शनादिविद्यायामिव लोकानामत्यासङ्गेन स्मरणीयतामिव उपजग्मुरिति विदितमेव पुरातत्त्ववेदिनां विदुषाम्' इति तु कथमपि न सङ्गच्छते। ११श खृष्टाब्दं यावत् दर्शनविद्यायाः प्रकृष्टालोचनदर्शनात्। तत्र "वेदान्तदर्शनेर इतिहास" नामके वङ्गभाषामये ग्रन्थे प्रज्ञानानन्दसरस्वतीपादैः सविस्तरं प्रपञ्चितम्। बौद्धादीनाम् अभ्युदयानन्तरम् एव तत्-खण्डनार्थं भूयसी चर्चा आसीत् इति तु प्रेचावत्सु प्रसिद्धम्। यदि नाट्यकलायाः पतनं कदाचिदपि स्वीक्रियते तत्तु नाट्यकलाया एकशरणानां भारतीयानां राज्ञां पतनकारणीभूतात् यवनाक्रमणसमयादेव अजायत इति तु अध्यापकवरेण 'कीथि'नापि समर्थितं स्वीयग्रन्थे, यथा—

"Doubtless the Mahomadan conquest seriously effected the vogue of the classical drama.......... The kings who had been main support of the actors, and the poets alike, disappeard from their thrones, or suffered grave reverses in fortune. The tradition of dramatic performances gradually vanished.—"Keith. Sans, drama,-p, 371.

यद्यपि अयं हि कालो नाट्यकलाया अवनतेराधारतामयासीत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि नेदं वक्तुमुचितं 'नाट्यकला अस्मिन् समयतः स्मरणीयतामिवोपजगाम'रिति, ११श-खृष्टाब्दात् परमपि प्रसन्नराघवादीनां निर्माणात्। न खलु दृश्यकाव्यानि पठनार्थं लिखितानि ग्रन्थकारैः, किन्तु प्रयोगार्थमेव, तत्र नास्ति कोऽपि सन्देहावसरः। उक्तञ्च कीथेन—

"Nor is there the slightst doubt that the early dramatists were anything but composers of plays meant only to be read' S. D. by Keith, p, 358.

अतः परं लेखकेनोक्तम् "अत एव दूरातीते काले यथा यथा नाट्यप्रयोगाः कुशलानां कुशीलवानां कौशलेन सामाजिकचेतःसन्तोषमाहितवन्तः तथा तथा नैव तदानीं" यद्यपि दर्शनविद्यायामेव अत्यासक्तिसमये नाट्यकलाया अवनतिः स्वीक्रियते, तथापि नाट्यकलाया नटजातीयानाम् उपजीविकारूपत्वात् पण्डितानां दर्शनविद्यायामन्यत्र वा अत्यासक्तौ कथं तस्या हानिर्भवितुमर्हति, अथवा दर्शनविद्यायां सर्वेषां भारतीयानाम् आसक्तौ प्रमाणाभावात् तदपि हेयमेव। यच्चोक्तं "तथा पटप्रवर्त्तनादिव्यापारेण नाट्यप्रयोगमुपभोगयोग्यं सुप्रबन्धेन समपादयन्। ततः प्रभृति निरन्तरामनुशीलनं नाट्यकलायाः समजनि जनानन्दनं भारते वर्षे" इत्यादि। अत्र वयम् अस्यामेव पत्रिकायां प्रकाशितस्य कस्यचन निबन्धस्य प्रतिध्वनिं कुर्महे "यदेते पटप्रवर्त्तनादिव्यापारा नाधुनिकाः परन्तु प्राचीना एव। तत्र रङ्गमञ्चादिकं विनिर्माय चित्रलिखित-पटादि-साहाय्येन कृत्रिम-पर्वतादीनामुपकल्पनेन च अभिनयः सर्वथा याथार्थ्यं प्रापितोऽभूत्······अभिनयप्रारम्भे नान्दीपाठश्च कृतः। अतो मन्ये सर्वथायमभिनय आधुनिकरूपकाभिनयेन तुल्य आसी"दिति "भारते प्रथमनाट्याभिनयः" सं. पं. पं. १म ख. २य स.। अत्र भरतोक्तम् अवधेयम्

"यद् द्रव्यं जीवलोके तु लतालक्षणलक्षितम्।
तस्यानुकृतिसंस्थानं नाट्योपकरणं भवेत्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रासादगृहयानानि नाना प्रहरणानि च ।
न शक्यं तानि वै कर्त्तुं यथोक्तानीह लक्षणैः ॥

अतः तेनोक्तम्

वर्मचर्मध्वजाः शैलाः प्रासादा देवता गुहाः ।
हयवारणयानानि विमानानि गृहाणि च ॥
पूर्वं वेणुदलैः कृत्वा कृतभावसमाश्रयाः ।
ततः सुरङ्गैराच्छाद्य वस्त्रैः सारूप्यमानयेत् ॥" इति ।

एवं वस्त्राणाम् असान्निध्यात् "तालोयैर्वा कलिङ्गैर्वा श्लक्ष्णैर्वस्त्र-क्रिया भवेत् ।" २१ अ० १७४ श्लो० । इदमस्माकं प्रतिभाति चित्र-पटाः खलु दृश्यानां प्रदर्शनार्थम् एव कल्पते न तु तेषाम् अन्यो नियोगः, ते च दृश्या यदि याथार्थ्येन प्रदर्श्यन्ते तर्हि नास्ति तावत् दृश्यपट-प्रयोजनं रूपकप्रयोगे । इदानीं तु कदाचिदपि वस्तूनां याथार्थ्येन प्रदर्शनं नाट्ये क्रियते, अत एव इदानीन्तन-रूपकप्रयोगे बहुलप्रचारो दृश्यते पटानाम् । यद्यपि कोथिन 'प्रमाणाभावात् इदमेव वक्तुमुचितं यत् नासीत् प्राचीनभारते नाट्ये दृश्यपटप्रयोगः, तदा तु रङ्गमञ्चाः प्रान्तेषु लम्बमानया यवनिकया आवृता दरीदृश्यन्ते । स्थानकाला-दयस्तु प्रेक्षकैरनुमेया आसन् । न खलु रङ्गमञ्चे रथादीनां पर्वतादीनां वा उपस्थितिर्दृश्यते' इति मनसि निधायैव उक्तम् —

'The King may mount a chariot, but no effort is made to bring one for this purpose, he merely elaborate pantomine through the action of getting up off the ground, and hhe audience, trained and intelligent realizes what had happened at, the beginning of Sakuntala the gazelle which Dusyanta followes is not a real animal, but the Sutradhara tells us the king is pursuing a gazelle "etc S. D. p, 364. किन्तु अतः परं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैनैव उक्तं—"and doubtless there were represented; houses, caves, chariots, rocks, horses and so on" p, 365. S. D. by Keith. अस्मिन् विरोधि-वाक्यद्वये दत्तावधानैर्भवद्भिर्भाव्यम् इति वयं प्रार्थयामहे। अन्यत्र लेखकेनोक्तम्—"आदौ तावदस्माकं शैशवे यादृशो दृष्टो नाट्यानां प्रयोगो यादृशश्चाद्य सन्दृश्यते, तयोर्भूयान् प्रभेदः सूक्ष्मविचारमन्तरेणापि आपातत एव प्रतिभासते। ......स्वभावतो यथास्माभिर्वचनानि प्रयुज्यन्ते, यथा वा स्वभावमनुरुद्ध्य भावाः समुपजायन्ते ततो विलक्षणं कमपि भावमङ्गीकृत्यैव वैशादौ भाषायाञ्च प्रायोगिकाः प्रयोगविधिं व्यापारयन्।" अत्र वयं पृच्छामः, अभिनय इति क उच्यते? यदि तावत् स्वभावानुकरणम् अभिनयः स्यात् तर्हि अस्वाभाविकत्वात् लेखकोक्त-प्रकारो नाभिनयपदमारोहति। स्वभावानुकरणमिवाभिनयः इत्यस्य सर्ववादिसम्मतत्वात् न वा नवीनाभिनयशैली अभिनयपदमङ्गीकरोति; यतस्तत्रापि तेनोक्तम् "अलौकिकभावं स्वाभिनयान्निर्वासयन्तः सुरचारित्रे वा, यक्षचारित्रे वा, गन्धर्वप्रकृतौ वा लोकातीतानामपरेषां स्वभावपरिचये वा मर्त्यसुलभं भावकदम्बकम् अवतारयन्तः सामाजिकानामनन्तां शान्तिं सम्प्रतिपादयितुं प्राचेष्टन्त"। साहित्यदर्पणकारेणोक्तं "तद् रूपारोपात्तु रूपकम्" इति; न तु सुरचारित्राभिनयकाले मर्त्यसुलभभावकदम्बकावतारणं सुरचारित्राभिनयः। इदमपि बोध्यं—सुरचारित्रे मर्त्यसुलभभावाभिनयं प्रति अलौकिकभावस्याभिनयान्निर्वासनेच्छा न कारणम् अपि तु सुरचारित्राज्ञता एवात्र कारणम् इति मन्यामहे। एकत्र लेखकेनोक्तम् "अधुना बहुभिरेव तौर्यत्रिकादिविविधवाद्यस्थले शङ्खघण्टादिभिरेव वाद्यकृत्यं सम्पाद्यते"। वयमत्र पृच्छामः किं नाम शङ्खघण्टावादनं नाट्यकलायाः "नितराम् अनुशीलनफलम्।" अधुना एतदेव पश्यामः इदानीन्तनी नाट्यकला तावद् वल्गाहीना अश्वेव इतस्ततो धावति, किन्तु लेखकेनोक्तं "तत्र वयं नवीनमतानुप्रवेशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नितराम् अनुरुन्ध्याम।" सत्यमेव "बहुमन्यन्त चामी तरलतरनाट्य-रसमधिजिगांसुभिः सामाजिकसम्प्रदायै"न तु यथार्थप्रेक्षकैस्तेषां लक्षणं तु भरतेनोक्तम् ;—

अव्यग्रैरिन्द्रियैः शुद्ध ऊहापोहविशारदः।
व्यक्तादोषोऽनुरागी च स नाट्ये प्रेक्षकः स्मृतः॥
यस्तुष्टे तुष्टिमायाति शोके शोकमुपैति च।
दैन्ये दीनत्वमभ्येति स नाट्ये प्रेक्षकः स्मृतः॥ इति। ......

अद्य अत्रैव विरमामः, कालान्तरे विषयेऽस्मिन् विशेषम् आलोचयितुम् आशास्महे, इति शम्।

परिषत्-प्रशस्तिः

[निबन्धकः—वा सा सूर्य्यनारायण-शास्त्री]

श्रीमद्गौतमपाणिनिप्रभृतिभिः शास्त्रैकनिर्मातृभि-
स्तुल्यारूढयशःश्रियः सुमनसो यद्गर्भकोशान्तरे।
जायन्ते शतशोऽनिशं त्रिभुवने नाराधितामोदया
सेयं मङ्गलवल्लिका विजयतां वङ्गावनी भारते॥ १

यद्गर्भशुक्तिमुक्ताः श्रीमद्रघुनाथधीर-जगदीशौ।
मथुरानाथसुधीन्द्रः सेयं बाभाति वङ्गभूरजिता॥ २

श्रीवासुदेव-रघुनन्दन-राघवेन्द्र-
गौराङ्गविश्रुतगदाधरसद्वरेण्याः।
यत्रावतीर्य जगतां शुभमावितेनु-
स्तद्वङ्गभूमिमहिमा न हि माति बुद्धौ॥ ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदर्शभूतचरिता जगतामगेय-
प्रारम्भसम्भृतमहोदयदुर्विदग्धा ।
सौजन्य-सद्विनयसंवलितात्मभूमा
वाचामतीतमहिमा ननु वङ्गसीमा ॥ ४

गीर्वाणवाग्विलसितानि पुरातनानि
सर्वाभिवन्द्य-रसभावनिरन्तराणि ।
शास्त्रानुरूपमभिनीय च रूपकाणि
सेयं बह्वपकुरुते परिषद् जगत्याः ॥ ५

श्री'चित्तरञ्जन'यशो-हरिचन्दनार्द्रा
श्रीमद् 'रवीन्द्र'कविताऽमृतपानमत्ता ।
विद्व'त्प्रफुल्ल''जगदीश' विशोधितार्थैः
संभूषिता लसति काचन वङ्गभूमिः ॥ ६

धीरोदाररसज्ञतादिसुगुणप्राग्भारविद्योतिनां
गङ्गा-प्लावितपावनान्तरलसद्वङ्गावनीजन्मनाम् ।
यावद्भारतकीर्तिरक्षणकलाधौरेयदोर्जाजुषां
वङ्गानामुदितोदिता विजयतां साहित्यविद्वत्सभा ॥७

नामावशिष्टविभवामपि देवभाषा-
मुद्धृत्य या स्थिरयशः समवाप्तुकामा ।
तां वङ्गसत्परिषदं बुधलोकमान्या
वाग्देवता भगवती परिपातु नित्यम् ॥ ८

जितं गोष्पतिरायेण स्वर्गीयेण महात्मना ।
जितं साहित्यपरिषत्-संस्थया तदुपज्ञया ॥ ९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी

(पूर्वतोऽनुवृत्ता)

[निबन्धिका—श्रीमती रेणुदेवी]

कथं वा नयनहीना साहसेनाश्रयं विजहाति। नेदं हितयमपीति मे निश्चयः। न चात्र विधेयो विदुषा परिहासः। सन्ति हि बहवः पण्डितम्मन्या मादृशा मूर्खा ये हित्रेष्वेव ग्रन्थेषु कथञ्चित् कृत-परिश्रमाः सर्वस्यैव जगतश्चेतनाचेतनयोर्गूढ़ादपि गूढ़तरं तत्त्व-निकरं करतलाकलितामलकवदवगतं मन्यन्ते। न च विश्वसन्ति धियमतीत्य वर्त्तमानिष्वर्थेषु। नहि क्षुद्रया विचारशक्त्या जगदीशितु-स्तत्त्वं मीमांसयितुमर्हन्तीति तमेव विभुम् असन्तं मन्यन्ते। कथ-मीदृशा अन्धाया रूपोन्मत्ततामवगच्छेयुः।

अथ क्रमेणानुसन्दधानस्तस्यामेव निशीथिन्यां हीरालालमप्यन्त-र्हितमश्रौषम्। हीरालालेन सह तया कृतः कुलत्याग इति प्रवृत्तः प्रवादः। अतो मया कृतोऽयं निर्णयो यथा हीरालाल एव तां वञ्चय-मानः समादाय समपससार। सुसम्पादा हि नयनहीनानां वञ्चना। गतेषु च केषुचिद्दिवसेषु समदृश्यत हीरालालः। मया च रजनी-प्रवृत्तिं पृच्छ्यमानो "न किञ्चिदपि जानामी"ति प्रावदच्च। किमिदानी-मनुष्ठेयम्। राजद्वारे अभियोगोऽपि निरर्थक एव। ज्यायांस्तु मे सहोदरो मया निवेदितवृत्तान्तो "दृढ़ं निपीड़य दुर्वृत्त"मिति व्याजहार। किन्तु तदपि विफलमेवेति मन्यमानस्ततोऽहं "य एव रजन्याः प्रवृत्तिम् अवगमयिष्यति, स एव महान्तमर्थसन्तानमवाप्स्यती"ति समन्तादुदघो-षयम्, किन्तु तदपि निष्फलमेव जातम्।

जन्मनः प्रभृति नयनहीना रजनी, किन्तु तन्नयनयुगलमवलोकयता नहि केनापि तथा शक्यते ज्ञातुम्। नहि नयनयोर्विलोकने कोऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषः प्रतिभाति। बृहत् सुनीलं भ्रमरकृष्णकनीनिकासनाथमतीव मनोहरं चक्षुः। किन्तु न विद्यते तत्र कटाक्षविक्षेपः। चाक्षुषस्नायुदोषेणेयमस्या स्नायूनां निश्चेष्टतया न वर्त्तते वस्तूनां प्रतिबिम्बग्रहणशक्तिः। सर्वाङ्गसुन्दरी खलु रजनी। समुद्भेदोन्मुख-नवीनकदलीदलकान्तिमभिभवति तस्या गौरकान्तिः। वर्षासु सलिलसम्पूरिता तरङ्गिणीव सम्पूर्णतां प्राप्ता घटनभङ्गी। गाम्भीर्य्यमण्डिता मुखश्रीः। गतिरङ्गभङ्गी च मृदु-धीरा, नयनहीनत्वेन कमपि सङ्कोचविशेषञ्च ज्ञापयतः। हसितमपि दुःखमान्तरम् अभिव्यनक्ति। सदास्मिन् स्थिरप्रकृति-सुन्दरे विग्रहे कटाक्षहीनां दृष्टिमवलोकयतां भास्कर्य्यपटुना शिल्पिवरेण यत्नेन विनिर्म्मिता पाषाणमयी प्रतिमा स्मृतिपथमलङ्करोति। प्रत्यभाच्च प्रथमत एव तां पश्यतो मे मनसि-यदनिन्दनीयमपि सौन्दर्य्यमिदं न मनसो मोहनहेतुः। नहि रूपवत्या अपि रूपमस्याः कमप्युन्मत्तं विधास्यति। नहि वर्त्तते नयनयोः सा मोहजननी गतिलीला। निरवद्यं सौन्दर्य्यमस्या विलोकयतां प्रकाममभिनन्दनीयं न वा विस्मृतिविषयः। स्थिरगभीरायास्तस्याः कान्तेरस्ति काचिदाकर्षणी शक्तिः। किन्तु अन्यदेव तदाकर्षणम् इन्द्रियसम्बन्धमतीत्य वर्त्तमानं तस्य प्रभावमभिभूय प्रवर्त्तते, यं जनाः पञ्चबाणमिति वदन्ति। अथवा किमेवमेव?

तदेतद् यदेव भवतु नाम, अहन्तु प्रायेण चिन्तयामि कोऽयमस्या दशापरिणामो भवितेति। इयमितरकुलोत्पन्नापि नेतरप्रकृतिमनुसरति, इति पश्यत एव प्रतिभाति। न च सम्भाव्यते सदन्वयाभिमानवता सहास्याः परिणयः। एतावतापि कालेन न सञ्जात इतरेण सह विवाहः। गृहकर्म्मप्रधान एव हि दारसंग्रहो दरिद्राणाम्। गृहकर्म्मस्वसमर्थां क इमां नयनहीनां दरिद्रः परिणेष्यति। को वान्यः सदन्वयजः साधारणवृत्तिपरायणामुद्वक्ष्यत्येनाम्। नयनहीना चेयमीदृशेन स्वामिना सहवासेन दुःखमेव प्राप्स्यति रजनी। कुतस्ताव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दस्याः सुखसम्भावना। दुरुच्छेद्यं कण्टककाननमन्तरा प्रयत्न-पालनीया यदियमुद्यानलतिकेव लब्धवती विसदृशे कुले जन्म, ततः कण्टकावृता तथैवानुभविष्यति मरणम्। कथं वा मयास्या गोपालेन सह परिणयाय प्रयत्नो विहितः। न सम्यगवगच्छामि, किन्तु कनिष्ठाया मातुराग्रहातिशयः समुत्तेजनानैरन्तर्य्यञ्चात्र निदानमित्यपि सत्यमेव। किञ्च, या न शक्यते स्वयं परिणेतुं तस्याः परिणयप्रयत्नोऽपि मनोरथविषय एव।

अथैवं निशम्य सुन्दरोचयः सुमधुरं विहस्य यदि पृच्छति "किं रजनीं परिणेतुं साभिलाषं ते मानस"मिति ? नैवमिति मे तत्र प्रत्युत्तरमवगन्तव्यम्। सत्यमिदं यदियमलोकसामान्यमाधत्ते सौन्दर्य्यं, तथापि नीचकुलजेयं नयनहीना च। न च शिक्षालोकरेखासम्पातेन समुज्ज्वलमस्या हृदयम्। अतो नेयं मे परिणययोग्या, न वा तादृशो मे मनोरथः। न वा परिणये पराङ्मुखं मानसं मे। दुर्लभा तु मनोरथानुरूपा महिला। (क्रमशः)

आवाहनम्

[निबन्धकः—श्रीहरिहरशास्त्री]

एहि मातरयि भारतवर्षं
वितनु जगति पुनरुज्ज्वलहर्षम्।
अशन-वसन-सुख- हानि-मलिनमुख-
सुल्लासय करुणामयि तूर्णं
कुरु कुरु भूतलमुत्सवपूर्णम्॥ १

अयि गिरिनन्दिनि खण्डय शोकं
जायमानमनुदिनमधिलोकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शान्ति-निहन्ता हन्त समस्ता-
दाधिरुपैति विकासमजस्रं
शमय तस्य परिणाह-सहस्रम् ॥ २

दधति कथं ते क्लेशविशेषां-
स्त्वमसि दयामयि जननी येषाम् ।
सकल-कलुषभर- मचिरमेव हर
दमय भुवनगत-विपदभिघातं
विलसतु सततमनाविलशातम् ॥ ३

विदधतु निरवधि तव परिवाराः
शान्तिरहित-हृदि मङ्गलधाराः ।
हरताद् गणपति- रखिलविघ्न-तति-
मिन्द्रमुकुटमणि-दीधिति-पातः
स्मितर्यात यस्य चरणमयि मातः ॥ ४

क्षीरसिन्धुदुहिता हितदृष्ट्या
पश्यतु तनयगणं प्रति दिष्ट्या ।
विभव-विरहजनु- रशुभभयं ननु
जननि चिरादपगच्छतु दूरं
भुवनमुपैतु विमलसुखपूरम् ॥ ५

निखिलशक्तिलसिते ! तव दासाः
कथमिह सन्तु जगति विफलाशाः ।
शक्तिधरस्ते कर्मणि शस्ते
सपदि योजयतु सेवकवृन्दं
सृजतु च खलु सफलत्वमनिन्द्यम् ॥ ६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृत-बोधविधुरास्तव तनया
विपदा क्लिश्यन्त्यनुदिनमनया ।
वाग्देवी किल निदधातु निखिल-
मानवेषु दयमान-दृगन्तं
स्फुरतु च दिशि दिशि कुशलमनन्तम् ॥ ७

एवमेव जननि प्रतिवर्षं
घटय तवागमहर्षणवर्षम् ।
हिमगिरिबाले मुञ्चतु काले
जलदश्रेणिरुचित-जलधारां
लभतामवनी शान्तिमुदाराम् ॥ ८

भिषक्प्रवर-स्वर्गीय-

शीतलचन्द्रचट्टोपाध्याय-कविरत्नः

[निबन्धकः—श्रीकालिदासचतुर्धुरीण-काव्यतीर्थः एम्. ए]

यः खलु महात्मा स्वकीयादम्याध्यवसायेन सुतीक्ष्णप्रतिभया च षोड़शवर्ष-देशीय एव स्वजीविकामुपार्जयन् अशेषाणि शास्त्राणि च अधीयानो भिषग्वरत्वमुपागतो दीनानाम् आर्त्तानां भूय्युपकारं विदधत् सर्वेषां चिरस्मरणीयतां गतः, स भिषक्पतिः शीतलचन्द्र आषाढ़स्य द्वाविंशदिवसे शनिवासरे अमावस्यायान्तिथौ स्वजनान् शोकान्धकारे निक्षिप्य चिराय अस्तमितः। तस्य सौम्याकृतिं लोकहितकरानुष्ठान-प्रयत्नं च निरीक्ष्य मन्यामहे यत्, स्वयमेव तारापतिः स्वर्गस्थितः कलङ्क-लाञ्छितम् अभिधानं परिजिहीर्षुरिव निष्कलङ्को विधुर्भवितुं खुलना-प्रदेशान्तर्गत-मागुराग्रामे विशुद्ध-कुलीनवंशे जन्म परिजग्राह। बाल्ये पितृहीनत्वात् कथमपि प्राप्तवयाः षोड़शवर्ष-देशीय एव जीविकार्जन-मावश्यकं मन्यमानः असमाप्तविद्याभ्यास एव वङ्गविद्यालयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्यचित् शिक्षकत्वमुपगतः संस्कृतव्याकरण-काव्यादीनि अध्यापनावसरे अधिजगौ। संस्कृतभाषायां लब्धव्युत्पत्तिः स आयुर्वेदमभ्यास्यत्। तीक्ष्णप्रतिभाबलेन अल्पेनैव कालेन सविशेष-पारदर्शितामायुर्वेदशास्त्रेष्वियाय। स्वग्रामे दीर्घकालं चिकित्सारतो लोकानां बहुप्रकारं साधितवान्। तस्मिन् महात्मनि स्वग्राममधिवसति ग्रामवासिनो निःशङ्कमानसाः कालं निन्युः। समाजस्थितविभिन्नवर्णानां मध्ये यथा कोऽपि विवादो न जायते तथासौ यतते स्म। सम्भावितविवादानाम् आरब्धानां वा तेषां प्रशमनाय सर्वदैव अचेष्टत, प्रशमनकर्त्तरि तस्मिन् परस्परं विवदमाना जना अतिष्ठन्त। बहुसंख्यका गाः पालयन्नसौ महात्मा स्वग्रामस्थितेभ्यो दुर्बल-दरिद्ररोगिभ्यो दुग्धोपकार्य्येभ्यो दुग्धम् औषधञ्च वितरन् प्रभूतं नरसेवापुण्यम् अर्जितवान्। खुलना-प्रादेशिकबोर्डाख्यसभायाः सदस्यत्वं गच्छन्नधिकविंशानि वर्षाणि सदस्यकार्य्यं चकार। एकदा भीषणे दुर्भिक्षे सञ्जाते राजकीयसाहाय्य-प्रदत्ता लक्षसंख्यका मुद्राः स्वहस्तेन दरिद्राणामन्नाभावदूरीकरणे एवम् अर्थशौचं रक्षन् व्ययितवान् यत् जेलाशासनकर्त्ता म्याजिष्ट्रेट्बाहादूरः केनचित् विशिष्टसम्मानसूचकोपाधिना एनमलंचिकीर्षुः स्वमतम् अज्ञापयत्। अमुष्मिन् ऋषिकल्पे महात्मनि स्वकीयसम्मानसूचकोपाधिं प्रत्याख्यातवति साहेबमहोदयस्तस्य तुष्टिं विधित्सुः पुनरपि विकल्पेन किमिपेष इत्यपृच्छत्। असौ "स्वग्रामस्थिताङ्गलविद्यालयगृहम् इष्टकनिर्म्मितं कारयत्वि"त्यब्रवीत्, तथास्तु इत्युक्त्वा तेन जेलाशासकेन अष्टौ सहस्राणि मुद्राणां मागुराविद्यालयगृहनिर्म्माणार्थं दत्तानि। एवं परहितव्रतोऽसौ सुधीवरः खुलनाप्रदेशवासिनां सर्वेषां मनांसि रञ्जयामास। आसन्नत्रिंशानि वर्षाणि स्वप्रदेश-सेवाकार्य्ये रतः, स्वग्राममधिवसन्नसौ स्वपुत्रयोः शिक्षार्थं कलिकातावासिनां भिषजां सनिर्बन्धानुरोधरक्षार्थं च कलिकातामधिवस्तुमायातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रागतस्य तस्य चिकित्सानैपुण्यं स्वल्पेनैव कालेन साधारणेषु प्रचारं गतम्। दर्शनशुल्कं विनासौ स्वभैषज्यालयमागतानां रोगिणां रोगं परीक्ष्य औषधादीनि व्यवस्थापितवान्। औषधादीनि च आमरणात् स्वयमेव पर्य्यवेक्ष्य विशुद्धोपादानेन शास्त्रोक्तविधिना निर्म्मितानि अकरोत्। औषधमूल्यञ्च सर्वदेव मध्यवित्तानाम् आर्थिकावस्थानुरूपं कृतवान्। महात्मा शीतलचन्द्र इव सुचिकित्सको विरल एव। सत्यपि तस्य चिकित्सानैपुण्ये सत्स्वपि तस्य बहुसंख्यकेषु रोगिषु स कदापि उत्तरोत्तरं दर्शनशुल्कं नावर्द्धयत्, नापि गृहागतेभ्यो रोगिभ्यो दर्शनशुल्कं स्वेच्छया आदत्त। परोपकारप्रवृत्तिस्तस्य एवं महती आसीत् यत्, ज्वरचिकित्साभिधानं स्वायत्तचिकित्साभिधानञ्च ग्रन्थद्वयं विरचय्य न केवलं साधारणानाम् अपि तु सर्वेषां भिषजाम् एतत्पुस्तकद्वयं अधीयानानां बहूपकारं साधितवान्। उभयोर्ग्रन्थयोर्ये च मुष्टियोगाः यानि च औषधानि उक्तानि तानि सर्वाण्येव दृष्टफलानि। स्वयमभिज्ञतया येषाम् औषधानां मुष्टियोगानां च फलं प्रत्यक्षीकृतवान् तान्येव ग्रन्थद्वये प्रकाशितवान्। ईदृशम् औदार्य्यम् ऋषिकल्पे शीतलचन्द्रे दृश्यते। त्यागशीलोऽयं भिषग्वरो न केवलम् अर्थेप्सुः परं परोपचिकीर्षुरपि आयुर्वेदचर्चामकरोत्। अहो तस्य अभावेन आयुर्वेदीयचिकित्साया महती क्षतिः सञ्जाता। विशुद्धायुर्वेदीयचिकित्साकुशलस्तादृशो नासीत् कोऽपि, नापि जनिष्यते कश्चित् अस्मिन् पाश्चात्त्यचिकित्सा-प्रादुर्भावाकुले जगति। चिकित्साकार्य्यभारं तस्य ज्येष्ठपुत्रे कविराजप्रवरे श्रीयुक्त-शचीन्द्रनाथे न्यस्य द्वितीयपुत्रं श्रीयुक्त-यतीन्द्रनाथं च राजकीयकार्य्ये विनियोज्य असौ सम्पादितकर्त्तव्य एकाशीतितमवर्षे स्वर्गमगात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोदूतम्

(पूर्वतोऽनुवृत्तम्)

श्रीचैतन्यदेवमातुल-कवीन्द्र-विष्णुदासविरचितम्

[श्रीचिन्ताहरणकाव्यतीर्थ-(एम्-ए) सम्पादितम्]

यस्याङ्घ्रिपङ्करुहि पाणितलं नखेन्दु-
बिम्बे दृगञ्चलपुटं श्रवणं कथायाम्।
चेतः प्रसादकणिकैकमहोत्सवेऽपि
प्राणैः समं विदधतं व्रज नीरजाक्षम् (?) ॥ ६३ ॥

कङ्केल्लिकोमलदलोपरि जृम्भमाण
मल्लीशिरीषपरिकल्पितचारुतल्पे।
उद्यद्धमुग्धकुसुमावलिमाकरन्द-
गन्धभ्रमद्भ्रमरझङ्कृतिसंभृतेऽपि ॥ ६४ ॥

वल्लीकुटीरकुहरे तमुपेहि मन्द-
मन्दं समीरणसमीरितपल्लवाग्रे।
आभीरिकाभिरभितः पदपाणिपद्म-
संवाहनग्रहपराभिरुपास्यमानम् ॥ ६५ ॥

लीलाश्रमाम्बुचयचुम्बितकृष्णगौर-
तन्वोस्तयोरभिमुखं हरि-गोपवध्वोः।
अन्योऽन्यदेहरुचिर-प्रतिबिम्बयोगाद्
गौरो हरिः किमपि गोपवधूश्च कृष्णा ॥ ६६ ॥

---

63. इतः श्लोकत्रितये पङ्क्तिविशेषा मसीनाशात् अस्पष्टतामुपगताः I पुस्तके। b कथायाम्—D. कथायाः—I.

66. a -श्रमा—D. -श्रया—I. -पद्म—D. -कृष्णा—I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतः कलिन्ददुहितुः पुलिनं नवीनं
वृन्दावनं रसमयं समयो वसन्तः ।
गोपाङ्गनास्तरुणिमामृतपूरपूर्णाः
कृष्णः कलाकुलगृहं किमहं ब्रवीमि ॥ ६७ ॥

एतान्यनन्तरसवन्ति शिवं वहन्ति
वृन्दावनान्तविहितानि हितानि जन्तोः ।
पेयानि कर्णपुटकेन तथा त्वयैव
ध्येयानि मानस हरेश्चरितानि तानि ॥ ६८

पीताम्बरं परिगृहीतपराङ्गनं वा
गोपीः परं पुरुषकान्तमुपेयुषीर्वा ।
मासूय मानस परं नहि तस्य विश्वं
विश्वस्य सोऽपि हि परो न तदात्मकत्वात् ॥ ६९ ॥

यासां करेषु करमोक्षणमोक्षणेषु
गण्डेषु गण्डमधरेषु तथाधरञ्च ।
वक्षस्तटेषु हृदयाभिविलीय वक्षः
सम्मानयन् मनसिजं विजहार कृष्णः ॥ ७० ॥

शृण्वन्ति कर्णपुटकेन हृदा नमन्ति
गायन्ति सुक्तरसनेन दृशा पिबन्ति ।
लक्ष्मीप्रियं करतलेन पदे स्पृशन्ति
या निर्भरं स्तनतटेन परिष्वजन्ते ॥ ७१ ॥

69. b -मिष्ट—D. -कान्त—I.
70. d विलुप्तैवैषा पङ्क्तिः I पुस्तके ।
71. c विलुप्तैवैषा पङ्क्तिः I पुस्तके ।

६९ । कृष्णस्य विश्वात्मकत्वात् अत एव विश्वाभिन्नत्वात् गोपीभिः रमणं न दोषावहम् इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तासाञ्च मानस मुकुन्दपदारविन्द-
द्वन्द्वाहितेहितमनस्तनुजीवितानाम् ।
प्रेमोत्तराणि चरितानि हरिप्रियाणां
गेयानि वल्लवकुरङ्गविलोचनानाम् ॥ ७२ ॥

यानि व्रजेऽर्कदुहितुः पुलिने जले वा
वृन्दावने च सुरवैरिण ईहितानि ।
आर्त्तेन मानस-सुखान्यपि सम्यगीता-
न्युद्देश्यमन्यदिति तानि न वर्णितानि ॥ ७३ ॥

दीनाधमार्त्तपतितानभिसन्धिबन्धोः
श्रीपुण्डरीकनयनस्य कृपैकसिन्धोः ।
पादाम्बुजन्मनि मनः समयं समोक्ष्य
यत्नान्मदीरितमिदं विनिवेदनीयम् ॥ ७४ ॥

आपादमस्तकमयं दुरितार्णवान्त-
र्मग्नश्चिरं निगडितो हतवासनाभिः ।
दत्ताभयं चरणतामरसं तवेद-
मुद्दिश्य कोऽपि मधुसूदन रारटीति ॥ ७५ ॥

---

72. b. d प्रायेण विलोपमिवोपगतमेतत् पङ्क्तिद्वितयं I पुस्तके ।

74. a नानाधमा—D. दीनाधिमा—I, d -न्मदीरित—D, -न्मदीषित—I.

75. a दुरितारन्तः—I. b निपतितो भववासनाभिः—I.

७२। मुकुन्दपदारविन्दद्वन्द्वे आहितं न्यस्तम् ईहितं च मनश्च तनुश्च जीवितञ्च याभिस्तासाम् । हरिप्रियाणां हरिः प्रियो यासां तासां, यद्वा हरेः याः प्रियास्तासामिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीनं यथोचितनिजाचरणैर्विहीनं
हीनं परं परमपापमहाधुरीणम् ।
एकं त्वदीयचरणं शरणं स्मरन्तं
सीदन्तमन्तकभयादनुकम्पयेश ! ॥ ७६ ॥

यत् कामदं चरणतामरसं तवेदं
स्वप्नेऽपि तन्न खलु सेवितमेव देव ।
मामन्तकान्तिकमनन्त परिभ्रमन्तं
पाहीति दग्धवदनः कति वावदीमि ॥ ७७ ॥

ध्यातं न तेऽङ्घ्रिकमलं कमलाङ्करत्नं
गीतं न वा निखिल-मङ्गलधाम नाम ।
नाकर्णितं जगदनर्घ्यतमं चरित्रं
किन्तत् प्रभो विहितमार्त्तहिताय यत् स्यात् ।७८॥

यातं दिनं किमिति यामवतीयमग्रे
साप्याजगाम विरतिं दिनमेति भूयः ।
एवं स्वपस्वनपटुर्मधुकैटभारे
न त्वां स्मरामि न भजामि न चाश्रयामि ॥ ७९ ॥

---

77. c -न्तिकपरं परितस्त्रसन्तं—D. d वावदीनि—I.

78. b -मङ्गलधाम नाम—D. -नाम तवात्र नाम—I. c विचित्रं—I. चरित्रं—D. -स्ति विहाय—I. -र्त्तहिताय—D.

79. d न भजामीत्यत्र नेति लुटितं I पुस्तके ।

---

७९ । यामवती निशा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वां ब्रह्ममौलिमुकुटाग्रमरीचिपूर-
नीराजिताङ्घ्रिकमलं कमलालयेश ।
धन्याः स्तुवन्ति कथयन्ति जपन्ति शृण्व-
न्त्युत्कीर्त्तयन्ति विलपन्ति विलोकयन्ति ॥ ८० ॥

क्वौ-भीति-वीतहृदयः क्षितिपृष्ठधूलि-
सन्दोहधूसर-तनुर्विलपन् मुकुन्दम् ।
उन्मत्तकेशवसनः परिमुक्तकण्ठ-
मुत्कण्ठितः क्व परितः परिरोरुदीमि ॥ ८१ ॥

ईहामहे न हि महेन्द्रपदं मुकुन्द
स्वीकुर्महे चरणदैन्यमुपागतं वा ।
आशां पुनस्तव पदाब्ज-कृताधिवासाम्
आशास्महे चिरमियं न कृशा यथा स्यात् ॥ ८२ ॥

कोटिः शिरांसि मम सन्तु शिरोऽनु कोटि-
र्वक्त्राणि वक्त्रमभितो रसनाश्च कोटिः ।
वाग्घोपतेऽनुरसनं परितस्तवैव
नामानि कोटिरनुकोटियुगं स्फुरन्तु ॥ ८३ ॥

आकाङ्क्षणीयममरैरपि मर्त्त्यदेहं
लब्ध्वापि दुर्ल्लभतमं किमहं करोमि ।
गोविन्द यत् सुरमुनीन्द्रजनैकवन्द्यं
नाराधयं किमपि ते चरणारविन्दम् ॥ ८४ ॥

---

80. a चन्द्रचूडमुकुटालिमरीचि—D. ब्रह्ममौलिमुकुटाग्रमरीचि—I, b -नरेश—I. लयेश—D. c जपन्तीति लुटितं I पुस्तके ।

81. a -वीति—I. -वीत—D. b विलपन्—D. वितपन्—I.

82. b तरल—I, चरण—D.

84. d -महं—D. I, -तमं—D. (margin)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्दामपामरजराविधुरं शरीरं
नीरन्ध्रमाकुलितमामयसङ्करेण ।
दुर्वासनाभिरनिशं पिशिताशनाभि-
राक्षप्स्यते तत दूत: शरणं त्वमीश ॥ ८५ ॥

असृष्ट एव धन-दार-तनू-तनूज-
मानापमानकुलशीलविचिन्तनेन ।
अज्ञातदिग्विदिगनन्यपर: परेश
मन्त: स्मरन्नविरतं क्व नु बंभ्रमीमि ॥ ८६ ॥

मुक्तिर्न कर्णपथमेति किमिव सिद्धि:
कारुण्यपुण्यनिलयार्थनमेतदेव ।
त्वां ध्यायत: क्वचन काननसन्निवेशे
शेषं प्रयान्तु मम जन्मशताहृतानि ॥ ८७ ॥

जन्मावसानमपि जन्म तथावसानं
यत्र क्वचिन्मम सुरोत्तम जाघटीतु ।
किन्तु श्रुतिं स्पृशतु कापि सुधाप्रवाह-
सन्दोहनिर्भरपटुर्भवदीयवार्त्ता ॥ ८८ ॥ (क्रमश:)

---

86. a एव—D. बम्भ्—I.

87. a मूर्त्तिर्न मुक्ति—1. मुक्तिर्न मुक्ति—D. मुक्तिर्न कर्ण—D. (margin)

d शताकृतानि—D. I, शतानि तानि, शताहृतानि—D. (margin)

८५। पिशिताशनाभि: राक्षसीभिरिव दुष्टवासनाभिर्मदीयं शरीरं चाक्षप्स्यते इत्यर्थ: ।

८७। हे कारुण्यपुण्यनिलय एतदेव अर्थनं प्रार्थनम् । जन्म- शताहृतानि कर्म्माणीति शेष: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविदिषा

(पूर्वानुवृत्ता)

[निबन्धकः—श्रीउपेन्द्रनाथ-सेनगुप्तः काव्यतीर्थः]

ननु जरामरणादिदुःखजातं कथमुत्पद्यते ? सर्वं दुःखं जातिप्रत्ययं जन्मास्ति दुःखं मरणञ्चास्ति, यदि जन्म न स्यात् तदा मरणमपि न स्यात्। कुतो जन्म भवति ? भवात्, यतो भवः सत्तास्ति ततो जातिः, यदि सत्ता न स्यात्, तदा जातिरपि न स्यात्। स च भवः उपादान-प्रत्ययः, यत् किल वाह्यं जगद् उप समीप आदत्ते तदुपादानम्, असत्यु-पादाने भवो नश्यति। उपादानन्तु तृष्णाप्रत्ययं, तृष्णा वासनाख्या, असत्यां तृष्णायाम् उपादानं नश्यति। वेदनाप्रत्यया तृष्णा, वेदना तु विषयानुभूतिरूपा, असत्यां वेदनायां तृष्णा नश्यति। वेदना पुनः स्पर्शप्रत्यया, स्पर्शस्तु विषयैः समम् इन्द्रियाणां स्पर्शः सम्बन्धो वा, असति स्पर्शे वेदना नश्यति। स्पर्शस्तु षडायतनप्रत्ययः, षडायतनानि तु षडिन्द्रियाणि, पञ्च ज्ञानेन्द्रियाण्यन्तःकरणञ्च। नामरूपप्रत्ययं षडा-यतनम्, तत्र नाम वेदनासंज्ञासंस्कारविज्ञानानां समाहारः, रूपन्तु क्षित्यप्तेजोमरुतां भूतानां चतुष्टयस्य समष्टिः, नामरूपे एकीभूय पञ्चस्कन्धान् घटयतः। असतोर्नामरूपयोः षडायतनानि नश्यन्ति। विज्ञानप्रत्यये नामरूपे, विज्ञानं पुनर्वृत्तिविशेषः। या वृत्तिः सुख-दुःखहर्षलज्जादिप्रत्ययान् सम्बध्नाति प्रत्ययानां धारावाहिकज्ञाने च कारणं भवति, सर्वान् प्रत्ययान् यथायथं सन्निवेशयति, स्वकर्मणि विनि-युङ्क्ते च तच्चिच्छक्त्यात्मकं किञ्चित्। असति विज्ञाने नामरूपे नश्यतः। संस्कारप्रत्ययं विज्ञानम्। स्मृतिवितर्कविचारप्रीति मोहाद्या द्विपञ्चाशच्चित्तवृत्तयः संस्कारनाम्नाभिधीयन्ते, समासेन सर्वा एव चित्तवृत्तयः संस्कारा इत्यभिधीयन्ते। असति संस्कारे विज्ञानं नश्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविद्याप्रत्ययः संस्कारः। असत्याम् अविद्यायां संस्कारनिरोधः। तस्याश्चाविद्याया निरोधोऽष्टाङ्गयोगमार्गानुशीलनेन भवति। कोऽसावष्टाङ्गयोग इति उपरिष्टाद्वक्ष्यते। सङ्क्षेपत इदमेव भगवता बुद्धेनाविस्तृतं सत्यम्। एतानि द्वादश निदानानि इति बौद्धशास्त्रे प्रथितानि। अयमेव प्रतीत्य-समुत्पादः कथ्यते। अथेदानीं कोऽयं वस्तुशून्यवादो नामेति तदालोच्यते। अविद्यायां नष्टायां किमवशिष्यते? ननु शून्यमेव। ननु किमिदं शून्यं नाम, सर्वेषां वस्तूनामत्यन्ताभावरूपम् उताहो भावरूपं किञ्चित्? तत्र बौद्धविद्वेषिणः सर्व्वं एव टीकाभाष्यादिकृतः सर्वेषां वस्तूनामत्यन्ताभावरूपं शून्यमेव शून्यशब्देन जगृहुः। स्वभाववादिनः केचिदर्वाचीनबौद्धशास्त्रप्रणेतारश्च शून्यशब्दस्य तथाविधामेव व्याख्यां चक्रुः। परं—प्राचीनबौद्धशास्त्रे शून्यशब्दस्य तादृशी कापि व्याख्या न लभ्यते, भगवान् बुद्धोऽपि शून्यशब्देन तथाविधं किञ्चिन्न बोधयामास। बुद्धेन कोऽपि शास्त्रग्रन्थो न विरचितः। धर्म्मकीर्त्तिनामा कश्चित् बौद्धाचार्य्यः स्वकृतग्रन्थे शास्त्राणि तु "तद्विनेयाः प्रचक्रिरे" एवमुक्तवान्। बुद्धस्य मतमप्यर्वाचीनकाले विभिन्नप्रकारैर्व्याख्यातं विभिन्नशिष्यैर्विकृततां प्रापद्यत। तथा च बोधिचित्तविवरणे श्रूयते—

"देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्नापि देशनाभिन्ना शून्यताद्वयलक्षणा॥"

अपि च भगवता बुद्धेन यादृशो योगोऽनुष्ठितः, तेनाभावात्मकं शून्यं नासाद्यते, परं भावरूपं वैदान्तिकानां परमात्मेव किञ्चित् वस्तु। निरवलम्बनस्य मनसोऽवस्थितिर्न सम्भवति। एतत्तु शून्यं काठानां ब्रह्मवस्त्विव,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते॥

कठ १।३।१५

इदमपि शून्यं बलहीनेन न लभ्यते, अस्यापि—

क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।

कठ १।३।१५

अत एव (अष्टसाहस्रिका) प्रज्ञापारमितायां षोड़शपरिवर्त्ते—"गम्भीरेयं देवपुत्राः प्रज्ञापारमिता दुरभिसम्भवानुत्तरा सम्यक् सम्बोधिः परमदुरभिसम्भवाऽनुत्तरा सम्यक् सम्बोधिरभिसम्बोद्धुं दुष्प्रज्ञैर्हीनवीर्यै-र्हीनाधिकमुक्तिकैरनुपायकुशलैः पापमित्रसंसेविभिः।" अपि च तत्रैव "शून्यत्वाद् भगवन् सर्वधर्म्माणां न स कश्चिद्धर्म्मः संविद्यते यो धर्म्मः शक्योऽभिसम्बोद्धुम्। तथा हि भगवन् सर्वधर्म्माः शून्या, यस्यापि भगवन् धर्म्मस्य प्रहाणाय धर्म्मो देश्यते सोऽपि धर्म्मो न संविद्यते, एवं यश्चाभिसम्बन्धेतानुत्तरां सम्यक् सम्बोधिं यच्चाभिसम्बोद्धव्यं यश्च जानी-याद् यच्च ज्ञातव्यं सर्वं एते धर्म्माः शून्याः।" अत एव शून्यमिदं—

"यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छति।
तं देवा सर्वेऽर्पितास्तदु नात्येति कश्चन॥" इति

(कठ० २।४।९)

कठोल्लिखितवस्तुवत् किञ्चित्। अपि च—प्रज्ञापारमितायाम-ष्टादशपरिवर्त्ते,—"शून्यतायाः सुभूते एतदधिवचनं यदेतद् गम्भीर"-मित्यादित आरभ्य—"ये च सुभूते शून्या अक्षया अपि ते। या च शून्यता अप्रमेयतापि सा तस्मात्तर्हि सुभूते एषां धर्म्माणामर्थतो विशेषो वा न नानाकरणं वा नोपलभ्यते। अभिलापा एते सुभूते तथागते, नाख्याता अभिलपिता अप्रमेयमिति वा असंख्येयमिति वा अक्षय-मिति वा शून्यमिति वा अनिमित्तमिति वा अप्रणिहितमिति वा अनभिसंस्कार इति वा अनुत्पाद इति वा वाऽजातिरिति वाऽभाव

५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वा विराग इति वा निरोध इति वा निर्वाणमिति वा।" अत्रा-भावो विषयाणामिति वेदितव्यम्। वस्तुतः प्राचीनबौद्धाः कुत्रापि शून्यं सर्वेषां वस्तूनामत्यन्ताभावरूपमिति नाभिहितवन्तः। शून्यस्य भाव-रूपत्वे अद्वैतत्वसिद्धौ च वेदान्तिकानां ब्रह्मवस्तुना तस्याभेद एव मन्तव्यः। अत्र वैदेशिकस्य कस्यचित् महापण्डितस्य निर्वाणविषयक-मतमुल्लिख्यते, तेन तु बौद्धशास्त्रं भूयो भूयः समालोच्य लिखितमिदम्—

"Nirvana is not a state of pure nothingness. It is a form of existence of which none of the qualities pre-sented in the constant flux of experience can be pre-dicated, which therefore, appears nothingness to us in comparisen with the states with which existence has familiarised us. It is deliverance from all needs and sorrows, from hate and passion, from birth and death. It is only to be attained by the highest possi-ble concentration of thought and will. In the mysti-cal concept of God (of the German mystics) as well as in the Buddhist conception of Nirvana, it is precise-ly inexhaustable possibility which bursts through eve-ry conceptual form and makes every determination an impossibility." (Prcf. Harold Hoffdng , of Copenheglue.)

अस्यार्थसारस्तु,—बौद्धशास्त्रस्य निर्वाणपदं सर्वेषामभावानामत्यन्ता-भावरूपं किमपि असन्नावबोधयति। सर्वदानुभूयमानानां विषयाणां केनापि (निर्वाणाख्य-भावरूपं) इदं वस्तु प्रकाशयितुं न शक्यते अतः अस्मदनुभूतैर्वस्तुभिरस्य सादृश्याभावाद् इदं शून्यरूपेण प्रतीयते। रागद्वेषजन्ममृत्युप्रभृतिसर्वदुःखाद् विमुक्तिरेव निर्वाणम्, श्रेष्ठसमाधि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैवेदमधिगन्तव्यम्। शर्म्मराज्य (जारमानी) देशीयानां रहस्यरसिकानां दार्शनिकानाम् ईश्वरसम्बन्धीयं ज्ञानं बौद्धानां निर्वाणविषयकञ्च ज्ञानं— नितरामेव भावरूपत्वं व्रजतः, परं केनापि ज्ञानविपर्ययेण ज्ञानमिदं निरूपयितुं न शक्यते। (पण्डितप्रवर हेराल्डहफडिङ्गस्य ? कोपेन हेगेनवासिनः)

बौद्धानां शून्यवादं चणिकवादञ्च प्रायेण सर्वे एव भाष्यकृतः समधिकृतवन्तः। पातञ्जलदर्शनस्य व्यासभाष्येऽप्यस्ति कश्चिन् महान् अवयवी यः परमाणुपुञ्जानां समष्टिमप्यतिशेते इति प्रतितिष्ठापयिषुणा भाष्यकारेण "यस्य पुनरवस्तुकः स प्रचयविशेषः सूक्ष्मञ्च कारणमनुपलभ्यमविकल्पस्य तस्यावयवाभावात् अतद्रूपप्रतिष्ठं मिथ्याज्ञानमिति प्रायेण सर्वमेव प्राप्तं···मिथ्याज्ञान"मित्येवंविध-वाक्यैः बौद्धमतमाक्रान्तं दृश्यते, एवमन्यत्रापि। यदि शून्यत्वं निर्वाणञ्च भावरूपं किञ्चित् तदा तस्मिन् प्रायेण सर्वेषामेव प्रतिपक्षस्थापित-दोषाणां निरसनं स्यात्। भगवता बुद्धेन अहिंसादयो ये धर्म्माः प्रचारिताः, वेदादौ भारतादौ च तेषां बाहुल्येनैव प्रचारो दृश्यते। तथा च महाभारते—

"अहिंसा सत्यमक्रोधः सर्वाश्रमगतं तपः।

(शान्ति० १९१।१५)

न भूतानामहिंसाया ज्यायान् धर्म्मोऽस्ति कश्चन।
यस्मान्नोद्विजते भूतं जातु किञ्चित् कथञ्चन॥

(शान्ति० २६१।३०)

ऋषयो ब्राह्मणा देवाः प्रशंसन्ति महामते।
अहिंसालक्षणं धर्मं वेदप्रामाण्यदर्शनात्॥

(अनु० ११४।२)

अहिंसा परमो धर्म्मस्तथाहिंसा परं तपः।
अहिंसा परमं सत्यं यतो धर्म्मः प्रवर्त्तते॥ (अनु० ११५।२४)
तदेतदुत्तमं धर्म्ममहिंसा धर्म्मलक्षणम्। (अनु० ११५।७८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहिंसालक्षणो धर्म्म इति धर्म्मविदो विदुः !

(अनु० ११६।२१)

मन्वादिस्मृतिसंहितादिषु अहिंसामैत्रीप्रभृतीनां प्रशंसा कृता। तथा च मनौ—

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।

अहिंसया च भूतानाममृतत्वाय कल्पते॥ (मनु० ६।६०)

अपि च भगवान् मनुः स्वकृतसंहितायामेकत्र जीव-नाशभिया भूमिकर्षणमपि निषेधन् बुद्धेन याहिंसा प्रचारिता तामेवाहिंसां समादृतवान्। अन्येष्वपि स्मृतिसंहितादिषु तन्त्रेषु च—बौद्धमतसमर्थकं पर्य्याप्तं वस्तु विद्यते, अत्र तु निबन्धस्य दैर्घ्यभिया अस्माभिस्तेषामाकलनात् विरम्यते। केचन बौद्धा आत्मानं नाङ्गीकुर्वन्ति इति तन्मतं दूषयन्ति, अपरे च केचन असद्वादिनो बौद्धा इति तन्मते दोषं पश्यन्ति। यदि शून्यं भावरूपं तत्त्वं स्यात् तर्हि आत्मेति शब्दमात्रस्य अव्यवहाराद् बौद्धा नापराद्धवन्तः किमधिकं वेदेऽपि केवलम् ऋग्वेदीय-नासदासीयसूक्ते एव स्फुटतरो वेदान्तवादवाक्ये अनुभूयते नान्यत्र, न तेन अन्येषां वेदानां क्वापि अनुपपत्तिरसमादरो वा। असद्वादस्तु उपनिषद्यपि दृश्यते, तथा च—"असद्वा इदमेवाग्र आसीत्" इत्यादि श्रूयते। (तैत्ति० (२।७) विभिन्नप्रस्थानानां संवाद उपनिषद एव लभ्यते तथा च,

"कालस्वभावो नियतिर्यदृच्छा

भूतानि योनिः पुरुषः इति चिन्त्यम्!

संयोग एषां न त्वात्मभावा-

दात्माप्यनीशः सुखदुःखहेतोः॥ (श्वेता० १।२)

इत्यादि श्वेताश्वतरवाक्यं सर्वेषां विदितम्। बुद्धेन कीदृङ्मतं समाहितं तन्निश्चयेन वक्तुं न शक्यते, परं तन्मतं यद्भवति तद्भवतु, तस्मात् प्रागपि तस्य प्रचार आसीत्। अत एव भगवता बुद्धेन नूतनं किञ्चिन्न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचारितम्, परन्तु तदाविर्भावसमये अन्तःशुद्धिरहितानां शुष्ककर्म्म-काण्डरतानां प्रादुर्भावेण धर्म्म आकुलितो बभूव, स किल भगवान् आविर्भूय स्वयं योगोपदेशदानेन आत्मानम् आदर्शरूपेण प्रदर्श्य च "अन्धभूतानां लोकानां कर्त्ताहं सद्दर्शी प्रभा"मिति प्रतिज्ञाय लोकानां शिक्षां विदधत् आत्मनो युगे युगेऽवतीर्णस्य भगवतो नारायणस्यावतारत्वं प्रथयामास। अत्रेदमपि वक्तव्यं यद्, बौद्धानां मतेऽपि "स्वकर्म्मफल-भाक् पुमान्"। अपि च तेषां मतेऽपि जन्मान्तरमस्ति। जातकग्रन्थे भगवतो बुद्धस्यैव बहूनां जन्मनां विवरणं समासाद्यते। बौद्धशास्त्रे स्वर्ग-नरकादीनां कथापि बाहुल्येनैवास्ति, परं यथा वेदान्तिकानां मते स्वर्गलाभादीनामसारता बौद्धमतेऽपि तथैव। अत एव बौद्धधर्मः सर्वथा वेदविरोधीति वक्तुं न शक्यते।

नास्ति वेदोदितं लोके इति येषां मतिः स्थिरा।
नास्तिकास्ते समाख्याता अस्ति येषां त आस्तिकाः॥

इत्युक्तलक्षणं नास्तिकत्वं च कथं बौद्धेषु समारोपयितुं शक्यते तदपि भाव्यम्। (क्रमशः)

संस्कृतपत्रिका-विमर्शनम्

ब्राह्मणमहासम्मेलनम्—ब्राह्मणमहासम्मेलनं नाम मासिकं संस्कृतपत्रं केवलं सनातनधर्म्मरक्षायै बद्धपरिकरं वाराणसी-धामतः प्रकाशितं भवति। "वर्त्तमानस्य युगसङ्कटस्य सन्धिमुहूर्त्ते एतत्सदृशस्य एकस्य सामयिकपत्रस्य प्रयोजनमस्ती"ति अनेनैवो-द्घोष्यते। यद्यपि साहित्यरसपिपासूनां सहृदयानां सम्यङ्मनोरञ्जन-मनेन भविष्यति वा न वेति महान् सन्देहो वर्त्तते, तथापि वयमेतस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वास्थ्यं सुदीर्घं जीवनञ्च कामयामहे। यतोऽस्माकं भारतीयानां साहित्यसेवाऽपि न धर्म्मसेवातो भिन्ना। 'चतुर्वर्गफलप्राप्तिः सुखाद्ल्पधियामपि काव्यादेव।' चतुर्वर्गमध्ये धर्मस्तु आदावेव निर्दिष्टः। अस्माकं साहित्यरसास्वादनं ब्रह्मास्वादसहोदरम्। आधुनिकास्तु तस्मादादर्शाद् भ्रष्टा इव लक्ष्यन्त इति नितरां दुःखिता वयम्। परम् एतन्मते तु यत् किञ्चनाधुनिकं तदेवासाधु, पुराणमित्येव हि साधु सर्वम्। अस्मन्मतं तस्माद् भिन्नमेव—'पुराणमित्येव न साधु सर्वम्, न सर्वमेवाधुनिकमसाधु। न वा यत्किञ्चनात्राधुनिकनाम्नोद्घोषितम् —'आधुनिकसभ्यसमाचाराः' इतिशीर्षके निबन्धे अन्यत्र वा तत्सर्वमेवाधुनिकम्। को वा न जानाति यदाचारनिन्दा-परदारगमनपरस्वापहरणास्पृश्यतावर्जनशास्त्रनिन्दाद्यनुकूलयुक्तिजालविस्तारश्चार्वाकादिभिर्नास्तिकैः स्मरणातीतकालात् प्रभृति कृतः, क्रियते, करिष्यते च। न इमे आधुनिकसभ्यसमाचाराः। प्रतियुगमेवासन् लौकायतिकाः स्थास्यन्ति च। यदि पुराणमात्रमेव साधु तर्हि एतेषां मतमपि साधुतया ख्यातं स्यात्। अत एव ग्राह्यमपि भवेत्। अस्माकं मते तु न पुराणमात्रमेव ग्राह्यं, न वाधुनिकमात्रमेव त्याज्यम्। माधुकरी वृत्तिरेवात्र साधीयसी। परं पुराणं वा भवतु नवीनं वा भवतु सनातनधर्म्मविरोधि मतमपि सप्रयोजनमेव सनातनधर्म्मस्य उत्कर्षप्रतिपादनाय—रात्रिर्यथा दिवसस्य, दुःखं यथा सुखस्य, अन्धकारो यथा आलोकस्येति।

सुप्रभातम्—सुप्रभातं नाम संस्कृतसाहित्यसमाजस्य मासिकं मुखपत्रम्। सम्पादकीयात् स्पष्टमवगम्यते यत् पत्रमिदं सामाजिकनिबन्धबहुलं ब्राह्मणसम्मेलनप्रतिपक्षीभूतञ्च। अनेनैवोक्तं—'चिरं स्थापितायाः वङ्गीय-ब्राह्मणपरिषदो वृहदायोजनं ब्राह्मणमहासम्मेलननाम्ना काश्यां सञ्जातमासीत्। तत्र च—यथा स्वार्थपरायणै-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्म्महत्त्वाकाङ्क्षिभिः कैश्चन द्विवैः पण्डितैः स्वार्थसाधनाय नियमहत्या धर्म्महत्या च कृता, साऽपि विदितप्रायैव पत्रपाठकानाम्।' इति। साम्प्रतमुदासीनप्राया वयं सामाजिकवार्त्तादौ।

उद्योतः—पञ्चनदीय संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्। पञ्चनदीयत्वमस्य वैशिष्ट्यमतस्तत्रैवास्य प्रचारबाहुल्यमभ्यर्थयामहे। अत्यन्तमेव नूनं सार्धरूप्यकमस्य वार्षिकं शुल्कं स्थापितम्। परम्—'अग्रिमे वर्षेऽवश्यं तद्वर्धनोयं भविष्यति। यतो ग्राहकसङ्ख्याद्यापि सन्तोषप्रदा न जाता' तस्माद्वार्षिकप्रवर्धनभयात् "ग्राहकसङ्ख्याभिवर्धनमवश्यमेव कुर्वन्तु भवन्त इति सादरमभ्यर्थना" अस्य सम्पादकानाम्।

श्रीशारदा—मैसूरविभागात् प्रकाशिता, आयुर्वेदविमर्शबहुला च। वर्णाश्रमधर्म्मविषयकाश्च निबन्धाः स्वल्पा अपि न विद्यन्ते इति न। अनेनोच्यते—'वर्णाश्रमाचारधर्म्मनिर्मूलनमेव स्वराज्यसिद्धेः सोपानमिति ये तु भणन्ति ते ह्यनादिप्रपञ्चचारित्रमेव न जानन्ती'ति। विचारयन्तु साध्वसाधुविचारनिपुणा अस्या उक्तेः सारवत्ताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमञ्जरी *

[निबन्धकः—श्रीदक्षिणारञ्जन-शास्त्री एम्. ए]

छात्रप्रतिभा—ग्रामान्तरादागतः शिरोमणिर्माधवमपृच्छत्—'कस्यान्तेवासी भवान्' इति। अधीती व्याकरणे माधवः सगर्वमाह—'तत्रभवतो विद्यानिधिस्ये'ति। शिरोमणिराह…'माधव, अदन्तानामेव ङसः स्यो भवति। कथमुच्यते त्वया विद्यानिधिस्ये'ति? माधवेन पुनरपि सदर्पमेवोक्तं—'किं भवता न ज्ञायते यद् विद्यानिधिरप्यदन्तस्तस्य एकोऽपि नास्ति दन्तो मुखविवरे? अदन्तत्वादेव मया ङसः स्थाने स्यः कृतः' इति।

* * * * * * * * *

शिरोमणिः पुनरप्यपृच्छन्माधवं—'माधव, व्याकरणे व्युत्पन्नो भवान् उच्यतां स्त्रियाः सम्बोधनैकवचने कीदृशं रूपं भविष्यती'ति। माधवेनोक्तं—'प्रेयसि, प्रिये, प्रियतमे वा भवति' इति।

* * * * * * * * *

शिरोमणिः पुनराह…'माधव, व्याकरणे ते अगाधपाण्डित्यं सञ्जातम्। परं दर्शने ते कीदृशं ज्ञानमिति जिज्ञासुरहं पृच्छामि 'को नाम जैमिनि'रिति। माधवेनोक्तं सकोपं 'चौरः स दार्शनिकापसदो यो बौद्धशास्त्रादेव सर्वं तत्त्वं संगृहीतवान्' इति। शिरोमणिनोक्तं 'किं तत्र प्रमाण'मिति। माधवेनोक्तं 'तद् बुद्धशास्त्रादिति' 'तस्य सूत्रमेवात्र प्रमाणम्' इति।

* * * * * * * * *

---

* इतः परं सरलः सरसश्च क्षुद्रतमः सन्दर्भविशेषो "रसमञ्जरी" इत्याख्यया पत्रिकायां प्रचरिष्यति। आशास्महे "रसमञ्जरी"यं मतिमञ्जर्याः सौदर्य्येव बालकानां हृदयसदयमावर्जयितेति।

सं॰ सा॰ प॰ स॰।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्थाः *

		मूल्यम्	
		साधारणानाम्	सदस्यानाम्
२।	कालीतत्त्वम्—सटीकानुवादम्	॥/०)	॥०)
३।	शङ्करीसङ्गीतम्	,, ।/०)	,, ।/०)
४।	मुक्तिवादः—गदाधर-भट्टाचार्य्यविरचितः, सटीकाद्वय-भाष्यानुवादसहितः	,, १)	,, १॥०
५।	दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,, २।०	,, २
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा	१।०)	,, १)
७।	दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,, ।०)	,, ।/०
८।	कारकोल्लासः—भरत-मल्लिककृतः, सोदाहरण-कारकनिर्णयरूपः	/०)	,, /०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, बाङ्गला-भाषाटिप्पणसमेता	॥०)	,, ।/०)
१०।	ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	,, ।/०
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थः	,, १।०)	,, १)
१२।	तीर्थतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	,, ।/०
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्	,, ॥०)	,, ।/०)
१४।	नलदमयन्तीयम्—(सप्ताङ्कनाटकम्)	साधारणानाम्	सदस्यानाम्
	श्रीकालीपद-तर्काचार्य्यकृतम्	,, १।०)	,, १)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	,, १॥)
१६।	यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विजया रथयात्रादि द्वादशयात्रापद्धति-रूपम्	।)	,, ।०
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्	२।०	,, २)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थः	१।०	,, १)

* देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा बङ्गाक्षरमुद्रितनामानि बङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कमलनाथाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समन्वया—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। रामायणम्—वाल्मीकि-विरचितम्।

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
38, Vidyasagar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C. 1073.

१८५१ शकीये कार्त्तिके — १२श-वर्षस्य ७म-संख्या

November, 1929.] — [Vol. XII, No. 7.

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

संस्कृत सा० प०
१० (6)
गुरुकुल ... कांगड़ी

सम्पादकः—

श्रीकालीपद-तर्काचार्य्यः

सह-सम्पादकौ—

श्रीदक्षिणारञ्जन-शास्त्री एम्. ए.

श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थश्च

संस्कृत-साहित्य-परिषत्,
श्यामबाज़ार, कलिकाता।

वार्षिकमूल्यम्—२) रूप्यकद्वयम्
Foreign price—7s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্য

কেশ-রঞ্জন তৈল—

এই আসমুদ্র ভারতের সর্ব্বত্র কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করে প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজ হইতে সামান্য গৃহস্থ-গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য—প্রতিশিশি একটাকা, ডাকব্যয়—সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকারক

সঞ্জীবন রসায়ন

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ

স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম, উৎসাহ, স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে অজীর্ণ, অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে "সঞ্জীবন রসায়ন" অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণের জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নে"র ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা, মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও এই কথানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ীপরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী, আয়ুর্ব্বেদীয় ঔষধ, তৈল ও ঘৃতাদি প্রস্তুত-বিধি, বিষচিকিৎসা, দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা এবং দ্বিতীয়খণ্ডে মহর্ষিদের গৌরবস্বরূপ—"সুশ্রুত-সংহিতা" এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা, ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড

১৮ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

November 1929.	१८५१ शकीये कार्त्तिके १२श-वर्षस्य ७म-संख्या	Vol. XII. No 7.

विजया

[निबन्धकः—श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थः]

धर धर धर भूधरपति-पुत्रि ! तनयदत्तं
भक्तिबहुलमर्थविकलमर्चनमतिसत्तम् ।
स्वीकुरु तरुपल्लवगुरु-कुम्भशिरसि पादं
नाशय सति सन्ततिमनु सन्ततमवसादम् ॥ १

भयमपनय दलितहृदयसुन्नतहृदयाधी-
ननुकम्पय ननु शाम्भवि ! तनुजाननुशाधि ।
आशिषमुपवर्षय सुतमूर्द्धसु शतधारां
जहतु त इह मोह-महितसंसृतिगुरुकाराम् ॥ २

अर्च्चनमिह कतिपयदिनमेत्य जननि तुच्छं
पत्रबहुल-नेत्रसलिलसिक्त-यवशगुच्छम् ।
हर्षमवनि-दुर्लभमुपपाद्य तनयसङ्गे
रङ्गिणि ! पुनरद्य किमिति मज्जसि गुरुभङ्गे ॥ ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभवसि सुतसद्मनि पतिवेश्मनि तव दास्यं
खिद्यसि गृहकर्मसु पुनरत्र भवति लास्यम् ।
पितृवनमनु तत्र वससि सौध इह हि शेषे
कथमिह सति ! वर्त्तितुमभिवाञ्छसि नहि देशे ॥ ४

चिरमनुचर पतिमतिवरमस्ति किमत इष्टं
स्वामिनि दृढभक्तिरिति हि रमणी-शुभदिष्टम् ।
केवलमिह कतिपयदिनमम्ब ! सुतकदम्बं
शोकमलिनमिच्छति वत मातरमवलम्बम् ॥ ५

गिरिश-रमणि ! किमिति तत्र भवसि निरनुकम्पा
पात्यत इह सुतवचसि किमिति विषम-शम्पा ॥
तारकरिपु-वारणमुख-मुखविनिहित-दृष्ट्या
सुतचयमवलोकय सति ! हृद्यसरसदृष्ट्या ॥ ६

जननि ! सुतवदाशु किमिति तव च विरसमास्यं
नन्दति कथमिन्दुविमलमद्य न किल हास्यम् ।
पतिगृहगतिरत्र न सति ! हेतुरभवदिष्टः
ताम्यति नहि नियतकाम्यकर्म्मणि वत शिष्टः ॥ ७

तिष्ठतु तद् यदुपतपति भूर्यामिह हरजायां
सुतगणमुपतपति किन्तु विरहो विजयायाम् ।
भवदनन्य-मातृक इति ताम्यति सुतसार्थ-
स्त्रिदिवजननि ! मानवमनु कोऽपि तव हि नाथः ॥ ८

प्रकृतिसुलभ-दयया प्रतिवर्षमतुलहर्षे
सुतगणमनुषञ्जय सति यादृशमिह वर्षे ।
त्रिदिनमात्रमाहितमिह मिलनं तव तथ्यं
भवतु जननि मानवमनु दिवसत्रयपथ्यम् ॥ ९

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमल्लिनाथ-मखीन्द्रः सञ्जीविनी च

[निबन्धकः—के. ए. रामलिङ्गशास्त्री]

वैदुष्यश्रिया राजमान-भाजनं श्रीमन्मल्लिनाथसूरिणं मन्यामहे—संस्कृतसाहित्यरसास्वादलम्पटाः सर्वेऽपि विद्वद्विविदुषभटगणाः सर्वदा संस्मरन्त्येवेति ; संस्कृतसाहित्यरत्नाकरे लघुत्रय-गुरुत्रयत्वेन प्रथितानां रघुवंश-कुमारसम्भव-मेघसन्देशानां, शिशुपालवध-किराता-र्जुनीय-नैषधीयचरितानां भट्टिकाव्यादीनां च अन्येषां काव्यानां वैश-द्येन, वैशारद्येन च व्याख्याता असौ सूरिवर्यः सर्वेषां विदुषां विवि-दुषूणां च हृदयकुहराजिरे प्रतिष्ठितः समस्तशास्त्रार्थतत्त्वं सदा उपदिशन्निव प्रतिभासते ; अन्तर्वाणिरेष असदृशवाण्यनुग्रहविशेषेण 'नामूलं लिख्यते किञ्चिन्नाऽनपेक्षितमुच्यते' इति स्वप्रतिज्ञानुसारं पठन-पाठनोपयुक्ताखिलकाव्यपद्यविवरणं करतलामलकवत् बहु-प्रमाणप्रबन्धोपोद्बलनेन विशदीचकार च उपचकार च इति नातिशयोक्तिः ; यत्र कुत्रापि ईषदनवधानं न दोषावहम् ; 'न हि सर्वः सर्वं जानाति' इति नीत्या, 'सहजं गच्छतः स्खलनम्' इति नयेन च ; अमुना मनीषिणा आरचितस्य अत्युत्तमस्य आजानसिद्धस्य उपकारस्य सर्वथा वयं कृतज्ञाः स्मः ; अधुना अधीति-बोधाऽऽचरण-प्रचारणार्थं सुप्रयुज्येतेति विचिन्त्य कश्चन विवरणविशेष उद्घाट्यते मदसीय-रघुवंश-सञ्जीविन्याम् ; तद्यथा—

"तत्राऽक्षोभ्यं यशोराशिं निवेश्याऽवरुरोह सः ।
पौलस्त्यतुलितस्याऽद्रेरादधान इव ह्रियम्" ॥ ८० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति रघुवंशचतुर्थसर्गीयपद्यव्याख्यां सञ्जीविनी विवृणोति एवम्— 'स रघुः, तत्र हिमाद्रौ, अक्षोभ्यम् अधृष्यम्; यशोराशिं निवेश्य निधाय; पौलस्त्येन रावणेन तुलितस्य चालितस्य अद्रेः कैलासस्य ह्रियम् आदधानः जनयन्निव अवरुरोह अवततार; कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः; नहि—शूराः परेण पराजितम् अभियुञ्जन्ते, इति भावः।' अत्र कवेराशयो नैव स्फुटोभवति; अतः किञ्चित् प्रस्तूयते—

"परस्परेण विज्ञातस्तेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥" इति

पूर्वतनपद्ये हिमवता नगराजेन रघुमहाराजस्य सामरस्यं सम्पादितमिति विज्ञायते; हिमाद्रिशिखर एव स्थास्नु अच्छाच्छं स्वकीयं यशः पर्वताकारं समूह्य, रजतमयस्य रावणान्दोलितस्य शिववासस्य स्वसदृशशैलान्तरनिर्मापणेन लज्जां सञ्जनयन्निव नृप उपत्यकामभिजगाहे; शङ्करावासं कैलासं कालिदासः—'राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः।' इति क्वचित् अट्टहासत्वेन,—'कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।' इति दर्पणत्वेन क्वचिद्वर्णयामास; तद्वत् रघुमहीपतिनापि स्वकीय-यशोराशिना गुम्फितेन कैलासान्तरं निर्मितमिति, प्राचीनः कैलासः बिभायेति अभिप्रायः; विनीतवेषप्रवेश्यः किल श्रीशङ्करालयः। ततश्चात्र मूढकीर्तित्वेन कैलासो वर्णितः। पाठभेदविषयेऽपि—

"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नारिकेलासवं योधाः शात्रवं व पपुर्यशः॥" ॥ ४२ ॥

अत्र, 'शात्रवं च पपुर्यशः' इति पाठं स्वीकृत्य तदनुगुणं मल्लिनाथकविः—योधाः महेन्द्रगिरौ नारिकेलमद्यं पपुः तत्र विजह्रुरित्यर्थः; शात्रवं यशश्च पपुः जह्रुरित्यर्थ इति प्रणिजगाद; तदेतदसङ्गतमिव प्रतिभाति, कथम्? श्रीमद्दह्रीजोदोच्चितवरिष्ठैः खलु—'मणी वोष्ट्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लभ्वेते प्रियौ वत्सतरौ मम ।' इति कथम् इत्याशङ्क्य, 'इवार्थे व-शब्दो वा-शब्दो वा बोध्यः' इति कौमुदीमूलग्रन्थव्याख्यावसरे—'वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ।' इति, 'व वा यथा तथैवैवं साम्ये' इति निघण्टू निर्दिश्य, तदुपष्टम्भकतया च कालिदासीयं पद्यमिदं निरदिक्षत्—शाववं यशो व, कीर्तिमिव शुभ्रं नालिकेरमधु भटा असेवन्तेति तदर्थः ;—

"स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः" ।६३।

इति द्वितीयसर्गपद्ये महाकविरयं चीरस्य यशःसाम्यं वर्णयामासेति स्निष्यति ; यशोविषयप्रस्तावात् इयदुक्तम् ।

किञ्च, इन्दुमतीस्वयंवरमहोत्सवदिदृक्षार्थमाहूतागतराजन्यप्रस्तावनायाम्—

"अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य ।
इतश्चकोराक्षि ! विलोकयेति........

सुनन्दा इन्दुमतीम् अवहितां विधाय उपश्लोकयति स्म पाण्ड्य-महाराजम्—

"पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः" ॥५३॥

इत्यादि पद्यैः ; अत्र व्याख्याता अविदितदेशस्थितिरिव 'उरगाख्यस्य पुरस्य पाण्ड्यदेशे कान्यकुब्जतीरवर्ति-नागपुरस्य नाथम् एत्य प्राप्य' इति बभाषे ; 'रघुवंशविमर्श'प्रबन्धप्रबन्धा यशःकायेन जीवन् 'सहृदया'-सम्पादकः स्वकीये विमर्शग्रन्थे नागपुरं नागपट्टणम् (Nagaputa, Tanjore Dt.) इति विवेचयति स्म ; एतदपि न स्वच्छम् ; किं तर्हि, 'नागपुरम्' इति श्रीमत् 'हालास्य' क्षेत्रं निरदिक्षत् महाकविः ; तस्यैतस्याधुना (Madura) 'मधुरा-पुरी'ति नामधेयं विलसति ; हालास्यक्षेत्रं पूर्वं कदम्बवनमयमभूत ; पाण्ड्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूपतिभिः तदेतत् परिष्कृतम् ; तदाऽऽदिशेषः फणीन्द्रः विशालः नगररचनार्थं सीमां निर्दिदेश ; 'मधुरोदकसंसिक्ता मधुरेयं महापुरी' इति शिवलीलार्णवे श्रीनीलकण्ठदीक्षितवर्यः कवयाञ्चकार ; अत्रैव पाण्ड्योपपदा धीरोदात्ता अपरिमिता भूपाः प्रजा रञ्जयामासुः, अनन्तरं नायकोपपदाः पृथिवीपालाः 'तिरुमलै' नायकस्य सचिवः, सामासञ्च श्रीमान् नीलकण्ठदीक्षितसज्जो रराज ३०० हायनेभ्यः पूर्वम् इति ज्ञायते ;

अत्रैव नागपुरे श्रीमीनाक्षी-सुन्दरेश्वरौ देवौ भक्ताभीप्सितवितरणार्थं सदा सज्जौ चकास्तः ; अत्रैव भगवान् चतुःषष्टिलीलाः कलयामासेत्यवगम्यते ; अतः 'उरगपुर'-पदेन श्रीमत् 'हालास्यमेव' पुरमेव (मधुरापुरमेव Madura) महाकविना वर्णितमित्यवधेय अस्मिन्नेव दिव्यक्षेत्रे निवासिन वासवस्य वृत्रहननोद्भूता महाहत्या निवृत्तेति आगमोऽवगमयति। अपि च,—

"ततो गौरीगुरुं शैलमारुरोहाऽश्वसाधनः।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः" ॥ ७१ ॥

इत्यस्य अनन्तरपद्ये—

"शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम्।
गुहागतानां सिंहानां परिवृत्यावलोकितम्" ॥७२॥

सैन्यैः समानबलानां गुहावासिनां पञ्चास्यानां सम्बन्धि परिवृत्य परावृत्य अवलोकितम् अवलोकनं कर्तृ, भयकारणे सैन्याऽऽरावे सत्यपि, असंभ्रमम् अन्तःक्षोभविरहितम् शशंस कथयामास ; अर्थात् 'सैन्येभ्यः' इति लभ्यते ; नहि समबलः समबलाद्बिभेति इति भावः, इति व्याख्याति स्म ; इयं क्लिष्टकल्पना नाञ्जसी ; कुतः ? पूर्वतने पद्ये 'अश्वसाधनः' इति राजविशेषणपदस्य सत्त्वात्, राज्ञः अनन्तरपद्येऽपि अध्याहारात् भयकारणे सैन्यघोषे सत्यपि सैन्यतुल्यशौर्याणां सिंहानां यथावस्थितदेशात् अपसरणं विनैव असम्भ्रमं परिवृत्य पश्चे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वणं कर्म, राजा शस्ताघ्ये इति ऋजुः पन्थाः साहित्यविदां हृदयङ्गम इति प्रतिभाति ; एवमेव तत्र तत्र परिष्करणीयम् इति सञ्जोविन्यां लब्धप्रबोधेषु छात्रेषु, पण्डितप्रकाण्डेषु च साञ्जलिबन्धं संप्रार्थ्यतेऽस्माभिरिति शुभम् ।

दशमहाविद्या-स्तोत्रम् *

[निबन्धकः—श्रीयज्ञेश्वरवेदान्तभूषणः]

या दिग्वस्त्रविभूषितार्द्धशशभृन्मौलिर्विलोलाधरा
दैत्यालीरुधिराक्तमौलिविलसन्माला त्रिनेत्रोज्ज्वला ।
या विश्वेशमधिष्ठिता नरकरश्रेणी-लसन्मेखला
सा काली कलिकाल-कालदलनी मां पातु विश्वेश्वरी ॥ १

व्याघ्रत्वक्परिवीत-सुन्दरकटिर्भीमास्यहास्योज्ज्वला
प्रोद्यन्मेघ-विभा-विभासितवपुर्भाभीमवचोऽक्षरा ।
हुङ्काराक्षर-निर्गतोन्नतजटाजूटैकसर्पावृता
सा तारा भवदुर्गभव्यविभवा मां पातु विश्वेश्वरी ॥ २

प्रोद्यद्भानुसहस्रसन्निभवपुः पाशाङ्कुशेष्वासने-
षूनाधाय शयैः क्रमाद् युगयुगैर्या याति दैत्याहवम् ।
ब्रह्माद्यैः परिवारितत्रिपुरजिन्नाभ्युत्थिताङ्के स्थिता
सा राजेश्वरशक्ति-शाक्तजननी मां पातु विश्वेश्वरी ॥ ३

भक्तानां हितकाम्ययाभयवरं हस्तैस्तु पाशाङ्कुशं
धृत्वा या भुवनस्य वैरिनिकरं हत्वाऽशुभाद्रक्षति ।

---

* श्रीरामप्रसाद-काव्यतीर्थेन संगृहीतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या रक्ताम्बुजनिभाङ्गदीप्तमुकुटा हास्यास्यतैक्ष्णतयो
सा शक्तिर्भुवनेश्वरी भवभयान्मां पातु विश्वेश्वरी ॥४
अस्तग्रस्तविभाकरारुणविभा पूर्णेन्दुविम्बानना
विद्युद्दामलसद्विलासमणिहारोद्दीप्तपीनस्तनी ।
हस्ताब्जैर्धृतपुस्तकाभयवराक्षस्रक् त्रिनेत्रोज्ज्वला
सा भक्तार्चितभैरवी शुभकरी मां पातु विश्वेश्वरी ॥५
या कोदण्डविमण्डितारिभयदा हस्तेन मौलिं मुदा
छित्त्वा वामकरे निधाय विगलत्त्वस्रं पिबन्ती मुहुः ।
नृत्यन्ती नियतं निरस्तवसनं द्वन्द्वोपरि प्रेतिनी-
युक्ता सा विगतास्यविग्रहधरा मां पातु विश्वेश्वरी ॥६
रूक्षाक्षी मलिनाम्बरा वरकरा सव्येतरे शूर्पधृग्-
हस्ते विस्तृतघोणया भयकरी क्रूरा कठोरानना ।
काकाङ्काङ्कित-यान-वासनिरता नित्यं पिपासार्दिता
सा धूमा वलिधूपधूमधयिनी मां पातु विश्वेश्वरी ॥७
धृत्वा वामकरे सपत्नरसनामादाय दक्षे गदां
शत्रोः संहरणे रता प्रतिदिनं पीताम्बरा पीतभा ।
पीयूषाब्धिनिवासरत्ननिलये सिंहासनाध्यासिनी
सा देवी वगलामुखी रिपुभयान्मां पातु विश्वेश्वरी ॥८
सान्द्राम्बूदरगाढकृष्णरजनीश्यामा त्रिनेत्राञ्चिता
मेघालीव विभाति भातचपला शुभ्रांशुभालोज्ज्वला ।
हस्तैः पाश-कृपाण-खेटक-सृणीर्या बिभ्रती लीलया
मातङ्गी नृपपीठवासनिरता मां पातु विश्वेश्वरी ॥९
विद्युद्दीप्तसुवर्णपर्वतनिभां भास्वत्किरीटोज्ज्वला-
माशा-पुष्करिणः सुवर्णकलसैः पीयूषपूर्णैर्मुदा ।
यां सिञ्चन्त्यरविन्दयुग्मवरदाभीतीर्भुजैर्बिभ्रतीं
सा शक्तिः कमलामलातिकमला मां पातु विश्वेश्वरी ॥१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये मानवा भक्तिपरीतमानसा-
स्तुवन्ति विद्या-दशकं सुसिद्धिदम्।
विधूय विघ्नप्रचयं परं पदं
व्रजन्ति तेऽद्धा गिरिशानुशासनात् ॥११

विविदिषा

(पूर्वानुवृत्ता)

[निबन्धकः—श्रीउपेन्द्रनाथ-सेनगुप्तः काव्यतीर्थः]

अविद्याप्रभृतिभ्य एव दुःख रोग-मरणादीनि जायन्ते इति प्रागेवोक्तम्। अविद्यादीनि द्वादश निदानानि च पुनः अष्टाङ्गयोगेन नश्यन्ति। तत्र, सम्यक्दृष्टिः, सम्यक् सङ्कल्पः, सम्यक् वाक्यं, सम्यक् कर्म्मान्तः, (उत्तमव्यवसाय इत्यर्थः) सम्यगाजीवः (आजीवः-जीविका) सम्यक् व्यायामः (व्यायामः चेष्टा) सम्यक् स्मृतिः, सम्यक् समाधिश्च अष्टाङ्गयोगमार्गेण एते गृह्यन्ते। तत्र चत्वारि आर्य्यसत्यानि, तद् यथा—'दुःखमस्तीति प्रथमं सत्यं, दुःखोत्पत्तिकारणमप्यस्तीति द्वितीयम्, दुःखात् मुक्तिरपि सम्भवीति तृतीयम्, अष्टाङ्गयोगाभ्यास एव दुःखमुक्तेरुपायः इति चतुर्थं' सत्यम्। सर्वमेतत् धर्म्मपदग्रन्थस्य बुद्धवंगे 'चत्वारि अरिय सच्चानी'त्यादिषु श्लोकेषु द्रष्टव्यम्।

बौद्धैः प्रथममेव रत्नत्रयस्य शरणं ग्रहीतव्यम्। रत्नत्रयञ्च—बुद्धः १ धर्म्मः २ सङ्घश्च ३। त्रीणि तावत् कुशलमूलानि, तद् यथा—बोधिचित्तोत्पाद आशयविशुद्धिरहङ्कारममकारत्यागश्च (ध. स.) अत्र बोधिचित्तोत्पादश्चित्तनैर्म्मल्यसाधनम्। सप्तविधानुत्तरपूजा, तद्-यथा—वन्दना १ अर्थात् प्रणमामीत्यादिरूपा नतिः, पूजना २ अर्थात् धूपदीपादिप्रदानं, पापदेशना ३ अर्थात् चापल्येन मोहेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा मयेदं पापं कृतमिति तद् विनश्यतु इति बुद्धसमीपे कथनम्, अनुमोदना ४ अर्थात् पुण्यानुमोदनम्, अध्येषणा ५ अर्थात् स्वाध्यायः, बोधिचित्तोत्पादः ६ पूर्वमेव व्याख्यातः, परिणमनम् ७ अर्थात् विनयः। दश कुशलमूलानि तद्यथा—प्राणातिपातोऽदत्तादानं काममिथ्याचारो मृषावादपैशुन्यं पारुष्यं सम्भिन्नप्रलापोऽभिध्याव्यापादो मिथ्यादृष्टिश्चेति। (ध. स.) तत्र प्राणातिपातो हिंसा, अदत्तादानं चौर्य्यं, काममिथ्याचारो यथेच्छाचारः मिथ्याचारश्च, सम्भिन्नप्रलापो विरुद्धभाषिता, अभिध्या मिथ्याभिनिवेशः व्यापादः प्राणिहत्या मिथ्यादृष्टिः नास्तिकता। अत्रेदमवधेयं यद् बौद्धा अपि नास्तिकतां निन्दन्ति।

एतान्येव दश शीलानीत्यभिधीयन्ते, आर्य्यशास्त्रे च एतान्येव दशविधपापानि। दशकुशलमूलानि च एतेषां विरोधेन ज्ञातव्यानि, अर्थात् अहिंसादीनि एव दश कुशलमूलानि। तत्र पञ्च आनन्तर्य्याणि, तद्यथा—मातृबधः पितृबधः सुहृद्बधः तथागतहिंसा, दुष्टचित्तरुधिरोत्पादसङ्घभेदश्च। आनन्तर्य्याणि निन्दितकर्माणि महापातकानि वा। अष्टौ लोकधर्माः, तद्यथा—लाभोऽलाभः सुखं दुःखं यशोऽयशो निन्दा प्रशंसा च। लोकधर्माः उपेक्षणीया इत्यर्थः। षट् क्लेशाः, रागः प्रतिघो मानोऽविद्या कुदृष्टिर्विचिकित्सा च। तत्र प्रतिघः विद्वेषः, कर्म्मफलं नास्ति मरणमेव मुक्तिरित्यादिप्रकारकं कुज्ञानं कुदृष्टिः, विचिकित्सा बुद्धोपदेशे सन्देहः। चतुर्विंशतिरुपक्लेशाः, तद्यथा—क्रोधः, उपनाहः, म्रक्षः, प्रदाशः, ईर्ष्या, मात्सर्य्यं, मदः, शाठ्यं, माया, विहिंसा, ह्रीः, अनपत्रपा, स्त्यानम्, अश्राद्धं, कौसीद्यं, प्रमादः, मुषितस्मृतिः, विक्षेपः, सम्प्रजना, कौकृत्यं, मिद्धं, वितर्कः, विचारश्च। तत्र माया वञ्चना, स्त्यानमनुत्साहः, साम्प्रजन्यं कुकर्म्मासक्तिः, मिद्धम् औद्धत्यं, म्रक्षादीनामर्थस्तु, दुर्बोधः। पञ्च मात्सर्य्याणि, तद्यथा—धर्म्ममात्सर्य्यं लाभमात्सर्य्यम्, आवासमात्सर्य्यं, कुशलमात्सर्य्यं, वर्णमात्सर्य्यञ्चेति। तत्र चतस्रः श्रद्धाः, तद्यथा,—आर्य्यसत्यं, त्रिरत्नं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म्म, कर्म्मफलञ्च। दानं त्रिविधं, तद्यथा—धर्म्मदानं मामिषदानं मैत्रीदानञ्च। तत्र मामिषदानं द्रव्यदानम्। त्रिविधं कर्म्म तद्यथा—दृष्टधर्म्मवेदनीयम् उत्पद्यवेदनीयम्, अपरवेदनीयञ्चेति। अस्मिन् जन्मनि अनुभूतफलं कर्म्म दृष्टधर्म्मवेदनीयम्, अपरजन्मनि कृतं यत् कर्म्म शरीराङ्कुरमुत्पादयति तदुत्पद्यवेदनीयम्, अस्मिन् जन्मनि कृतं यत् कर्म्म आगामिनि जन्मनि फलं जनयति तदपरवेदनीयम्। एतान्येव पातञ्जले दृष्टादृष्टवेदनीयादिक्रमेण कथितानि। त्रीण्यकुशलमूलानि, तद्यथा—लोभो मोहो द्वेषश्चेति, एतद्विपर्य्ययेण त्रीणि कुशलमूलानि च। तिस्रः शिक्षाः, तद्यथा—अधिचित्तशिक्षाऽधिशीलशिक्षाऽधि-प्रज्ञाशिक्षा चेति। चत्वारो ब्रह्मविहाराः, तद्यथा—मैत्री करुणा मुदितोपेक्षा चेति। एता एव गीतायां ब्राह्मस्थितिसंज्ञया संज्ञिताः। षट् पारमिताः, तद्यथा—दानपारमिता, शीलपारमिता, क्षान्तिपार-मिता, वीर्य्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता च। पारमिता परमभावः परमोत्कर्षप्राप्तिर्वा। चत्वारि संग्रहवस्तूनि, तद्यथा—दानं प्रियवचनमर्थचर्य्या समानार्थता च। समानार्थता समदर्शिते-त्यर्थः। चतस्रो धारण्यः, तद्यथा—आत्मधारणी, ग्रन्थधारणी, धर्म्म-धारणी, मन्त्रधारणी च। अत्र धारणी रतिरित्यर्थः। षडनुस्मृतयः, तद्यथा—बुद्धानुस्मृतिः, धर्म्मानुस्मृतिः, संघानुस्मृतिस्त्यागानुस्मृतिः, शीलानुस्मृतिर्देवानुस्मृतिश्च। अनुस्मृतिरनुस्मृतिरित्यर्थः। चत्वारि धर्म्मपदानि, तद्यथा—अनित्याः सर्वसंस्काराः, दुःखाः सर्वसंस्काराः, निरात्मानः सर्वसंस्कारा, शान्तं निर्वाणञ्च। निरात्मानः खपुष्पादिवत् तुच्छा इत्यर्थः।

गतयः षट्, तद्यथा—नरकस्तिर्य्यक् प्रेतोऽसुरो मनुष्यो देवश्चेति, षड्धातवः, तद्यथा—पृथिव्यप्तेजो वायुराकाशो विज्ञानञ्च। अष्टौ विमोक्षाः, तद्यथा—रूपी रूपाणि पश्यति शून्यम्। अध्यात्मरूपसंज्ञी बहिर्धारूपाणि पश्यति शून्यम्। आकाशानन्त्यायतनं पश्यति शून्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानानन्त्यायतनं पश्यति शून्यम्। आकिञ्चन्यायतनं पश्यति शून्यम्। नैवसंज्ञानासंज्ञायतनं पश्यति शून्यम्। संज्ञावेदयितनिरोधं पश्यति शून्यम्। निर्वाणञ्च। निर्वाणं पातञ्जलस्यात्मकैवल्यमेव। द्वादश धूतगुणाः, तद्यथा—पैण्डपातिकस्त्रैचीवरिकः खलूपश्चाद्भक्तिकः यथासंस्तारिको वृक्षमूलिक एकासनिक आत्याकासिक आरण्यक श्माशानिकः पांशुकुलिको नामतिकश्च। धूतशब्देन भिक्षुरवगम्यते। य एकेनेव पिण्डेन दिवसं पातयति अतिवाहयति स पैण्डपातिकः एवमन्येऽपि बोद्धव्याः। चत्वारि ध्यानानि, तद्यथा—सवितर्कं सविचारं विवेकजं प्रीतिसुखञ्चेति प्रथमं ध्यानम्, अध्यात्मप्रसादात् प्रीतिसुखमिति द्वितीयम्। उपेक्षा स्मृतिसंप्रजन्यं सुखमिति तृतीयम्। स्मृतिपरिशुद्धिरदुःखाऽसुखा वेदनेति चतुर्थं ध्यानम्। दश भूमयः, तद्यथा—प्रमुदिता, विमला, प्रभङ्करी, अर्चिष्मती, सुदुर्जया, अभिमुखा, दूरंगमा, अचला, साधुमती मधुमती वा धर्ममेघश्च। भूमिस्तु ध्यानारूढानाम् उन्नतावस्था। धर्मं मिहति चरतीति धर्ममेघः पातञ्जलेऽपि द्रष्टव्यः, तथा च "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातिर्धर्ममेघः समाधिः" इति पातञ्जले (पा॰ कै॰ २९)। त्रीणि वैशारद्यानि, तद्यथा—अभिसम्बोधिवैशारद्यम्, आस्रवक्षयज्ञानवैशारद्यं, नैर्वाणिकमार्गावतरणवैशारद्यञ्च। आस्रवः क्लेश इत्यर्थः। बोधिसत्त्वानां दश वशिता, तद्यथा—आयुर्वशिता, चित्तवशिता, परिस्कारवशिता, धर्मवशिता, ऋद्धिवशिता, जन्मवशिता, अधिमुक्तिवशिता, प्रणिधानवशिता, कर्मवशिता, ज्ञानवशिता च। द्वे सत्ये, तद्यथा—संवृतिसत्यं, परमार्थसत्यञ्च। संवृतिसत्यं व्यावहारिकसत्यमित्यर्थः। शीलं त्रिविधं, तद्यथा—सम्भारशीलं, कुशलसंग्रहशीलं, सत्त्वार्थक्रियाशीलञ्च। सत्त्वार्थक्रियाशीलं परोपकाररूपम्। क्षान्तिस्त्रिविधा, तद्यथा—धर्मनिध्यानक्षान्तिर्दुःखाधिवासनक्षान्तिः परोपकारधर्मक्षान्तिश्च। प्रज्ञा त्रिविधा, तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतमयी, चिन्तामयी, भावनामयी चेति। ज्ञानं त्रिविधं तद्यथा—अविकल्पकम्, विकल्पसमभावबोधकम्, सत्यार्थोपायोपरक्तञ्चेति। नैरात्म्यं द्विविधम्—धर्म्मनैरात्म्यं, पुद्गलनैरात्म्यञ्च। पुद्गलशब्देन देह उच्यते। पञ्च स्कन्धाः—रूपस्कन्धः, वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः, विज्ञानस्कन्धश्च। द्वादशायतनानि—चक्षुरादीनि पञ्चेन्द्रियाणि तेषां विषयाः मनः धर्म्मश्च।

वेदना त्रिविधा—सुखवेदना, दुःखवेदना, उभयातीतवेदना चेति। दश बलाः तद् यथा—

दानं शीलञ्च शान्तिश्च ध्यानं वीर्य्यं बलस्तथा।
उपायः प्रणिधिः प्रज्ञा ज्ञानं सर्वगतं हि तत्॥

एतेषु आधिपत्यादेव बुद्धो दशबल इत्युच्यते। तत्र प्रणिधिः गूढ़दर्शनम्। उपायः द्विविधः, तद्यथा—प्रतिकूलः अनुकूलश्च, तत्र प्रतिकूलः दशधा, तद्यथा—स्वकायदृष्टिः (आत्मभ्रमः स्वकीयद्वैतभावो वा) विचिकित्सा, शीलव्रतपरामर्शः, कामरागः, प्रतिघः, रूपरागः, अरूपरागः, मनः, औद्धत्यम्, अविद्या च। अनुकूलस्तु अष्टधा—अष्टाङ्गयोगरूपः। दश शीलानि, तद्यथा—अहिंसा, अस्तेयं, ब्रह्मचर्य्यं, सत्यभाषणं, मद्यादिपानवर्जनम्, आपराह्णिकभोजनवर्जनं, नृत्यगीतादीनामनुपभोगः, गन्धादीनामनुपभोगः, उच्चासनादीनामनुपभोगः सुवर्णादीनाम् अपरिग्रहः। अत्र अहिंसादीनि पञ्च शीलानि पातञ्जले यमनामधेयानि। सम्बोध्यङ्गानि सप्त, तद्यथा—स्मृतिः, धर्म्मविचयः, वीर्य्यं, प्रीतिः, प्रश्रब्धिः, समाधिः, उपेक्षा च। आश्रवः चतुर्विधः, तद्यथा—कामाश्रवः, भवाश्रवः, दृष्टाश्रवः, अविद्याश्रवश्च। आश्रवः क्लेश इत्यर्थः। बौद्धशास्त्रे रागद्वेषमोहाः किञ्चनशब्देन उच्यन्ते, अत एव अकिञ्चनशब्देन रागादिनिर्मुक्ताः अवगन्तव्याः।

अत्र समासेन सौगतसमयस्य यत्किञ्चिदालोचितं, तेन तु कथमपि बौद्धानां नास्तिकत्वं नाभ्युपगम्यते। न किल ते वेदान् न परिगृह्णन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रामाण्यतया इति वक्तुं शक्यते, योगदर्शनस्यापि वेदानुमोदितत्वात्, अपि च तैरनुष्ठितवस्तूनां वेदादिषु चोपलम्भात्। स्मृतौ ये शिष्टाचारा दृश्यन्ते सौगतैस्तेषां सर्वथा अपरिगृहीतत्वेऽपि बौद्धानामाचारा अपि वेदस्मृतिसम्मिता एव। यदि तेषां शून्यं खपुष्पादिवत् किञ्चिन्न स्यात् परन्तु भावरूपमिव किञ्चिद् भवति तदा तु आत्मेति शब्दमात्रस्यापरिग्रहात् न ते कुत्रापि अपराद्धवन्तः, तात्पर्य्यस्य एकस्मिन् एकविधे च वस्तुनि पर्य्यवसानात्। बौद्धमतस्यानुचितसमालोचनात् सौगतमते प्रतिपक्षसमुद्भावितदोषाणामपि याथातथ्ये सन्देहात् न किल तथाकथित-महतामुक्तिमात्रेणैव बौद्धमतपरिगर्हणं शिष्टसम्मतमिति ब्रूमः। तथा च ब्रह्मसूत्रान्तर्गतस्य "आकाशे चाविशेषादि"त्यस्य (ब्रह्म० २।२।२४) सूत्रस्य व्याख्यानप्रसङ्गेन शङ्करभगवत्पादैः लिखितम्—"अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत।" सौगते हि समये "पृथिवी भगवः किं संनिश्रया" इत्यस्मिन् वचनप्रवाहे पृथिव्यादीनामन्ते वायुः किं संनिश्रय" इत्यस्य प्रश्नस्य प्रतिवचनं भवति "वायुराकाशसंनिश्रयः" इति। "तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात्।" परं नागार्जुनकृतधर्म्मसंग्रहे "पृथिव्यप्तेजो वायुराकाशो विज्ञानञ्च षड् धातवः" इति लिखितं दृश्यते। तत्राकाशः सांख्यवेदान्तवादिनामाकाश इव वस्तु न त्ववस्तु, अत एव आवरणमात्रमाकाशमिति सौगतसम्प्रदायविशेषाभिमतम् आचार्य्यपादोद्धृतवाक्यं निरवलम्बनं स्यात्, न तेन सर्वसौगतानां मतविगर्हणमुचितं भवति। अपि च "अनुस्मृतेश्च" इति सूत्रस्य (ब्र० २।२।२५) व्याख्यानप्रसङ्गेन श्रीमच्छङ्कराचार्य्यपादैरुक्तम्—"अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपयन्नुपलब्धुरपि क्षणिकतामभ्युपेयात्। न च सा सम्भवति। अनुस्मृतेः।" तत्र वक्तव्यं, येन अघटनाघटनपटीयसी काचित् माया स्वीकृता, सर्वञ्च दुर्मीमांस्यं वस्तुजातं येन „अविद्यावशादेवं जायते" इति व्याख्यातञ्च स कथ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्थमभिदधाति ? बौद्धाः अपि अविद्यां स्वीकुर्वन्ति, तन्मतेऽपि अविद्ययैव एवमघटनमपि घटते इति प्रतिवचनं युज्यते, तदा वेदान्तिकस्य अप्रतिवचन एव सम्पद्येत, एवमन्यत्रापि। अपरञ्च ब्रह्मसूत्रप्रणयनसमये भगवतो बुद्धस्य आविर्भावो न बभूव, तत् कथं बौद्धानां सम्प्रदायविशेषसमयमधिकृत्य भगवता वादरायणेन सूत्राणि प्रणीतानीति नाभ्युपगम्यते, अथ प्रागेव तादृश्मतं वेदादिष्वासीदिति वेदादीनामेव गर्हणमुपयुज्यते, उभयथा सौगतमताक्रमणं—ब्रह्मसूत्राणां स्वकल्पितभाष्यनिर्म्माणञ्च अशेषप्रतिभानिदर्शनस्थानमपि विजिगीषुत्वमेव। अपि च सांख्यशास्त्रेण वेदान्तवादो दूषितः, वेदान्तेन सांख्यशास्त्रं दूषितं, न किल तादृशं शास्त्रं दृश्यते येन परमतं न दूषितं येन केनापि प्रकारेण आत्ममतमपि न रचितं, तत् कथं बौद्धा एव निगृह्येरन् इति वक्तुं न शक्यते।

शङ्कर-शवरादयोऽपि महान्त एव, ज्ञानेन वीर्य्येण तपसा श्रीमद्भगवन्नारायणावतारः बुद्धोऽपि महान् एव आसीत्, तन्मतमपि पुरस्तात् किञ्चित् वर्णितं विशेषन्तु विशेषज्ञाः दोषज्ञा एव जानन्ति, तदत्र पण्डिता एव अपक्षपातेन विचारेण निर्द्धारयन्तु सत्यम्। अर्वाचीनानां बौद्धानां केचन वेदप्रामाण्यं नाखण्डयन् इति न, किन्तु प्राचीनानां बौद्धानां कोऽपि तच्चकार इति न जानीमः। * यदि केचन प्राचीनबौद्धानामुक्तीनामपि दोषान् दर्शयन्ति तदा तेऽस्माकं भ्रमापनोदनेन महान्तमुपकारं करिष्यन्तीति अलं वाक्प्रपञ्चेन।

अत्र निबन्धे नागार्जुनकृतधर्मसंग्रहात् बहूनि वाक्यानि समुद्धृतानि, ललितविस्तर-प्रज्ञापारमिता-धर्मपदादिग्रन्थाश्च सम्यगवलोकिताः परमस्य निबन्धस्य प्रणयने तत्रभवतो रामदासाभिधस्य सेनोपाधिकस्य

---

* अत्र निबन्धकृता स्वाभिमतानां प्राचीनानामर्व्वाचीनानाञ्च बौद्धानां नामनिर्देशः समयनिर्देशो वा सम्यगपेक्षितोऽपि नोपक्षिप्तः।

सं. सा. प. सः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डितवरस्य सरणिरनुसृता। नात्र वयं सिद्धान्तविशेषावगाहिनः परं शास्त्रालोचनेन बुद्धमतेऽस्माभिः कश्चिद्दोषो न समाम्नायि, परं यन्मते ब्राह्मणा एव मतिमतामादर्शस्थानीयाः लोकानुग्रहाय त्यक्तसर्वभोगेन परम-यतिना येनाहिंसा मैत्री च लोके प्रतिष्ठापिते, ब्रह्मविद्यालाभ-मार्गश्च अष्टाङ्गमार्गोपदेशेन सुगमः कृतः, ज्ञानवैराग्यचित्तनैर्मल्यादिना आध्यात्मिकोन्नतौ च परमो यत्नः कृतः, यः खलु श्रीमद्भगवन्नारायणा-वतार इति मत्स्यादिभिरेकपंक्तौ गण्यते कथं श्रीमदाचार्य्यपादा-दिभिः महद्भिः अर्वाचीनानां सम्प्रदायविशेषाणां मतमाकर्ण्य तन्मते तस्मिंश्च अनास्था प्रदर्शिता ? कथं वा बौद्धाः देशादस्मात् निपीड़न-निःसारिताः, न वा कथमद्यापि बौद्धानां बुद्धस्य बौद्धशास्त्रस्य च यथो-चितसमादरः बौद्धशास्त्रस्य यथारीति चर्चा च समं वेदान्तादिभिः न भविष्यति इत्येव मे विविदिषा विदुषां पुरतः समुपस्थाप्यते, अधुना विद्वांस एव प्रमाणमिति।

सर्वप्रत्ययमाला

(पूर्वतोऽनुवृत्ता)

[श्रीशङ्करार्य्यविरचिता]

धनादृते न सम्पत्तिर्द्वितीया स्यादृते धनम्।
एनबित्यन्तदिक्शब्दयोगेऽपि स्याद्विकल्पितः॥ १२५
पृथङ्-नाना-विनायोगे तृतीया पञ्चमी तथा।
ग्रामात् पृथग्विहारोऽयं ग्रामेण पृथगित्यपि॥ १२६
धनान्नाना च लक्ष्मीः स्यात् धनेनेत्यथवा भवेत्।
विना वातं विना वर्षं विद्युत्प्रपतनं विना॥ १२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विना वातादिदोषेण केन तौ पातितौ द्रुमौ ।
अस्त्रीलिङ्गे गुणे हेतौ तृतीया पञ्चमी यथा ॥ १२८
जाड्याद् गृहीतो जाड्येन गृहीत इति वा भवेत् ।
हेतौ तृतीया-पञ्चम्यौ स्यातां तदुभयं यथा ॥ १२९
अग्निमान् धूमवत्त्वेन धूमवत्त्वादसौ गिरिः ।
भयात्पलायते शत्रुर्भयेन तु पलायते ॥ १३०
पञ्चम्यर्थो मया प्रोक्तः षष्ठ्यर्थोऽथ प्रकथ्यते ।
षष्ठी तु कारकं मुक्त्वा सम्बन्धार्थे व्यवस्थिता ॥ १३१
सम्बन्धभेदा बहवो भवन्त्येकोत्तरं शतम् ।
तत्र स्वस्वामिसम्बन्धो राज्ञोऽमात्य इतीरितः ॥ १३२
आश्रयाश्रयिभावेन नृपस्य धनमित्यसौ ।
स्वामिभृत्याख्यसम्बन्धो राज्ञोऽमात्य इतीरितः ॥ १३३
आश्रयाश्रयिभावाख्यो नद्यास्तीरमितीष्यते ।
वाच्यवाचकभावाख्यः शब्दस्यार्थ इतीरितः ॥ १३४
पितुः पुत्रेण सम्बन्धः स्याज्जन्यजनकाह्वयः ।
कार्य्यकारणसम्बन्धो मृदो घट इतीदृशः ॥ ११५
सुहृदोः सङ्गतिः प्रीत्यै वैरिणो मरणाय सा ।
मित्रयोरमृतं वाक्यं पुत्रयोरधिकं ततः ॥ १३६
दन्तिनां संहतिर्भाति महतां वामुचामिव ।
वृक्षाणां फलमत्राऽस्ति पुष्पाणां गन्ध उत्तमः ॥ १३७
प्रियाणां मधुरं वाक्यं कवीनां रसवद्वचः ।
गुरूणां वचनं पथ्यं कर्त्तॄणामुत्तमं वचः ॥ १३८
तुल्यार्थशब्दैर्योगे च वर्जयित्वा तुलोपमे ।
षष्ठी भवेत्तृतीया च तदुदाहरणं यथा ॥ १३९
कमलेन समं वक्त्रं वक्त्रस्य सदृशः शशी ।
सदृशः शशिना राजा तस्य भास्वान् प्रभावतः ॥ १४०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्राभ्यामुत्पले तुल्ये तुल्ये उत्पलयोश्च ते ।
नगैः समाना नागेन्द्रा नागानां सदृशा नगाः ॥ १४१
एवं ज्ञेयाः प्रयोगेषु विशेषा ये भवन्ति हि ।
षष्ठी स्यात् कृत्प्रदैर्योगे कर्त्त्रर्थे वाऽथ कर्मणि ॥ १४२
प्रभूणामासिका पीठे सर्पाणां शायिका बिले ।
बहूनामत्र पुष्पाणामुत्पत्तिरिति कर्तरि १४३
अपां स्रष्टा पुरां भेत्ता कर्ता पुण्यस्य सर्वदा ।
शत्रूणां नाशकोऽर्थस्य प्रदातेत्यत्र कर्मणि ॥ १४४
तुमुन् क्त्वाल्यपतृनां निष्ठा-शतृशानच् क्वसूकञाम् ।
उप्रत्ययेष्णुचो योगे षष्ठ्यत्र प्रतिषिध्यते ॥ १४५
गङ्गां गन्तुं गृहं गत्वा पितरावभिवाद्य च ।
गन्ता देशान् गतोऽध्वानं गतवानाश्रमं मुनिः ॥ १४६
गच्छन्नन्नानि भुञ्जानो गयां चापि प्रपेदिवान् ।
गामुकस्तीर्थजातानि जिहासुः कल्मषं निजम् ॥ १४७
निराकरिष्णुर्बौद्धादीन् मनो जिष्णुर्जितेन्द्रियः ।
भोक्तुमोदनमादातुं शरानिति तुमुन् भवेत् ॥ १४८
गत्वा ग्राममिति क्त्वा स्यात् प्राप्य ग्राममिति ल्यपि ।
पायं पायं पयो भुङ्क्ते तृषाऽऽर्तश्चेत्यसौ णमुल् ॥ १४९
कटान् कर्ता प्रवदिता जनानित्यत्र तृन् भवेत् ।
क्तवतुः प्राप्तवान् ग्रामं क्तो ग्रामं गत इत्यसौ ॥ १५०
शतृप्रत्यय उक्तः स्याद्गच्छन् ग्राममितीदृशः ।
सेवमानो नृपं चेति शानचो रूपमिष्यते ॥ १५१
क्वसुः स्याच्छुश्रुवाञ्छास्त्रं गामुको ग्राममित्युकञ् ।
ग्रामं जिगमिषुश्चेति भवेदुप्रत्ययस्तथा ॥ १५२
अलङ्करिष्णुरात्मानमिष्णुजन्तं पदं भवेत् ।
इत्येतेषां प्रयोगेषु न षष्ठी कर्तृकर्मणोः ॥ १५३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्करं कृतवांस्तेन दुष्पारं पापिना जलम् ।
तृतीया खल्युचोर्योगे दुष्पारो भवता त्विति ॥ १५४
कृत्यप्रत्यययोगे तु वा षष्ठी कर्तरीष्यते ।
तव्यानीयर्थ्यं यत् क्यप् च केलिमकृत्यसंज्ञकाः ॥ १५५
कर्तव्यो भवतो धर्मः करणीयो मठस्तव ।
तव कृत्यमिदं सर्वमापाद्यं कृतिनां यशः ॥ २५६
कर्तव्यो भवता धर्मः करणीयो मठस्त्वया ।
त्वया कृत्यमिदं सर्वमापाद्यं कृतिभिर्यशः ॥ १५७
शत्रन्तस्य तु षष्ठी वा द्विषन्नित्यस्य कर्मणि ।
सपिण्डानां द्विषन् पापी सपिण्डांश्च द्विषन्नपि ॥ १५८
चोरान् द्विषन् जनः सर्वश्चोराणाञ्च द्विषन्निति ।
स्मरणार्थैस्तु शब्दैः स्याद्योगे षष्ठी विकल्पिता ॥ १५९
मातुः स्मरति बालोऽयं मातरं स्मरतीति वा ।
अधीगर्थदयेशाञ्च षष्ठी कर्मणि तद्यथा ॥ १६०
मातुरध्येति दयते प्राणिनामीशते नृणाम् ।
लोकानामीशते देवा बन्धूनां दयते घृणी ॥ १६१
षष्ठी स्यादेवमादीनां कर्मणीत्यवगम्यताम् ।
जासि-निप्रहणक्राथपिषां हिंसार्थवाचिनाम् ॥ १६२
षष्ठी कर्मणि निर्दिष्टा तदुदाहरणं यथा ।
जासयत्यथ शत्रूणां प्रणिहन्ति पिनष्टि च ॥ १६३
षष्ठ्यर्थोऽयं मया प्रोक्तः सप्तम्यर्थोऽथ कथ्यते ।
सप्तम्यत्वाऽधिकरणे तदर्थः सप्तमीरितः ॥ १६४
औपश्लेष-वैषयिक-व्यापकासक्तिभेदवान् ।
चतुर्धाऽऽधार आख्यातस्तदुदाहरणं यथा ॥ १६५
आस्ते सिंहासने राजेत्यौपश्लेषिक-सप्तमी ।
तिलेषु तैलमित्यादौ व्यापिका सप्तमीष्यते ॥ १६६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गायां घोष इत्यादिर्भवत्यासन्नसप्तमी ।
वृक्षे स्थितं कपिं पश्य गगने विहगेश्वरम् ॥ १६७
वनेषु मत्तमातङ्गाः शरभा गिरिसानुषु ।
भूभृत्सु पादपाः सन्ति सन्ति गङ्गासु वालुकाः ॥ १६८
वार्तासु वर्तते बुद्धिः प्रायो धर्मकथासु नः ।
यस्य तु क्रिययाऽन्यस्य लक्ष्यतेऽत्र क्रियाऽपरा ॥ १६९
तस्य क्रियावतश्चापि सप्तमी तदुदाहृतिः ।
उदितेऽर्केऽभवत् पुत्रः पुत्रे जाते गता व्यथा ॥ १७०
गोष्वयं दुह्यमानासु गतो दुग्धास्विहाऽऽगतः ॥ १७१

वीह्यादिबीजेष्वनिसुच्यमाने-
ष्वगानुपात्तेषु गृहं प्रविष्टः ।
पुष्यत्सु चूतेषु गतोऽहमेषु
पक्वेषु सर्वेषु समागतोऽस्मि ॥ १७२

यस्य तु क्रिययाऽन्यस्य लक्ष्यते तु क्रियाऽपरा ।
अनादराधिके तत्र भवेत् षष्ठी च सप्तमी ॥ १७३
भीमस्य युध्यमानस्य जीवतोः कृष्णपार्थयोः ।
पश्यतां पाण्डुपुत्राणामभिमन्युर्निपातितः ॥ १७४
सज्यचापे स्थिते कर्णे पश्यतोर्द्रोणभीष्मयोः ।
क्रुध्यत्सु धार्त्तराष्ट्रेषु धर्मराज उपागतः ॥ १७५
जात्या वा क्रियया वाऽपि गुणैर्वा समुदायतः ।
यतो निर्धार्य्यते वस्तु तत्र षष्ठी च सप्तमी ॥ १७६
नृपाणां क्षत्रियः शूरो नृपेषु क्षत्रियोऽथवा ।
अध्वगानां वरो धावन्नध्वगेषु जवी वरः ॥ १७७
गवां कृष्णा हि कल्याणी गोषु कृष्णा गुणान्विता ।
विभक्तिः सप्तमी नित्यमिनन्तार्थस्य कर्मणि ॥ १७८
इष्टी तुरगमेधेषु कृती कर्मसु सर्वदा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधीतौ वेदशास्त्रेषु श्रुतौ धर्मकथासु च ॥ १७९
गृहीतौ सर्वशास्त्रेषु नित्यं गुरुषु पूजितौ ।
निमित्तात् कर्मसंयोगे सप्तमी तदुदाहृतिः ॥ १८०
चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति दन्तिनम् ।
बालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ १८१
स्वामीश्वराधिपतिभिर्योगे षष्ठी च सप्तमी ।
गोषु स्वामी गवां स्वामी गवामधिपतिस्तथा ॥ १८२
गोष्वीश्वरस्तथैव स्याद् गवामीश्वर इत्यपि ।
साध्वसाधुप्रयोगेऽपि परिप्रत्यनुवर्जिते ॥ १८३
साधु मातरि पुत्रोऽयमसाध्वन्यजनेष्विति ।
मातरं प्रति साध्वेषा चैवं पर्य्यनुयोगयोः ॥ १८४
एवं सप्तविभक्त्यर्था विस्तरेण प्रदर्शिताः ।
कृदन्तास्तद्धितान्ताश्च समासाश्चाऽव्ययानि च ॥ १८५
स्त्रीप्रत्ययान्तशब्दाश्च सुबन्ताः पञ्चधा मताः ॥ १८६

इति श्रीशङ्कराचार्य्यविरचितायां सर्वप्रत्ययमालायां
सप्तविभक्त्यर्थदर्शनं नाम प्रथमोऽध्यायः ।

आतङ्कनिरसनम् *

[निबन्धकः—श्रीदुर्गाप्रसन्न-विद्याभूषणः]

१९२९ खृष्टाब्दीय २३शे सेप्टेम्बर-दिवसीयकलकत्तामुद्रित-"जैनगजट्" नामधेय-साप्ताहिक-संवादपत्रे सम्पादकीयस्तम्भे "अवि-

---

* वर्त्तमानवर्षीय-ज्येष्ठसंख्यायां प्रकाशितस्य प्रकाश्यमाननिबन्धलेखकेन निबद्धस्य "ब्राह्मणानां मत्स्यभोजनस्य शास्त्रीयत्व"मितिशीर्षकस्य लेखस्य, कलिकातानगरीतः प्रचारितायां 'जैनगजट' पत्रिकायां हिन्दीभाषया कश्चि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चारितस्य-मीमांसा"भिधेयः कश्चिद् निबन्धः प्रकाशतां नीतः, तदवलोकनेन विज्ञातं मया, यन्मल्लिखित-"ब्राह्मणानां मत्स्यभोजनस्य शास्त्रीयत्व"मिति-शीर्षकस्य निबन्धस्य प्रतिवादात्मकोऽसाविति।

यद्यपि शिष्ट-परिगृहीत-वेदादिशास्त्र-प्रामाण्यमनङ्गीकुर्वाणानां जैनानां व्यर्थ-जल्पनमालोकयतामस्माकं नाल्पमपि प्रतिवदितव्यं तथापि ह्यथादम्भावष्टम्भेन भूयोभूयोऽशिष्ट-वाग्व्यवहारेण च तत्प्रतिवादाय मां मुखरीकृतवान् जैन-पत्रिकासम्पाद-महोदयः।

मदीयनिबन्ध-सन्दूषकेण जैनधुरन्धरेण यदस्मन्निबन्ध-सन्दर्शनेन "निन्दितमपि मत्स्य-मांस-भोजनं शास्त्रानुमतमिति मनसि विधाय मनुजाः स्वीयहीनाचारं द्रढ़यन्तो जीवभक्षणरूपेण राक्षसकृत्येनात्मानं श्वभ्रादिगतिपात्रमवापादयिष्यन्तो"ति प्रलपितं तत्र विविच्यते, कोऽयं जीवो नाम? दृश्यते तु ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे—"प्राणदेहादिभृद्देही स जीवः परिकीर्त्तित" इति जीववलप्राणधारणे इत्यस्माद्धातोर्निष्पन्नत्वाच्च प्राणसम्बन्धवान् देहाद्यवच्छिन्न आत्मा जीव इति प्रतिपन्नम्। स च आकीट-पतङ्गेभ्यः स्थावर-जङ्गमात्मकेषु वृक्ष-तृण-

---

दाक्षेपः सम्पादकीयत्वेन प्रकाश्यं नीतः। स हि निबन्धस्तत्सम्पादकेन तदनुपदमेव गैर्वाणगिरा परिणमय्य प्रकाशार्थमस्मत्पत्रिकायां प्रेषितः, किन्त्वनुवादात्मकत्वात् नालमास्महे तं प्रकाशयितुमिति सलज्जमावेदयामो वयं सम्पादकमहोदयेषु। एतद्विषये च विशेषतो वक्तव्यमेतदेवास्माकम् यत्—अभिलाषवन्तः काममदन्तु मत्स्यान् मांसं वा निरामिषाशिनश्च प्रकामं परिवर्जयन्तु नाम, वयं न कञ्चित् प्रेरयामो नापि निवारयामः नवा शास्त्रनिषेधमालोक्य मत्स्यादानासुत्पत्स्यते विरक्तिर्मत्स्यादने, निरामिषाशिनाञ्च शास्त्रादेशमालोक्य तत्रानुरक्तिश्च। परं शास्त्रकाराणां क्वासीत् पक्षपात इत्येवं निर्णेतुमयमुद्यमो मा तावत् साम्प्रदायिकविवादपदमास्तामिति नेतः परमेतद्विषयिणी काचनालोचना पत्रिकायामस्यां प्रकाशयिष्यते।

सं. सा. प. स.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वल्लरी-वीजपर्य्यन्तेषु सर्वत्र समभावेन विराजमानो दृश्यते, क्वचित् प्रकटभावेन क्वचिद् वाऽप्रकट-भावेन। तथा च—आकीटपतङ्गेभ्यो वृक्ष-वल्लरी-तृणपर्य्यन्तेषु जीवः प्रकटः, वीजादिषु चाप्रकटः। वीजादङ्कुरोत्पत्त्यनन्तरं प्रत्यक्षेण लक्ष्यत्वात्, तत्पूर्वमदर्शनाच्च।

न चासत एवोत्पत्तिरिति वाच्यम्, असतोऽनुत्पत्तेः। तथा चोक्तं शास्त्रकृद्भिः—"नासतो विद्यते भावः" इति। यदि नाम आकीटपतङ्गेभ्य आवीजात् सर्व्वत्र जीवः समभावेनं विराजमानस्तर्हि किमिति न नाम निबन्धदूषकेणापि धान्यादिवीजभर्जन-पेषण-कण्डनादिना शाक-वृक्षादिच्छेदनेन तथा गृहप्राङ्गणमण्डन-घासनाशेन च तद्गत-जीवहननेन वा स्वनिरयगमनपथः सुगमोऽकारि? क्रियते वा? तेनापि स्वकृतनिबन्धे वृक्षादीनां जीवत्वं स्वयमेवाङ्गीकृत्य प्रतिपादितमिति न तद् विशेषेणास्माकं प्रतिपादयितव्यम्। न च जीवहननमृते जीवनयात्रा निर्व्वहति जीवानाम्, विशेषतो गृहस्थानाम्। तथा च प्राणविद्यायां श्रूयते—

सहोवाच किं मेऽन्नं भविष्यति यत् किञ्चिदाश्वभ्यः आशकुनिभ्यः इति।

महाभारते शान्तिपर्व्वणि च—

अजाश्वाश्वस्च मेषश्च गौश्च पक्षिगणाश्च ये।
ग्राम्यारण्याश्चौषधयः प्राणस्यान्नमिति श्रुतिः॥
तथैवान्नं ह्यहरहः सायं प्रातर्निरूप्यते।
पशवश्चाथ धान्यञ्च यज्ञस्याङ्गमिति श्रुतिः॥

श्रीधरस्वामिधृत-स्मृतिवचनेषु प्राप्यते—

"गृहमेधी गृहस्थः स्यात् हिंसा तस्यैव विद्यते"॥ इत्यादि।
"देवतातिथिसेवार्थं रक्षार्थं देह गेहयोः।
हिंसा काचिद् गृहस्थेन स्वीकार्य्या शास्त्रशासनात्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवदेहं विना नैव देहस्य रक्षणं भवेत् ।

नहि धर्मो गृहस्थस्य जीवो जीवस्य जीवनम् ॥" इति च ।

मनुना च मतमेतदनुमोदितं दृश्यते—

"प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् ।

स्थावरं जङ्गमश्चैव सर्वं प्राणस्य भोजनम् ॥"

अत्र प्राणशब्देन जीव उच्यते, प्राणितीति प्राणो जीवः इति टीकाकृद्‌व्याख्यानात् । न च पञ्चेन्द्रियत्वेनैकेन्द्रियत्वेन वा जीवगतोऽस्ति कश्चिद् विशेषः, येन पञ्चेन्द्रियत्वविशेषं प्रदर्श्य अस्मान् अधिक्षिप्तवान् जैनपत्रिकासम्पादकमहोदयः ।

अपि च सम्पादकमहोदयेन यदुक्तं वृक्षादय एकेन्द्रिया इति, तत् पृच्छामि वृक्षादीनामेकेन्द्रियत्वे किं मानम् ? दृश्यते हि वल्लरीप्रभृतीनां दृगिन्द्रिय-व्यापारोऽपि । तथाहि; यस्यां दिशि वृक्षशाखादिकमालम्बनीयं वर्त्तते तस्यां दिश्येव वल्लरीणां गमनं तदालम्बनञ्च, तथाहि वृद्धानां भणितिः—"विनाश्रयं न तिष्ठन्ति पण्डिता वनिता लताः" इति । दृश्यते वृक्षादीनाम् आलोकानुसारेण शाखाविस्तृतिः । कासाञ्चिच्च "लज्जावती"ति प्रसिद्धाभिधेयानां वल्लरीणां स्पर्शमात्रेण निमीलनम् । एतेन तासां स्पर्शसम्विदप्यस्तीत्यविसम्वादिनी वाचो युक्तिः । केषाञ्चिच्च वृक्षविशेषाणां पतङ्गभुङ्नामधेयानां काञ्चनपत्रवद्विफालपत्राणां पतङ्गपतनमात्रेण सङ्कोचनं, निःशेषपतङ्गजीर्णताकाल-पर्य्यन्तं तदवस्थयाऽवस्थानञ्च । वृक्ष तृण-लतादीनामपि स्वापश्वास-प्रश्वासादिकमस्तीति तत्त्वविदामनुभवः ।

अतस्तेषां छेदन-विदारणादौ दुःखकरविषये अवश्यमेव दुःखं, सुखकरविषये च सुखमस्तीति सर्वथा स्वीकर्त्तव्यम् ।

तथा च मनुः—

तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना ।

अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो वृक्षादीनामेकेन्द्रियत्ववादिना शास्त्रिमहोदयेन कीदृशी मुग्धा वैदग्धी प्रकटिता तद् विविच्यतां सद्भिः पाठकमहोदयैः। वृक्षादीनां जीवत्वसत्त्वादेवास्मच्छास्त्रे वृक्षच्छेदनादौ प्रायश्चित्तं दृश्यते, तथा च मनुः—

"फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम् ॥" इत्यादि

ननु पृच्छामि जैन-महाभागानां सुखभोगार्थं या पर्य्यङ्कासनादिका सामग्री वर्त्तते सा किं स्वयमुत्पन्ना? उत वृक्षच्छेदन-पाटन-विदारणादि-घटिता? या च तेषां पाकादिक्रिया सा किं निरिन्धना? सेन्धना चेद् वृक्षवधसम्बन्धगन्धोऽपि किं तत्र नास्ति? अस्ति चेत् अहिंसा कीदृशी? हिंसाशब्दस्य प्राणि-वधे रूढ़त्वात्, अहिंसाशब्दस्य च तद्विपरीतार्थत्वात्।

अपि च शास्त्रिमहोदयेन मन्निबन्ध-सन्दूषणाभिप्रायेण यदुल्लिखितं,—

"योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।
स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते ॥"

इति मनुवचनं, तत् किं न स्वमतेऽपि प्रतिकूलम्? अस्मादृशवत् तेषामपि वृक्षतृणलतादीनां छेदनभोजनादिना प्राणिहिंसाया अनिस्तारात्। जलपानादिद्वारा संख्यातीतसूक्ष्मजीवदेहभक्षणाच्च। दृश्यन्ते चाणुवीक्षणयन्त्रसाहाय्येन जलमध्ये संख्यातीताः सूक्ष्मा जीवदेहाः।

अस्माकं या वैधहिंसा हिंसात्वेनाभिमता जैनपत्रिका सम्पादकमहोदयेन, सा तु अहिंसैव, हव्यकव्याद्यर्थं जीववधस्य शास्त्रानुमोदितत्वात्। तथा च मनुः—

"या वेदविहिता हिंसा नियतास्मिंश्चराचरे।
अहिंसामेव तां विद्याद् वेदाद्धर्मो हि निर्बभौ ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मृत्यन्तरञ्च—

"विधिपूर्वा तु या हिंसा सा त्वहिंसा प्रकीर्त्तिता ॥" इति ।

अवैधहिंसायान्तु कदापि नास्माकं सम्मतिरिति विजानन्तु सम्पादक शास्त्रि-महोदयाः । तथा च पूर्वनिबन्धे मया लिखितं "कामतोऽवैध-निषिद्धमत्स्याशनेन दोषस्तु सुतरामेव", सम्पादक-शास्त्रि-महोदयानां शाकभक्षणादावपि जीवहिंसायाः क उपायः ? इति गतो जीवधारित्व-पक्षः ।

मनुष्यत्वादिपक्षमवलम्ब्य शास्त्रिमहोदयेन यत् प्रलपितं तदिदानीमालोच्यते,—

मनुष्याहारपक्षं पक्षीकृत्य यदाख्यातं शास्त्रिमहोदयेन "यो हि तीक्ष्णदंष्ट्रो जिह्वाग्रभागेण पानीयं पिबति यश्च क्रूरस्वभावस्तस्यैव मांसमशनीय"मिति । तत्र पृच्छामि, एतादृगुद्भट-सिद्धान्तः शास्त्रि-महोदयेन कस्मिन् शास्त्रे उपलब्धः ? अपि च मनुष्यत्वपक्षमवलम्ब्य "ये तु मत्स्यमांसादिकमश्नन्ति ते तु मनुष्यपदवाच्या एव भवितुं नार्हन्ति, परन्तु राक्षसा वा नराधमा वा" इति यत् प्रलपितं तत्र इदमस्माभिर्वक्तव्यम्, किं शास्त्रिमहोदयस्य मतेन य एव मांसं खादन्ति त एव तीक्ष्णदंष्ट्रादिविशेषणवाच्याः मनुष्यपदवाच्यबहिर्भूताः ?, हन्त तर्हि "सर्वं हिंस्रमयं जगत्" ।

वयन्तु महाभारतादीतिहाससमालोचनया, यशःप्रभा-समुद्भासित-सप्तविष्टपानां मूर्त्तधर्मस्वरूपाणां साक्षात् करुणारसजलनिधीनां, ब्रह्मण्यदाक्षिण्यप्रमुख-वरेण्य-गुणगणैक-पात्राणां पुण्य-प्रभावेण स-शरीरं स्वर्गं गतानां पुण्यश्लोकधर्मावतारधर्मात्मजमहाराज-युधिष्ठिरादीनामपि मांसभक्षणमालोकयामः, तथा च महाभारते वनपर्वणि ५० तमाध्याये वैशम्पायनं प्रति जनमेजयस्य—"किमासीत् पाण्डु-पुत्त्राणां वने भोजनमुत्तमम्" इति प्रश्ने—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वानेयश्च मृगांश्चैव शुद्धैर्बाणैर्निपातितान् ।
ब्राह्मणानां निवेद्याग्रमभुञ्जन् पुरुषर्षभाः ॥ इत्युत्तरतः ।

अपि च निखिल-भूभारहरणकारण-कलित-कलेवराणां दलित-सकल-नरक-बलानां साक्षात् करुणामय-विग्रहाणां स्मरणनिवारित-मानवकृत-दुरितनिवहानां दुष्पार-भवपारावार-सन्तारणैककर्णधाराणां विश्ववन्द्य-वृन्दारक-वृन्दवन्दित-चरणारविन्दानां श्रीमत्-परमेश्वर-भगवत्कृष्णचन्द्रादीनामपि यादवसहितानां मांसादिभोजनं हरिवंशे महाभारते विष्णुपर्वणि ८८ तमाध्याये समासादयामः । तथाच—

अन्नानि वीरा बुभुजुः प्रतीता मांसानि पक्वानि फलाम्लकानि ।
मैरेय-माध्वीक-सुरासवांस्ते सूदोपनीतांश्च पपुः प्रियाभिः ॥

अन्यत्र च—

यजनान्ते तदन्नञ्च तत्पयो दधि चोत्तमम् ।
मांसञ्च मायया कृष्णो गिरिर्भूत्वा समश्नुते ॥ इत्यादिभ्यः ।

किञ्च—नाममात्रस्मरणजनितागणितमहापातकादिपापविरामस्य रामस्यापि राजसूयाश्वमेधप्रमुखमखानुष्ठानं मांसभक्षणञ्च अवेक्षामहे वयं रामायणादौ ।

भट्टावपि—"बुभुजे देवसात् कृत्वा शूल्यमुख्यञ्च होमवान्" इति दृश्यते । उत्तररामचरितादावपि रघुकुलगुरोर्वशिष्ठस्य मधुपर्के मांसाशनमासाद्यते ।

किं नाम जैनपण्डितप्रकाण्ड-शास्त्रिमहोदयसविधे मांसाशिन एते युधिष्ठिरादयः पण्डिताग्रगण्या जगच्छरण्यवरेण्य-गुणग्राम-मण्डिताः करुणाशौण्ड-प्रवीणा महापुरुषप्रकाण्डा अपि मानवधर्म-विरहिताः ? स्वकरकमलकलितललितलेखनीगलिततीक्ष्णदंष्ट्रादि-विशेषणविशेषविशिष्टाः प्राणिविशेषाः ? मनुष्यपदवीबहिर्भूता राक्षसाः ? नराधमा वा ? येन मांसभक्षणमात्रेणैव तत्तद्विशेषणपात्रतां नीता मानवाः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हो हो भोः, यदि नाम जैनपण्डितमहोदयमतेन विशिष्टमनुष्य-धुरन्धरा अपि युधिष्ठिरादयः मांसभोजनान्मनुष्यपदवाच्या भवितुं नार्हन्ति, तर्हि का कथा मादृशानाम् ? शास्त्रिमहोदया इव मनुष्य-पदवाच्यतामासादयितुं नाभिलषामो वयमिति गतो मनुष्यत्वादि पक्षाक्षेपः।

इदानीं शास्त्रदृष्टिपक्ष आलोच्यते—शास्त्रदृष्ट्या ब्राह्मणादीनां वैध-मत्स्य-मांसभोजनविधिरस्माभिरासाद्यते। तथा च मनुस्मृतौ पञ्चमाध्याये—

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया।
यथाविधि नियुक्तस्तु प्राणानामपि चात्यये॥
प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत्।
स्थावरं जङ्गमञ्चैव सर्वं प्राणस्य भोजनम्॥

अत्र प्राणशब्देन जीवो बोध्यः, प्राणितीति प्राणो जीवः इति टीकाकृद्व्याख्यानात्।

नात्ता दूष्यत्यदन्नद्यान् प्राणिनोऽहन्यहन्यपि।
धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा।
देवान् पितॄंश्चार्चयित्वा खादन्मांसं न दूष्यति॥

अवैधमांसभक्षणे निषेधोऽपि दृश्यते यथा—

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः।
दग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः।
यावन्ति पशुरोमाणि तावत् कृत्वो ह मारणम्।
वृथा पशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि॥

तथा श्रुतिस्मृतिषु यज्ञाद्यर्थं पशुहिंसनस्य प्रशंसापि दृश्यते। तथा च श्रुतिः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुर्वै नीयमानः स मृत्युं प्रापश्यत् स देवान्नान्वकामयतैतुम् ।
तं देवा अब्रुवन् एहि स्वर्गं त्वा वै लोकं गमयिष्यामः ॥
न वा उ एतन्म्रियसे तरिष्यसि देवाइत् ।
एहि पथिभिः सुगेभिः ।

मनुरप्याह—

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञोऽस्य भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः ॥
ओषध्यः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणश्च ये ।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितोः पुनः ॥
मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥
एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद् द्विजः ।
आत्मानञ्च पशुञ्चैव गमयत्युत्तमां गतिम् ॥
या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद् वेदाद्धर्मो हि निर्बभौ ॥ इति ।

महाभारते चानुशासनपर्वणि—

प्रोक्षिताभ्युक्षितं मांसं तथा ब्राह्मणकाम्यया ।
अल्पदोषमिहाख्यातं विपरीते तु लिप्यते ॥ इति ।

भागवते एकादशस्कन्धे च—

तथा पशोरालभनं न हिंसा । इति ।

अत एतेभ्यो वचनेभ्यो वैधो हिंसा न हिंसा, ततश्च न दोषावहा इति प्राप्यते । महाभारते शान्तिपर्वणि ३६श-तमाध्याये युधिष्ठिरस्य भक्ष्याभक्ष्यप्रश्ने—

"अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जिताः ।"

इत्यादि भीष्मवचनेन सशल्का मत्स्या ब्राह्मणैर्भक्ष्या इति स्पष्टं प्रतीयते ।

विष्णुसूत्रे च विष्णुनैवेद्यमधिकृत्योक्तं—नाभक्ष्यं नैवेद्यार्थे,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्ष्येष्वजामहिषीक्षीरं वर्जयेत् पञ्चनख मत्स्य-वराहमांसानि च। इति।

अत्र भक्ष्येषु मत्स्यस्य विष्णुनैवेद्यार्थं वर्जनदर्शनात् मत्स्या भक्ष्या इति प्राप्तम्। अन्यथा नाभक्ष्यं नैवेद्यार्थे इत्युक्त्यैव गतार्थत्वात् किं विशिष्टभक्ष्येषु परिगणय्य वर्जनेनेति।

मत्स्यादेः प्रत्याख्याननिषेधश्च दृश्यते, तथा च याज्ञवल्क्यस्मृतौ—

कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः।
मांसं शय्यासनं धानाः प्रत्याख्येया न वारि च॥

मनुस्मृतौ च—

शय्यां गृहं कुशान् गन्धान् आपः पुष्पं मणिं दधि।
मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत्॥

'न निर्णुदेत्' न प्रत्याचक्षीत इत्यर्थः।

मत्स्यमांसादिना श्राद्धकरणे तु पितृणां तृप्तिविशेषः स्मर्य्यते, तथा च महाभारतेऽनुशासनपर्वणि—

द्वौ मासौ तु भवेत्तृप्तिर्मत्स्यैः पितृगणस्य च।
त्रीन् मासानाविकेनाहुश्चतुर्मासाञ्छशेन ह।
आजेन मासान् प्रीयन्ते पञ्चैव पितरो नृप॥ (क्रमशः)

लीलाकैवल्यम्

[निबन्धकः—श्रीप्रबोधेन्दुनाथ-ठाकुरः बि. ए.]

परिहर सति! वञ्चितपति-पञ्चित-गुरुगञ्जं
रसय रसय विषमविषय-विकल-हृदयकञ्जम्।
साधय वरसज्जां परिहर गुरुलज्जां
चञ्चलमतिरेति झटिति हरिरधिरतिकुञ्जं
भीरु! दरय गृहपतिभयमनुभव रसपुञ्जम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमय-रसपात्रि ! मधुरमिलनरात्रि-
रुदयति रतिरङ्गविरतिमङ्ग जहिहि तूर्णं
सुदति ! हृदयभावनिचयमाशु रचय पूर्णम् ॥

स्वपिति सकलपल्ली हसति मधुरमल्ली
ननु दिशि दिशि शारद-शशिकान्त-किरणकान्ती
राजति जितसरसिजमुखि ! हृश्यस इव यान्ती ॥

नीलनलिननयने ! कथय किमसि भवने
पशुप-युवति ! पूरय रतिरङ्गिणमनु कामं
कलमपनय ननु मणिमय-नूपुरमतिवामम् ॥

शारदशशिभासा रजनिरमलहासा
यास्यसि कथमभिसृतिपथमाशु रचय वेशं
ननु निशमय वपुषि शमय निपुणमसितलेशम् ॥

विरचय निजगात्रं मलयज-रसपात्रं
गञ्जित-गलिताञ्जनगिरि-गर्वं चिकुरपाशं
नय रसवति ! कुसुमविततिभातिषु लघु नाशम् ॥

मरकतमणिहारं वहसि किमतिभारं
हृदयजमधिवासय यदि सितसरसिजदाम
वर्त्मनि शिवमस्तु क इव वेत्तु तदिह नाम ॥

नीलवसनमधुना दर्शितमयि विधुना
परिहर परसंशयकरमाहर सित-सिचयं
गुणवति ! नय विनयमदयकलुषवचननिचयम् ॥

वेणुरणति दूरं जनयति रसपूरं
वारिजमुखि ! भावय सुखि मधुमुरहरचित्तं
चल कुलवति ! वल्लवपतिरिच्छति सह नृत्यम् ॥

कवलय कुलभीतिं सवलय रसरीतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वितनु सुतनु ! नागरमनु नूतननटरङ्गं
रङ्गिणि ! रससङ्गिनि तव घटय सघनमङ्गम् ॥
कृत-कल-करताला निखिल-पशुप-वाला
नाटय नट नवनटवर एष नटति साकं
विश्ववलय ! पश्य कलय परमसुकृतिपाकम् ॥
मनसिजमदहारी रासरसविहारी
नृत्यति कृति तरलितमतिरनु नृत्यति राधा
पश्य भुवन ! नश्यतु तव जनन-मरण-वाधा ॥

परिषत्प्रशस्तिः

[निबन्धकः—श्रीसुरेन्द्रनाथविद्यारत्नः एम्. ए]

यत्र प्रसन्नगम्भीरा भावाबन्धरसोज्ज्वला ।
गैर्व्वाणी सेव्यते वाणी संसत् सा कस्य न प्रिया ॥
गीष्पतिं पशुपतिं सभापतिं प्राप्य हृष्टहृदयो दिवस्पतिः ।
तद्वियोगविधुरोऽपि मन्यते तां सभां स्थितिमतीं स्थिरायतिम् ॥
तर्काचार्य्या विविधविबुधाः कोविदश्रेष्ठसभ्या
यत्रादित्याः स्फुरितधिषणातेजसो दुर्निरीच्याः ।
कालीदुर्गाचरणरजसा नीरजीकारितान्त-
स्तत्त्वाः सा स्याद् दनुतनुज-भी-ग्रस्तधैर्य्याकुला किम् ॥
इयमिष्टफलाय कल्पतां नटविज्ञानकलासुमञ्जरी ।
नव "पत्र" सुचारुवल्लरी प्रतिभापुष्पविलासहासिनी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थ-निकषः

[निबन्धकः—श्रीचिन्ताहरणचक्रवर्त्ति-काव्यतीर्थः एम्. ए.]

A Descriptive Catalogue of the Sanskrit Mss. in the Tanjore Maharaja Serfoji's Sarasvati Mahal Library, Tanjore, by P. P. S. Sastri, B. A. (Oxon.), M. A. (Madras), M. R. A. S.

ताञ्जोरस्थितप्रसिद्धग्रन्थागारस्य प्रस्तूयमानविशालसूचिपुस्तकस्य त्रयोविंशतिखण्डात्मकस्याद्य यावत् प्रकाशं नीतं खण्डत्रितयमुपलब्धमस्माभिः । ग्रन्थागारस्यैतस्य सविस्तारसूचिनिर्म्माणप्रयत्नोऽयं सर्वथाऽस्माभिरनुमोद्यते आशास्यते च निर्वाधमेतत् कृत्यं पूर्णतया सफलतामुपगतं संस्कृतसाहित्येतिवृत्तमालोचयतां महान्तमुपकारमुपजनयेदिति ।

सूचि-ग्रन्थादौ ग्रन्थागारस्येतिहासं समासतो वर्णयता सम्पादकेन श्रीमता शास्त्रिमहोदयेन सर्वथा साधु समनुष्ठितम् । वर्षाणां शतचतुष्टयं यावत् क्रमेण वृद्धिं भजतोऽस्य ग्रन्थागारस्य विवरणप्रकटनेन न जानीमः कियन्तो वा नवीननवीना ग्रन्थविशेषा विलुप्तत्वेन प्रतीयमानाः सामाजिकानामतितरां तृप्तिमुपजनयेयुः ।

तृतीयखण्डप्रारम्भे प्रस्तूयमानग्रन्थस्य विवरणमुपन्यस्तम् । तत्र प्रतिखण्डं विषया निरूपिताः । एवञ्च सप्तदशखण्डे दर्शनग्रन्थविवरणात्मके शैव-शाक्त-गाणपत-दर्शनग्रन्थानां विवरणमुपनिबध्येत । ऊनविंशे च खण्डे शैवाद्यागमग्रन्थाः, एकविंशे च शैवादिमन्त्रशास्त्रग्रन्थाः विव्रियेयुरिति निर्णीतम् । परं सम्भवति आगमशास्त्रे एव शैवादिदर्शनानां मन्त्रशास्त्राणां च सम्यगन्तर्भावे तेषां पृथगुपन्यासस्य च प्रयोजनं न सर्वथोपलभ्यतेऽस्माभिः । विषयेऽत्र सम्पादकमहोदयस्य दृष्टिराकृष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरञ्च किमपि वक्तव्यमस्ति ग्रन्थस्यास्य उपयोगातिरेकं द्रष्टुमीहमानानाम् अस्माकम्। तथा च तृतीयखण्डान्ते विन्यस्तायां ग्रन्थनामसूचौ यदि Catalogus Catalogorum ग्रन्थे Aufrecht महोदयैरनुल्लिखितानां ग्रन्थानां नामपार्श्वे चिह्नं किमपि प्रदीयेत तथा प्राचीनतरा अन्यथा वा उपयोगमावहन्तो ग्रन्था सूच्यामेतस्यां चिह्नविशेषैरङ्किताः स्युस्तदा ग्रन्थमालोचयतां विशेषतः सौकर्य्यं स्यादिति विषयोऽयं सर्वथा विचारमर्हति सम्पादकमहाभागानाम्। एतदप्यत्र वक्तव्यम् यथा बडोदाप्रकाशितसूच्यामेवैवंविधालोचनसौकर्य्यमुपलभामहे नान्यत्र कुत्रापि। एवं कृते उपयोगवतोऽस्य ग्रन्थस्योपयोगो वर्द्धिततरामिति निःसंशयं वच इति शम्।

संस्कृत-साहित्य-परिषच्छात्रसमितेः प्रथमवर्षीय-कार्य्यविवरणम्

[निबन्धकः—श्रीविष्णुपदभट्टाचार्य्यः बि. ए.]

महतस्तमसः पारे पुरुषं ह्यतितेजसम्।
यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञानात्मने नमः॥

पञ्चविंशदुत्तरत्रयोदशशततमवङ्गीयाब्दे शुभसौरभाद्रपदे परिषच्छात्राणां श्रीमतां ज्ञानदाचरणशर्मभट्टाचार्य्याणामुत्साहेन नाममात्रावसितायाः संस्कृतसाहित्यपरिषच्छात्रसमितेः पुनः प्रतिष्ठापनं सञ्जातम्। शाखाविशेषः खल्वियं परिषच्छात्रसमितिः संस्कृत-साहित्य-परिषदः। दश सदस्यान् समादाय प्रतिष्ठितेयमासीत् समितिः। अनाड़म्बरोपक्रमायां सकलच्छात्रजनहितैषिण्यामस्यां समित्यां सम्प्रति प्रायेण पञ्चाशत्संख्यकसदस्या विद्यन्ते।

आर्य्यगौरववाहिन्याः सुरसरस्वत्याः प्रचारेण समुन्नतिसम्पादनन्तावदस्याः समितेर्मुख्यं लक्ष्यस्थानम्। परिषदा सह लक्ष्यैक्येऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तावदनया छात्रसमित्या प्रयोजनमिति चेदत्रोच्यते। वयोवृद्धानां विदुषां समवाये सुकुमारमतीनां जड़धियां छात्राणां वाणी न सम्यक् स्फुरति इति कृत्वा येन ते स्वच्छन्दं संस्कृतमालोचयितुं पारयेयुस्तदर्थमेव प्रतिष्ठितेयं समितिः। स्वानुष्ठितायां समानवयोविद्यप्रायायां संसदि छात्राणां स्वाभिप्रायप्रकाशप्रयत्नो यथा सफलतां गाहते तथा भवति नो विद्वज्जनसमागमे। अधोऽस्याः समितेर्नियमावली दीयते—

१। परिषद्विद्यालयस्य सर्वे विद्यार्थिनो नियमेनास्याः समितेः सभ्यपदं गृह्णीयुः। २। विभिन्नविद्यालयाध्यापकैः स्वीयविद्यार्थितया विज्ञापितास्छात्रा अप्यस्याः समितेः सभ्यपदमर्हेयुः। ३। समितेरस्याः सभ्यपदग्रहणे किमपि शुल्कं नापेक्ष्येत। ४। समितेरस्या अधिवेशने निबन्धा व्याख्यानानि पारस्परिकसंवादाश्च संस्कृतवाचमेवोपजीवेयुः। ५। एतस्याः सम्बन्धिनो निबन्धादयः सर्वे एव विशेषतो विद्यार्थिनामुपकारमनुरुध्येरन्।

प्रतिमासं समितेरस्याः साधारणाधिवेशनं भवति तत्र छात्रैः संस्कृतभाषया निबन्धा विरच्यन्ते पठ्यन्ते समालोच्यन्ते च। एवं प्रबन्धसमालोचनाविरचनादिना नूनं विवर्धिततरां तेषां संस्कृतेषु ज्ञानम्। मासिकसभासु रघुवंशीयानां कुमारसम्भवस्थितानां रामायणमहाभारतगतानामन्येषामपि सुकविभाषितानां श्लोकानामावृत्तिर्भवति। प्रचलति च कदाचित्तासु सभासु श्लोकविवादो यः किल अति हि नाम पुरातनः। एकेन समुच्चारितस्य श्लोकस्यान्त्यं व्यञ्जनं समादायान्येन तद्व्यञ्जनादिश्लोकोच्चारणं श्लोकविवादो नाम। आलोच्यवर्षे द्वादशसंख्यकानि अधिवेशनानि जातानि। अधस्तादुल्लिख्यमाना निबन्धा अधःसमुल्लिख्यमानैश्छात्रैर्विरचिता वाचिताश्च। सुष्ठु समालोचिताश्च सदस्यैस्ते ते निबन्धाः।

	प्रबन्धाः	रचयितारः
प्रथमाधिवेशने	छात्रसमितेः प्रयोजनम्	श्रीविष्णुपदभट्टाचार्य्यः
द्वितीयाधिवेशने	श्लोकविवादः	श्रीरामकृष्णचक्रवर्त्ती, एम्. ए.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयाधिवेशने	युधिष्ठिरः स्वार्थपरो न वा	श्रीज्ञानदाचरणभट्टाचार्य्यः
	छात्राणां कर्त्तव्यम्	श्रीबङ्किमचन्द्र दासः, बि. ए.
चतुर्थाधिवेशने	उत्तररामचरिते शाकुन्तले च	
	स्त्रीशिक्षाया निदर्शनम्	श्रीअमरेन्द्रनाथमजुमदारः, बि. ए.
पञ्चमाधिवेशने	भवभूतिकालिदासयोः	
	प्रकृतिवर्णनम्	श्रीहरेन्द्रकुमारगङ्गोपाध्यायः
षष्ठाधिवेशने	कादम्बरीमहाश्वेते	श्रीअनादिनाथभट्टाचार्य्यः, बि. ए.
सप्तमाधिवेशने	वाणशैली	श्रीगौरीनाथभट्टाचार्य्यः
अष्टमाधिवेशने	शिक्षा	श्रीकालीपदभट्टाचार्य्यः
नवमाधिवेशने	माघः	श्रीहरेन्द्रकुमारगङ्गोपाध्यायः
दशमाधिवेशने	युधिष्ठिरचरितम्	श्रीबङ्किमचन्द्रव्याकरणतीर्थः
एकादशाधिवेशने	शिष्टाचारः	श्रीमहेन्द्रलाल साहा, बि. ए.
द्वादशाधिवेशने	माघकाव्यम्	श्रीहेमचन्द्रभट्टाचार्य्यः

अस्याः समितेः कश्चिदभिनयविभागोऽप्यस्ति। आलोच्यवर्षे समितिसदस्यैः परिषदाचार्य्याणां तत्रभवतां श्रीमत्कालीपदतर्काचार्य्याणां स्यमन्तकोद्धारः, भास्करकविकृतम् उन्मत्तराघवं (रूपकमिदमनभिनीतपूर्वम्) भासकृतं दूतघटोत्कचञ्चेति त्रीणि रूपकाणि [illegible]णमभिनीतानि। स्यमन्तकोद्धारे दारकभूमिकां समाश्रित्य रङ्गं प्रविष्टस्य श्रीमतो मधुसूदनचक्रवर्तिनः अभिनयचातुर्य्यचोरितचित्तैः माननीयसंस्कृतसाहित्यपरिषत्सम्पादकैः श्रीमदमरेश्वरठाकुरवेदान्तशास्त्रि-(एम्.ए.पि. एच्. डि,) महोदयैः प्रीत्या तस्मै रौप्यपदकमेकं प्रदत्तम्।

छात्राणां सम्मिलितश्रम एव केवलं छात्रहितैषिणीं समितिमिमां सफलकामां विधातुं प्रभवतीति कृत्वा तेषां समवेतसहानुभूतिं सानुनयं प्रार्थयामहे। मन्यामहे विवर्धयिष्यन्ति ते तेषां स्वकीयामिमां समितिमित्यलं पल्लवितेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषच्छात्रसमितिः

वार्षिक-महोत्सव-विवरणम्—व्यतीत-सौराश्विनमासस्य चतुर्दशमिते सोमवासरे सायं सार्द्धषष्ठहोरायां परिषच्छात्रसमितेः प्रथमवार्षिकमहोत्सवो महता समाडम्बरेण समाहितः समभवत्। तत्र समवेतानामुपरिष्टान्निवेदितनामानो महात्मानो विशेषेणो-ल्लेख्यतामवगाहन्ते,—महामहोपाध्याय-भागवतकुमारशास्त्री एम्.ए.पि. एइच्. डि, आदित्यनाथमुखोपाध्यायः एम्. ए. पि. एइच्. डि, सुनीति-कुमारचट्टोपाध्यायः एम्. ए. डि. लिट्, किरणचन्द्रदत्तः, क्षितीशचन्द्र-चट्टोपाध्याय (एम्. ए) प्रभृतयश्च। तत्रादौ वाणीवन्दनमिषेण श्रीमता सनत्कुमारचट्टोपाध्यायेनताललयसङ्गतं किञ्चिद् गेयपदं गायता सभ्यानां मानसमुत्सुकमकारि। ततश्च तत्रभवता भागवतकुमार-शास्त्रिणा सभापतित्वे वृतास्तत्रभवन्त उपेन्द्रनाथघोषाल(एम्. ए. पि. एइच्, डि.) महोदयाः। एते महोदयाः कलिकाता-विश्वविद्यालये तथा कलि[illegible]ता-प्रेसिडेन्सिमहाविद्यालये च इतिहासाध्यापकतायां लब्धख्यातयो विद्वत्समाजेषु प्रख्यातिमापन्नाः। वृतेषु सभापतिषु समितेरन्यतरसम्पादकेन श्रीमता विष्णुपदभट्टाचार्य्येण पठितमासीत् वार्षिककार्य्यविवरणम्। अनेके विद्वांसः समयोपयोगिनं वाग्विस्तरं प्रस्तूय समन्वरञ्जयन्नञ्जसैव सभाजनानां मनांसि। सभापतयो भाग-वतकुमारशास्त्रिणश्च छात्रसमितेरधिवेशने विशिष्ट-प्रबन्धरचयित्रे छात्राय रौप्यपदकद्वयमङ्गीकृतवन्तः। अवसाने च छात्रैः स्वयमेव संक्षिप्य नवीनतयैव संस्कृतं मृच्छकटिकं नाम रूपकं प्रयुक्तम्, यस्य दर्शनेन समागताः सर्वं एवापामराः परां प्रीतिमाविरकार्षुः। गभीरतामधिगतायां रजन्यां सञ्जातायाञ्च रूपकाभिनयविरतौ, सभ्या-स्तद्गतचित्ता एव गृहं प्रति प्रतिनिवृत्ताः। इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतपत्रिका-विमर्शनम्

उद्यानपत्रिका—मद्रदेशस्थ-ताञ्जोरान्तर्गत-तिरुवदिप्रान्तात् प्रकाशिता। अनया सञ्चिकया अस्याः पत्रिकाया द्वितीयं वर्षं पूर्णमभवदिति विदाङ्कुर्वन्तु प्रियपाठकाः। अस्या वार्षिकं मूल्यमतीव स्वल्पमेकं रूप्यकमतः कागदादिकं मुद्रणादिकं वा नातीव रमणीयम्। अत्र न केवलं 'विधिपरिच्छेदो' 'मेघसन्देशो' वा वर्त्तते परं 'देशभाषाध्यापकाः' 'अप्रशान्ति'रित्यादयोऽपि। 'देशभाषाध्यापकाः' इति निबन्धस्तु समीचीनतयैवोपन्यस्तः। भाषाद्वये लब्धप्रज्ञानां खलु भाषान्तरीकरणं शक्यं स्यात्, न केवलं देशभाषाप्रवीणानां न वा केवलम् आङ्गलभाषाविरुदभाजामिति तु अस्माकमपि मतम्। 'अप्रशान्ति' रिति निबन्धे तु सेप्टेम्बर-षष्ठदिनस्य हिन्दुपत्रिकायां लोकस्याप्रशान्तिमधिकृत्य क्वचित् केनचित् कृतस्योपन्यासस्यावेदनं प्रदत्तं समर्थितञ्च। आवेदनञ्चेदम्—"अप्रज्ञः, आत्मप्रज्ञः, ब्रह्मप्रज्ञ इति जीवस्य त्रयः प्रकाराः। स्थावरलोकोऽप्रज्ञः। पशव आत्मप्रज्ञाः। मनुष्यैस्तु ब्रह्मप्रज्ञैर्भवितव्यम्। य इमं प्रज्ञाविशेषमन्तरा वर्त्तते स आत्मनो जन्म तिर्य्यक्सदृशं कुर्वन् पशुप्रकृतितां दर्शयति। यदा मनुष्यो भगवतः सम्बन्धात् प्राच्यवत तदा लोकेऽप्रशान्तिः प्रावर्त्तत। सर्वे कर्मोपजीविनां क्लेशाः, जातिकुलावान्तरकलहाः, सर्वविधाश्चान्ये मतिभेदा मनुष्याणां भगवत्संसेवनविरहादेवोत्पन्ना भवन्ति।" वयमप्यत्रानेनैव 'अप्रशान्ति'रितिशीर्षकनिबन्धकारेण सह वदामः 'को नामास्मादुपन्यासकात् बुद्धिमत्तरं भाषेत ?'

साहित्यसुधा—पाटलीपुत्रान्तर्गत-राघवपुरात् प्रकाशमापन्ना। एकहायने वयसि वर्त्तमाना पद्यमयी देशभाषान्विता च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'क्रमागतो वनितावियोग'स्त्वतीव करुणरसात्मकः सहृदयमनांसि द्रावयतीत्यत्र नास्ति सन्देहविन्दुरस्माकम्।

The Sanskrit College Magazine—पत्रिकायामस्यां त्रयो विभागा वर्त्तन्ते—संस्कृताङ्गल-वाङ्गलभेदेन। आङ्गलवाङ्गलयोरस्माकमनपेक्षा। संस्कृतांशस्य मुद्रणादिकं नासाधु। निबन्धाश्च भाषाचातुर्य्येण विषयगौरवेण चास्मान्नानन्दयति इति न। परमस्याः प्रतिवर्षं सकृदाविर्भाव इति न वयं तथा सन्तोषविशेषमनुभवामः, न वा संस्कृतविभागीयच्छात्राणामत्र सहयोगिता नास्तीत्यप्यस्मान् सन्तोषयति। यदुक्तमस्यां सम्पादकीये, "सामयिकं किमपी"ति निबन्धे, प्रवीणेनाध्यापकवर्य्येण—'क्षतभवितव्यता-देवता-नतिभिर्वृथा शक्तिचयं परिहरद्भिः श्रीहरिपादपद्मसमर्पितफलैः सर्वथा बिरोधो हातव्य' इति। अस्य सारवत्तां विचारयन्तु भवन्तः साध्वसाधुविचारनिपुणाः प्रियपाठकाः।

रसमञ्जरी

[निबन्धकः—श्रीदक्षिणारञ्जन-शास्त्री एम्. ए]

छात्रप्रतिभा—शिरोमणिर्विस्मयाकुलः क्षणं विचिन्त्य पुनरप्याह—माधव, सर्वज्ञो भवानिति मे प्रतिभाति। उच्यतामिदानीं को नाम कालिदासः, कीदृशं वा तस्य पाण्डित्यमिति। माधवेन तु नासिकाविकुञ्चनपुरःसरमुक्तं—नितरां संस्कृतानभिज्ञो देवानां प्रियः खलु कालिदासो यो मेघदूतस्य कर्त्ता। स खलु मूर्खो मेघदूतस्य प्रथम एव श्लोके विशेष्यविशेषणयोः समलिङ्गतामप्यजानन् 'कश्चित् कान्ता' इति प्रयुक्तवान्। धिक् तं वालिशाधमम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* * * * * *

शिरोमणिना विस्मितेनैवोक्तं—माधव, सर्वशास्त्रज्ञस्यापि ते व्याकरण एव समधिका व्युत्पत्तिरिति प्रतिभाति। उच्यतां तावदपवर्गे तृतीयेति पाणिनिसूत्रस्य को वा समीचीनो नवीनोऽर्थस्तव प्रतिभासमुद्भूत इति। माधवेन सदर्पमेवोक्तं—तृतीया प्रकृतिर्नपुंसकः। तेनैव अपवर्गे—मोक्षे प्रयतितव्यम्। मिथुनधर्मे अशक्तत्वात्। स्त्रीपुंसलक्षणा व्यक्तिर्मैथुने शक्तत्वात् न मोक्षेऽधिकारिणी। नपुंसकानामेवापवर्गेऽधिकारः। स्त्रीणां पुंसाञ्च भोग एवाधिकारो नत्वपवर्गे इत्येव 'अपवर्गे तृतीयेति' सूत्रे भगवतः पाणिनेरभिप्राय इति।

* * * * * *

शिरोमणिर्विस्मयसागरमग्न इव पुनरप्यवदद् माधव, महीयसी खलु ते नवनवोन्मेषशालिनी बुद्धिरिदानीं ज्ञातुमिच्छामि नीतिशास्त्रे ते कीदृशं पाण्डित्यं जातमिति। श्रुत्वैतन्माधवो विहस्याह—यद्येवं तर्हि आगम्यतां मयैव सार्द्धम्। शिरोमणिरपि तूष्णीमेवानुससार गच्छन्तं तं माधवम्। अथ गच्छतोस्तयोः पथि काचित् षोड़शी सद्यः स्नाता आर्द्रसुचिक्कणवसना रूपलावण्यवती जल[illegible]समुद्वहन्ती गृहं प्रतिगच्छन्ती चावलोकिता। दृष्ट्वैव तां यवीयान् माधवस्तस्या वस्त्राञ्चलमाकृष्य विहस्याह भवति कस्य त्वम्? अथवा यस्य कस्य वा, आरोपय मामुत्सङ्गे यतस्तत्र ममैवाधिकार इति बलादुत्सङ्गमाश्रयितुं प्रवृत्ते तस्मिन्, शिरोमणिना अन्यैश्च पथिकैर्निवारितः प्रहृतश्चायं सदर्पमाह माधवः—किं न ज्ञायते भवद्भिर्नीतिकारवचनं "मातृवत् परदारेष्विति"? मातेयं मे षोड़शी। मातृक्रोडे कस्याधिकार इत्यपि भवद्भिर्न ज्ञायत इति अनैतिका एव भवन्त इति मन्यामहे।

* * * * * *

—००—

पुस्तकालय
गुरुकुल कांगड़ी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्था: *

	मूल्यम् साधारणानाम्	सदस्यानाम्
२। कालीतन्त्रम्—सटीकानुवादम्	॥/०)	॥०)
३। मङ्गलीसङ्गीतम्	,, ।/०)	,, ।/०)
४। मुक्तिवाद:—गदाधर-भट्टाचार्य्यविरचित:, सटीकाद्वय-भाष्यानुवादसहित:	,, २)	,, १॥०
५। दुर्गापूजातत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्, शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वरूपम्	,, ३।०	,, ३
६। पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा	१।०)	,, १)
७। दुर्गोत्सवनिबन्धकदम्बम्—दुर्गोत्सवविवेकादि-ग्रन्थपञ्चकात्मकम्	,, ।०)	,, ।/०
८। कारकोल्लास:—भरत-मल्लिककृत:, सोदाहरण-कारकनिर्णयरूप:	/०)	,, /०)
९। ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गल-भाषाटिप्पणसमेता	॥०)	,, ॥/०)
१०। ग्रहयागतत्त्वम्—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	,, ।/०
११। प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थ:	,, १।०)	,, १)
१२। तीर्थ[illegible]—रघुनन्दन-भट्टाचार्य्यकृतम्	,, ।/०	, ।/०
१३। पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्	,, ॥०)	,, ॥/०)
	साधारणानाम्	सदस्यानाम्
१४। नलदमयन्तीयम्—(सप्ताङ्कनाटकम्) श्रीकालीपद-तर्काचार्य्यकृतम्	,, १।०)	,, १)
१५। प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	,, १॥)
१६। यात्रातत्त्वम्—श्रीरघुनन्दनभट्टाचार्य्य-कृतम्, विष्णो रथयात्रादि द्वादशयात्रापद्धति-रूपम्	।)	,, ।/०
१७। ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्	२।०	,, २)
१८। प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थ:	१।०	,, १)

* देवनागराक्षर-मुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा वङ्गाक्षरमुद्रितनामानि वङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राप्यमाणा ग्रन्थाः

१। आनन्दलतिका (चम्पूकाव्यम्)—दम्पतिभ्यां जयन्ती-कृष्णनायाभ्यां विरचिता।

२। छन्दोगमन्त्रभाष्यम्—भट्ट-गुणविष्णुकृतम्।

३। भाषारत्नम्—अभिनव-कणादकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः

१। समञ्जसा—अनूप-नारायणकृता ब्रह्मसूत्रवृत्तिः।

२। रामायणम्—वाल्मीकि-विरचितम्।

Printed and Published by
Durgamohan Kavya-Sankhya-Puranatirtha, M. A.
Sanskrit Sahitya Parishat, Shyambazar, Calcutta.

Printed at
Siddheswar Press,
38, Vidyasagar Street, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1939-2008

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar